उकारस्य ओकारो गुणः अवादेशश्च कारुः कारू कारवः संबोधनेऽपि हे कारो हे कारू हे का
रवः कारुं कारू कारून् कारुणा कारुभ्यां कारुभिः कारवे। कारुभ्यां कारुभ्यः कारोः
कारुभ्यां कारुभ्यः कारोः कारवोः कारूणां कारौ कारवोः कारुषु अचोरञ्जिभ्यां हेतु इति हि
त्व एवमन्यपट्वादयः। क्रोष्टुशब्दस्य भेदः। तथैव स्वायत्तनिः क्रुश आह्वाने
रोदने च। सि। तसि। गमि। समि। तन्त्वविधानप्रसङ्गे तुन् प्रत्ययः तत्र सिञ् बन्धने तनु वि
स्तारे। गम्लृ गतौ। समी परिमाणे मेषच समवाये। अव रक्षणे। डुञ्ञ् दाने धारणयोः क्रो
श आह्वाने रोदने च इत्येतेभ्यो धातुभ्यस्तुन्प्रत्ययो भवति संज्ञायां विषये। नकारः स्व

ओ॰ २३

© Dharmartha Trust J&K. Digitized by eGangotri

गार्थः । क्संलत्तु । क्सवमतवंलघ्रसंज्ञाभवति । उगन्तस्यलघूपधस्य । उगन्तस्यां
गस्यलघूपधस्य च इकोगुणोभवति । सार्वधातुकार्धधातुकयोः परतः । व्रश्चभ्रस्
जा मृज सृज यजराज भ्राजछशांषः व्रश्चादीनांधातूनांशकारान्तानांचषका
रादेशोभवति झलिपरतः पदान्तेच ऋतुनाहुः सर्वनामस्थानेपरतः क्रोष्टुशब्दःस्व
ज्वद्भवति तृजातिदेशोयं अन्यस्यान्यधर्मसमारोपणमतिदेशः निमित्तंव्यपदेशश्च
शास्त्रंउक्तस्यमेवच । रूपंकार्यंतथेत्यष्टौचास्यादतिदेशाः क्रोष्टुशब्दस्यासंबु
द्धौसर्वनामस्थानेपरेतृजन्तस्येवरूपंभवति अ॰ ॰ विति वर्तमाने । ऋदुशनस्पुरु
दंसोनेहसांच । ऋदन्तानामङ्गानां उशनस् पुरुदंसस् अनेहस् इत्येतेषामनङ्
भवति । असंबुद्धिवर्जितेसौपरतः सचङित्त्वादन्त्यस्यभवति । अनुबन्धलोपः पूर्व
वत् हल्ङ्यादिलोपश्च । नोपधायाः । सर्वनामस्थानेसंबुद्धाविति दीर्घः नलोपः
प्रातिपदिकान्तस्येति क्रोष्टा द्विवचने ऋतोङि सर्वनामस्थानयोः ऋकारान्तस्याङ्गस्य
ङि सर्वनामस्थानयोः परतः गुणोभवतीति गुणः उरण्रपरः इति रपरः सर्वनामस्था
नेचसंबुद्धावित्यपिप्रकृत अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्
अप्तादीनामङ्गानां उपधायादीर्घोभवति संबुद्धिवर्जिते सर्वनामस्थानेपरतः क्रो

© Dharmartha Trust J&K. Digitized by eGangotri

ऊं॰ पा॰ ४४
९५

ष्टारौ क्रोष्टारः। संबुद्धौ तृज्वद्भावो न भवति काकपक्षवत् हे क्रोष्टो हे क्रोष्टारौ। हे क्रो
ष्टारः। क्रोष्टारं क्रोष्टारौ शसि ह सर्वनामस्थानत्वात्काकपक्षवत् क्रोष्टून् तृतीया
दिष्वजादिषु विभाषा। तृतीयादिष्वजादिषु परतः क्रोष्टुशब्दो विभाषया तृज्वद्भ
वति यत्र तृज्वद्भाव। तत्र यणादेशः यत्र न तृज्वत्कार्यं नास्ति तत्र काकपक्षवत् क्रोष्ट्रा
वा क्रोष्टुना क्रोष्टुभ्यां क्रोष्टुभिः क्रोष्ट्रे वा क्रोष्टवे क्रोष्टुभ्यां क्रोष्टुभ्यः ङसिङसोस्तृ
ज्वभाव पक्षे क्रोष्टुपक्षे ऋत इत्यधिकृते ङसिङसोश्चेति वर्तमाने ऋत उत्। ऋकारांतात्
ङसिङसोरिति परतः पूर्वपरयोः स्थाने उकारो भवति स च तत्र रपर इति परतः।
संयोगांतस्य लोप इत्यपि ह्यात्। रात्सस्य। रेफात्परस्य सकारस्य लोपो भवति रेफ
स्य विसर्गः क्रोष्टुः वा क्रोष्टोः क्रोष्टुभ्यां क्रोष्टुभ्यः षष्ठ्येकवचने तथैव हि क्रोष्टुः वा
क्रोष्टोः द्विवचने क्रोष्ट्रोः वा क्रोष्ट्वोः बहुवचने ऽयमपि विप्रतिषेधे परं कार्यं भवतीति प
रत्वात्तृज्वद्भावे प्राप्ते नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन इत्यस्य तृज्वद्भा
वं बाधित्वा नुडेव भवति नामीति दीर्घः क्रोष्टूनां सप्तम्येकवचने ऋतो ङिसर्वनामस्थानयोरि
ति गुणः क्रोष्टरि क्रोष्टौ क्रोष्ट्रोः क्रोष्टुषु प्राग्वत्सप्तम्ययोरिति विशेषः ॥ ऋकारांतः
पुल्लिंगः हलष्टशब्दः। सर्वावाचाष्टहृपपनात् सप्तम्येकवचने ऽत्यस्माद्वालोः द्विवि

ऊं॰ ४४

नः अग्र इति स्थिते पूर्ववत् उवंधलोपः तथैव दांतसंज्ञायां ततोपपदे सप्तमीस्थं खल
पू इत्युपपदे खलं पुनातीति विग्रहे । क्विप् च । सर्वधातुभ्यः क्विप्प्रत्ययो भवति अनु
बंधलोपः पूर्ववत् तथैव समासः प्रातिपदिकत्वात् स्याद्युत्पत्तिः सौ खलपूः हिव
वनादिपूजादि च अविसर्गधातुरूपं बाध्यादिग्रहणात् इति उवङादेशं बाधित्वा । ओः सु
पि । धातोरवयवः संयोगः पूर्वो यस्मादुवर्णान्नास्ति तदंतस्यानेकाचोंगस्य यणादे
शो भवति अजादौ सुपि परतः । हलादावविशेषः । खलप्वौ खलप्वः हे खलपूः
हे खलप्वौ हे खलप्वः खलपूं खलप्वौ खलप्वः खलप्वा खलपूभ्यां खलपूभिः ख
लप्वे खलपूभ्यां खलपूभ्यः खलप्वः खलपूभ्यां खलपूभ्यः खलप्वः खलप्वां खलप्वि
खलप्वोः खलपूषु एवं यवल्वादयः । प्रतिभूशब्दस्य भेदः । स च अन्यपूर्वाङ्गवतेः
द्विधेतः भू सत्तायां भू इति धातुः सत्तायामर्थे वर्तते । भू इति स्थिते निरनुनासिकत्वा
न्नकारस्येत्संज्ञा न भवति तथैव धातुसंज्ञायां प्रतिशब्दप्रयोगः उपसर्गसंज्ञा न तयोः नवते
क्विप्प्रत्ययो भवति संज्ञायामंतरे च गम्यमाने इति क्विप् शेषं पूर्ववत् समस्तत्वात् प्राति
पदिकसंज्ञायां स्याद्युत्पत्तिः सौ प्रतिभूः धनिकाधमर्णयोः अन्तरे यस्तिष्ठति स प्रति
भूः इति उच्यते दरिद्राजामचीजामेकाचं च विदेर्जिरे ऊर्णोतेरण्यहंतानां स्मर्यते नन

© Dharmartha Trust J&K. Digitized by eGangotri

हं· पा· २५
25

यालोपः द्विवचनादिष्वजादिषु ओः सुपीति यणादेशे प्राप्ते न भूसुधियोरिति प्रति
षेधात् अचि श्नुधातुभ्रुवां य्वोरियङुवङावित्यादिना उवङादेशः प्रतिभुवौ प्रतिभुवः संबोधने हे
प्रतिभूः हे प्रतिभुवौ हे प्रतिभुवः प्रतिभुवं प्रतिभुवौ प्रतिभुवः प्रतिभुवा प्रतिभू-
भ्यां प्रतिभूभिः प्रतिभुवे प्रतिभूभ्यां प्रतिभूभ्यः प्रतिभुवः प्रतिभूभ्यां प्रतिभूभ्यः प्र
तिभुवः प्रतिभुवोः प्रतिभुवां प्रतिभुवि प्रतिभुवोः प्रतिभूषु एवं स्वयंभूप्रभृतयः
ऋकारान्तः पुंलिंगः पितृशब्दः पितृ इति स्थिते तेनैव स्याद्युत्पत्तिः ऋदुशनस्
पुरुदंसोनेहसां च इति ऋकारस्य अनङादेशः एवं वर्णानुबंधलोपः हल्ङ्यादिलो
पश्च। सर्वनामस्थाने चासंबुद्धाविति नोपधाया दीर्घः नलोपः प्रातिपदिकान्तस्ये
ति नलोपः पिता। अन्यस्मिन्सर्वनामस्थाने संबुद्धाविति नोपधाया दीर्घः नलोपः
प्रातिपदिकात् ऋतो ङिसर्वनामस्थानयोः इति गुणप्रसक्तत्वात् अप्तृन्तृजित्या
दिना दीर्घो न भवति। पितरौ पितरः संबुद्धौ पितृ स् इति स्थिते संबुद्धिलोपे प्राप्ते ऋ
तो ङिसर्वनामस्थानयोरिति गुणश्च प्राप्ते परत्वान्नित्यत्वाच्च ऋतो ङीत्यादिना गुणः रा
त्सस्येति सलोपः रेफस्य विसर्जनीयः हे पितः हे पितरौ हे पितरः पितरं पितरौ शसि
त्वसर्वनामत्वात् गुणाभावः एवं सवर्णदीर्घः नत्वं च पदान्तस्येति णत्वाभावः पितॄन् ऊं· २५

© Dharmartha Trust J&K. Digitized by eGangotri

तृ पित्रा पितृभ्यां पितृभिः पित्रे पितृभ्यां पितृभ्यः । ङसिङसोरुस्ऋतस्तत् । ऋका
रान्तादुत्तरयोः ङसिङसोरतिपरतः एवंपरयोः स्थाने उकारादेशो भवति । इतिन
त्वं तस्मात्परः इति नकारः ऽन्त्यस्येति सलोपः पितुः पितृभ्यां पितृभ्यः पितुः पित्रोः
पितृषु एवं भ्रातृ पितृनयः । नृशब्दस्य षष्ठीबहुवचने । ऋदन्तस्य भययाभवति उ
ति विकल्पेन दीर्घः नृणां वा नृणां । वार्तशाहस्यात्तजनतस्य भेदः । इहात्रकाणी
इडुहान्नः अवितनडुवः जिडुडुत्येते समुदायाः आदितोवर्तमानाद्यत्संज्ञाभवं
ति इति इत्संज्ञानस्य लोपः प्रयोजनं डितः क्तिरिति विशेषणे जकारलोपः प्रयोजनं
एवं वत्तु भूवादयो धातवः इति धातुसंज्ञायां धातोरित्यधिकृत्य एतु ल्पवो । सर्वधातु
भ्यो वाल्लृवो भवतु इति कार्तेरित्वं वकारलोपः प्रयोजनं नजकाभ्याकर्तरीति विशे
षणं आर्द्धधातुकं शेषः इत्यार्द्धधातुकसंज्ञायां आर्द्धधातुकस्येड्वलादेरित्यइडागमे
नेडिषकृतो न्यपिव्हात्प्रकाचउपदेशे नुदात्तात् उपदेशावस्थायां यो धातुरनेकाच्
अनुदात्तश्च तस्मादुत्तरस्यार्द्धधातुकस्य इडागमो न भवति इति प्रतिषेधः मिदः गुण
इत्यधिकृत्य सार्वधातुकार्द्धधातुकयोः । सार्वधातुके आर्द्धधातुके च परतः इगन्त
स्याङ्गस्य गुणो भवति इति रकारस्य अकारः स च परतः अचेरहाभ्यात्व । रश्चहश्वाहो

© Dharmartha Trust J&K. Digitized by eGangotri

तृ॰ पा॰ २९ 26

अवतनवेषौ घौरेपदूकारौनाम्याउनरस्यपरःस्वेरूपेभवतइतिइकारस्यद्विवचनं वा
च्छेइतिस्थितेस्देतत्वात्गतिपरिसंज्ञायांस्याकृत्यत्रिः मनोऋडुनसुहरेसोनेहमै
चेतिअनुङादेशः अप्तृन्नित्यादिनादीर्घः नलोपः वार्तीसर्वनामस्थानेसर्वत्रगु
णोदीर्घौकर्तारौकर्तारः संबोधनेहेकर्तः हेकर्तारौहेकर्तारः कर्तारंकर्तारौकर्तॄ
न् अन्यत्रपितृशब्दवत् कर्त्राकर्तृभ्यांकर्तृभिः कर्त्रेकर्तृभ्यांकर्तृभ्यः कर्तुःकर्तृ
भ्यामाम्नकर्तृभ्यः कर्तुः कर्त्रोः कर्तॄणांकर्तरिकर्त्रोः कर्तृषुएवंभर्तृहर्तृनेतृप्रभृ
तयः । ऋकारान्तः ऌकारान्तः एकारान्ताश्चाप्रसिद्धाः । ओकारान्तः पुंलिंगः गो
शब्दः गोइतिस्थितेतथैवस्याद्युत्पत्तिः इतोत्सर्वनामस्थानेइत्यपिकृत्येगोतो
णित् । गोशब्दात्परंसर्वनामस्थानंणिद्भवति । अचोञ्णितीतिओकारस्य
औकारोवृद्धिः नत्वंविसर्गः गौः अन्यत्रआवादेशः गावौगावः संबोधनेहेगौः
हेगावौहेगावः वाम्ध्यापिशब्देत्यपिकृत्य । औतोःअमसो । ओतः अः अमसोः
परतः एवंपरयोराकारादेशोभवति गाम्गावौगाः अन्यत्रअवादेशः ।
गवागोभ्यांगोभिः गवेगोभ्यांगोभ्यः पंचमीषष्ठ्येकवचनयोः ङसिङसोश्चेतिएङः ओ॰
पूर्वपरत्वं गोः गोभ्यांगोभ्यः गोः गवोः गवांगविगवोः गोषु ओ इतिकेचित् इति २९

© Dharmartha Trust J&K. Digitized by eGangotri

वचनात् द्योशब्दस्यापि सं सवर्णस्यानेनाऽभवति द्यौः द्यावौ द्यावः द्यां द्यावौ
द्यावः द्यवा द्यत्वं द्योभिः द्यवे द्योभ्यां द्योभ्यः द्योः द्योभ्यां द्योभ्यः द्योः द्यवोः द्यवां द्यवि द्य
वोः द्योषु । एकारान्तः पुंलिंगः रैशब्दः रैः इति स्थिते तेन भयत्रापि प्रथमैकवच
ने । रा । शोभनाय स्यति यहे राःपश्चितेपरागवत्सरे । साक्षाद्रागात्समासः स
हसुपाव्ययीभावः विभाषा शेषो बहुव्रीहिरित्यपि सूत्रं । अनेकमन्यपदार्थे
अनेकं सरं तं समर्थं संगनार्थं अन्यस्य पदस्यार्थे वर्तमाने विभाषा सुपा सह सम
स्यते बहुव्रीहिसंज्ञकश्च समासो भवति सचसमर्थः पदविधिरिति समर्थानां
मेव भवति द्वितीयादिना समासश्च प्रातिपदिकत्वात् सुपो धातुप्रातिपदिकयोः
रिति सुपो लुक् अनेकमिति प्रथमानिर्दिष्टत्वात् उपसर्जनत्वे ऽद्ययोरपि विशे
षणस्य पूर्वनिपाते प्राप्ते । सप्तमीविशेषणे बहुव्रीहौ । सप्तम्यन्तं विशेषणं च बहु
व्रीहौ समासे पूर्वं प्रयोक्तव्यमिति सूत्रं पूर्वनिपातः रा इति स्थिते स्यादयस्त्रिः
अष्टन आ विभक्ताविति सूत्रं । रायो हलि । रैशब्दस्य आकारो भवति हलादौ
विभक्तौ परतः अन्यत्र ङः आदेशाः राः रायौ रायः राया राभ्यां राभिः राये
राभ्यां रायः । राभ्यो राभ्यः रायः रायोः रायां रायि रायोः रासु ।

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰ पं॰ २२
27

औकारांतः पुंलिंगः ग्लौशब्दः । तस्यच । रौस्यावादेशः ग्लौः ग्लावौ ग्लावः संबो-
धने हे ग्लौः हे ग्लावौ हे ग्लावः ग्लावं ग्लावौ ग्लावः ग्लावा ग्लौभ्यां ग्लौभिः ग्लावे ग्लौ-
भ्यां ग्लौभ्यः ग्लावः ग्लौभ्यां ग्लौभ्यः ग्लावः ग्लौभ्यां ग्लौभ्यः ग्लावः ग्लावोः ग्लावां ग्ला-
वि ग्लावोः ग्लौषु । इति अजंताः पुंलिंगाः समाप्ताः ॥ अथ अजंताः स्त्रीलिंगा उच्यंते ।
अत्र अकारांतः स्त्रीलिंगो अप्रसिद्धः आकारांतः स्त्रीलिंगो जायाशब्दः डाज्ञियते जा-
य इति स्थिते प्रातिपदिकसंज्ञायां प्रत्ययः परश्च आप् प्रातिपदिकात् स्त्रियामिति वर्त-
माने । अजाद्यतष्टाप् अजादेर्गणात् अदंतात् प्रातिपदिकात् स्त्रियां टाप्प्रत्ययो भ-
वति पकारलोपः प्रयोजनं आबिति सामान्यग्रहणं टकारलोपः सामान्यग्रहणा-
विघातार्थः अन्यथा हि पकारानुबंधकग्रहणे न अनुबंधकस्य ग्रहणमिति अः अग्रह-
णेन डाब्चापोर्ग्रहणं न स्यात् सवर्णे दीर्घः इनः आबंतत्वात् ङ्याप्प्रातिपदिकादिति
वर्तमाने स्वौजसमौडित्यादिना स्वाद्युत्पत्तिः जाया आबंतत्वात् हल्ङ्याब्भ्य इति सुलो-
पः जाया । द्विवचने जाया औ इति स्थिते । जसः शी इति वर्तमाने औङ आपः । आब-
न्तादंगादुत्तरस्य औङः शी इत्ययमादेशो भवति । शकारलोपः प्रयोजनं आङ्शीत्वं- डो॰ २३
योत्त्रमिति विशेषणं औङ इति प्रथमाद्वितीयाद्विवचनयोः एवोचार्यसंज्ञा आद्गुणः

© Dharmartha Trust J&K. Digitized by eGangotri

जायेजसिजाया अस इति स्थिते प्रथमयोः पूर्वसवर्णो इति दीर्घत्वे प्राप्ते। नादिचि। इ उः
न्यपि दधाति। दीर्घाज्जसि च। दीर्घात् इचि जसि परतः पूर्वपरयोः स्थाने। पूर्वसवर्ण
दीर्घो न भवति सवर्णदीर्घः सत्वविसर्गौ। संबुद्धौ बहुवचने गतत्वात् आङि चाप इति
वर्तमाने। संबुद्धौ च। संबुद्धौ परतः आबन्तस्याङ्गस्य एकारादेशो भवति। एङ्ह्र
स्वात्संबुद्धेरिति सलोपः। हे जाये हे जाये हे जायाः जायां जाये जायाः स्त्रीलिंगत्वात
त्वाभावः तृतीयैकवचने बहुवचने गतत्वात् ओसि चेत्यपि वर्तते आङि चापः। आ
ङिति तृतीयैकवचनस्य पूर्वाचार्यसंज्ञा। आङि च। ओसि च परतः आबन्तस्याङ्गस्य
एकारादेशो भवति। अयादेशः जायया जायाभ्यां जायाभिः चतुर्थ्येकवचने जाया ङे इति
स्थिते। येडिंतीति वर्तमाने याडापः आबन्तादङ्गादुत्तरस्य ङिद्वचनस्य याडागमो
भवति वृद्धिरेचीत्यपि वर्तते आटश्च। आटः अचि परतः पूर्वपरयोः स्थाने वृद्धिरे
कारादेशो भवति। जायायै जायाभ्यां जायाभ्यः। पंचम्येकवचन षष्ठ्येकवचनयोः
ङित्त्वाद्याडागमो वृद्धिश्च। जायायाः जायाभ्यां जायाभ्यः जायायाः ओसि च। आङि
चापः। अयादेशः। जाययोः आमि ह्रस्वनद्यापो नुट्। इति आबन्तत्वात् नुट् जाया
नाम सप्तम्येकवचने। ङेराम्नद्याम्नीभ्यः। नद्यन्तादाबन्तान्नीशब्दाच्चोत्तरस्य ङेः आमादे

© Dharmartha Trust J&K. Digitized by eGangotri

तृं॰ ग्यो भवति याडागमः जायायाः जायायोः जायासु । एवमनयोरामण्यावेतानां ग्रा॰
पा॰ लाखट्वादीनां रूपनयः राजन् बहुराजन् इति स्थिते अत्रीभ्यो ङीति तितिदो आद्येन
२८ बहुस्याबादिभ्यते नमः इत्यपि ह्रस्व इनुभात्यामन्यतरस्यामनंतात्प्रातिपदिकाद्बहु
२८ नंतास्तु बहुव्रीहेः स्त्रियां ङाप्प्रत्ययो भवति अन्यतरस्याल्लकारलोपः प्रयोजनं ।
डितीति विशेषणं इयविभं यकारादेशः जाते स्यातेच सर्वनामस्थाने च परतः ।
एवं यं भसंज्ञे अंगस्य भस्य अल्लोपोऽनः नोविंशति ञितीत्यपि ह्रस्व । रेःङि अन्तु यव
र्भसंज्ञस्यांगस्य रूपो भवति स्याच्च त्यादिः रामा बहुराजा बहवो राजानो यस्यां न
गतां यतिविगृह्या भेदे ग्राह्य वत बहुव्रीहौ कृते इ यकारे न्यः उमत्स्यांप इति स्थिते
उमत्स्यांपेर प्रत्ययोमिति विस्तृत्य तद्धितः समर्थानां प्रथमाद्वा अचेऽस्यतेन उ
त्यपिह्राति तस्यापत्ये तस्येति षष्ठी समर्थादपत्यमित्येतस्मिन्नर्थे तथा विहिते
प्रत्ययो भवतीति गोत्रेऽयः प्रत्ययो भवतीति णकारः अवेणीतीति अर्थः तद्धित इ
ति तद्धितसंज्ञायां हान्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञा नत्तस्य पो धातु प्रातिपदिक॰
योरिति सेल्लुक् मृजेर्वृद्धिः अचोञ्णितीत्यपि ह्रस्व तद्धितेष्वचामादेः स्थाने वृद्धि उं॰
र्भवति उकारस्याकारो वृद्धिः एवं च भसंज्ञायां अंगस्य भस्य नस्तद्धिते टिलोपः । २८

© Dharmartha Trust J&K. Digitized by eGangotri

इति विहितात् प्रत्ययस्येति च । अंगस्य इवर्णोवर्णयोः लोपो भवति भसंज्ञायां निमित्ते तद्धि
त प्रत्यये परे ह्यकार प्रत्ययं च परतः । कौ श्रुहगवाह्य इति स्थिते संयोगे गुरुसंज्ञायां ।
निमित्तं तद्धित प्रत्यये परे हकार प्रत्ययं च परतः । कौ श्रुहगवाह्य इति स्थिते संयोगे
गुरुसंज्ञायां ह्रस्वमतरं गुरुसंज्ञं भवति संयोगे परतः । इति गुरुसंज्ञायां । अणि
नाराणयोः श्रुहपेत्वमयोत्थ्यं गोमगेति विहितो यावणिनो श्रुहपेत्वमोपत्याः
र्थवाचिनो भयष्यञ्जरे यो भवतः । अथ विशुपो ईडत्वम याह्वन् प्रत्ययी नामत्व
माहतत्वसम्यस्वपोत्वमम । यः प्रत्ययस्यादिभूतः षकारः षसंज्ञको भवति ।
प्रयोजनं ष्यञ संप्रसारणं पत्यापत्यो स्त्रीरूपषड् इति विशेषणं ङकारलोपः प्र
योजनं । षड्ष्या स्त्रेत्यमान्यवकारणं यङ्ष्याप्र यङंतात्यातिपदिका ष्याप्र
त्ययो भवति । स्त्रियाधिकारः एवंवत् वकारः पित इति स्वार्थः सवर्णदीर्घः कौ
श्रुहगंध्य इति स्थिते स्याद्यान्त्वात् तिः कौ श्रुहगंध्य त्येवमादीनां जायामाहवत् रूपनयः
जरायाहः स्य । रावतस्य अविविशेषः हलादौ सर्वत्र जायामाहवत् अचि विभ
क्त्यधिकारात् अजादौ तु जराया जरसन्यतरस्यां विकल्पेन । जरा । जरसौ । वा
जरे । जरसः वा जरा । हे जरे हे जरसौ हे जरे हे जरसः वा हे जराः जरसं जरसौ वा ज

© Dharmartha Trust J&K. Digitized by eGangotri

रू॰
पा॰
२१
21

दे। जरसः जरसा वा जरया जराभ्यां जराभिः जरसे वा जरायै जराभ्यां जराभ्यः
जरसः वा जरायाः जराभ्यां जराभ्यः जरसः वा जरयाः जरसोः वा जरयोः जरसां
वा जराणाम् जरसि वा जरायां जरसो वा जरयोः जरासु ॥ सर्वनामसंज्ञानामत्र
ङसंख्येतव्याप् इति ङापि कृते जायाशब्दवद्रूपनयः। अकारादेर्गणाद्दकारान्तात्स्त्री
प्रत्ययो भवति। सर्वा सर्वे सर्वाः सम्बोधने हे सर्वे हे सर्वे हे सर्वाः सर्वां सर्वे स
र्वाः सर्वया सर्वाभ्यां सर्वाभिः ङे ङिः याडापः इत्यादिकृतस्य सर्वनाम्नः स्याड्ड्र
स्वश्च। आबन्तात्सर्वनाम्नः परस्य विडिवचनस्य ङागमो भवति आबन्तस्य ह्र
स्वश्च याटोऽपवादः सर्वस्या इति स्थिते आट्श्चेति वृद्धिः सर्वस्यै सर्वाभ्यां सर्वा
भ्यः सर्वस्याः सर्वयोः आमि सर्वनाम्नः सुडिति सुडागमः सर्वासां सर्वस्यां सर्व
योः सर्वासु। एवं विश्वादीनामन्तरशब्दपर्यन्तानां रूपनयः। प्रथमादीनां त
समानां जायाशब्दवत् द्वितीयात्तृतीयाशब्दयोस्तु ङिति विभाषा द्वितीयायै द्विती
याभ्यामिति विकल्पेन स्याड्विधानात् पक्षे रूपभेदः द्वितीयस्यै वा द्वितीयायै द्विती
यस्या वा द्वितीयायाः द्वितीयस्याः वा द्वितीयायाः द्वितीयस्यां वा द्वितीयायाम्।
एवं तृतीयाशब्दः। उत्तरपूर्वादिशब्दानां शब्दयोनच विभाषा दिक्समासे। रा॰ २१

© Dharmartha Trust J&K. Digitized by eGangotri

बहुव्रीहौ इत्यनेन सूत्रेण विकल्पेन सर्वनामसंज्ञा। तेन उत्तरपूर्वस्यै वा उत्त
रपूर्वायै दक्षिणपूर्वस्यै वा दक्षिणपूर्वायै। एवं पंचमीषष्ठीसप्तमी। एकवच
नेष्वहाहार्यं। इकारान्तः स्त्रीलिंग रुचिशब्दः। अस्यैव सर्वाप्रक्रियात्वग्निः प्रथमाद्वि
तीययोः कविशब्दवत्। रूपं रुचिः रुची रुचयः संबोधने हे रुचे हे रुची हे रुच
यः रुचिं रुची रुचीः स्त्रीलिंगत्वान्नत्वाभावः तृतीयैकवचने घिसंज्ञायामपि।
आङो नास्त्रियामिति अस्त्रियामिति स्त्रियामिति प्रतिषेधात् नाभावो न भवति
रुच्या रुचिभ्यां रुचिभिः। ङिद्वचने नदू स्त्र्याख्यौ नदी नेयुवङ्स्थानावस्त्री। वा
मीत्यनुवर्तमाने। ङिति ह्रस्वश्च। एषां संबंधी ह्रस्वस्त्र्याख्यः इयुवङ्स्था
नौ च। सू। वा नदीसंज्ञो भवतः ङित्प्रत्यये परतः स्त्रीशब्दं वर्जयित्वा। यत्र नदी
संज्ञा तत्र आण्नद्या इति आडागमः आटश्चेति वृद्धिः यत्र न नदीसंज्ञा तत्र क
विशब्दवत् रुच्यै वा रुचये रुचिभ्यां रुचिभ्यः रुच्याः वा रुचेः रुचिभ्यां रुचिभ्यः
रुच्याः वा रुचेः रुच्योः रुचीनां सप्तम्येकवचने। ङेराम्नद्याम्नीभ्य इति ङेः आम् रु
च्यां रुचौ रुच्योः रुचिषु। एवं कृतिहानियुवतिमतिप्रभृतयः। द्विशब्दस्य
भेदः। तथैव द्वित्वात् द्विवचनं द्वे इति स्त्रियां त्यदादीनामः इति। इकारस्य

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰ पा॰ ३० 30

यकारः अजादिरुक्षावितिज्ञं । अन्यत्सायायापूर्ववत् द्वे द्वे द्वाभ्यां द्वाभ्यां द्वाभ्यां
द्वयोः द्वयोः ॥ त्रिशब्दस्य भेदः । त्र्यादयस्त्रिः बहुत्वाद्बहुवचनमेव भवति । १
त्रिचतुरोः स्त्रियां तिसृचतसृ । त्रिचत्वार् इत्येतयोः स्त्रियां वर्तमानयोः तिसृचत
सृ आदेशौ यथाक्रमं भवतः अचि रऋतः अजादौ विभक्तौ परतः तिसृचतसृ इ
त्येतयोः ऋकारस्य रेफादेशो भवति । ऋतो ङिसर्वनामस्थानयोरिति जसि गुणा
पवादः प्रथमयोः पूर्वसवर्णः इति प्राप्ते पूर्वसवर्णदीर्घाभावः तिस्रः तिस्रः तिसृ
भिः तिसृभ्यः तिसृभ्यः आमि । तिसृणां । इति स्थिते नुमचिर तृज्वद्भावेभ्यो नुट्
पूर्वविप्रतिषेधेन इति रेफादेशं बाधित्वा नुडेव भवति । न तिसृचतसृ तिसृ
चतसृ इत्येतयोः नामि दीर्घो भवति तिसृणां तिसृषु ॥ ईकारान्तः स्त्रीलिङ्गः
कर्त्रीशब्दः ॥ कर्तृ इति स्थिते । स्त्रियामिति वर्तमाने । ऋन्नेभ्यो ङीप् । ऋकारान्ते
भ्यश्च नान्तप्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति ङकारलोपः प्रयोजनं ङीप्ङीनो
सामान्यग्रहणार्थं पकारः स्वरविधानार्थः यणादेशः कर्त्री इति स्थिते स्वौजसमौट्
हल्ङ्याब्भ्यः हल्ङ्यादिलोपः कर्त्री औ जसोः नादिचीत्यपि प्राप्ते । दीर्घाज्जसि च । दीर्घा ङः
जसि इति अपरतः पूर्वसवर्णदीर्घो न भवति । इति पूर्वसवर्णदीर्घप्रतिषेधे यण ३०

हे भ्रूः कर्त्रीकर्त्र्यः संबुद्धौ ह्रस्वस्यागमो न स्यात् ॥ ईदूदव ॥ नेयुवस्थाविभक्तिष्वेकं ति
हे भ्रूः ईकारान्तस्य वाचकान्तं च ह्रस्वास्य एकं दृष्टं रूपं तत्र दीसंज्ञं भवति तस्मात्तथा ॥ प्र
वत्तानेभ्योऽन्यस्त्वः ॥ प्रबाध्यानां नदीनां तत्तानां च ह्रस्वो भवति संबुद्धौ परतः एङ्ह्रस्वा
त्संबुद्धेरिति सलोपः हे कर्त्रि हे कर्त्र्यौ हे कर्त्र्यः कर्त्रीं कर्त्र्यौ कर्त्रीः कर्त्र्या कर्त्रीभ्यां
कर्त्रीभिः ङिद्वचने एवं वर्त्तते दीसंज्ञायां । ये ङिनीति अनुवर्त्तमाने । आतो याः । न
द्यन्तात् लिङ्गाद् ङानस्य ङिद्वचनस्य आडागमो भवति आङ्ग्रेति वृद्धिः कर्त्र्यै कर्त्रीभ्यां
कर्त्रीभ्यः कर्त्र्याः कर्त्रीभ्यां कर्त्रीभ्यः कर्त्र्याः कर्त्र्योः ह्रस्वनद्यापो नुट् कर्त्रीणां ङे
रन्नद्याम्नीत्य इति ङेराम् कर्त्र्यां कर्त्र्योः कर्त्रीषु ॥ एवं टिङ्नीप्रत्ययान्ताः तथा पट्
इत्येवमादयः स्त्रीविवक्षायां ॥ अन्यतो ङीष् इत्यधिकृत्य । वोतो गुणवचनात् ।
उकारान्तात् गुणवचनात् प्रातिपदिकात् वा ङीष्प्रत्ययो भवति स्त्रीविवक्षायां पट्वी
इत्योकारान्ते पट्वीत्यादयः कर्त्रीवत् ॥ तथैव शार्ङ्गरवाद्य इत्येवमादयः ॥ शार्ङ्गरवाद्य
न्योङीन् ॥ शार्ङ्गरवाद्य इत्येवमादयः अञन्तेभ्यश्च स्त्रियां ङीन्प्रत्ययो भवति नकार
स्वरार्थः ॥ यस्येति च ॥ इति अकारलोपः शार्ङ्गरवी कर्त्रीवत् ॥ भवत् इति स्थि
ते ॥ उकारलोपः प्रयोजनं तु उगितश्चेति उगित्कार्यार्थं ॥ उगितश्च ॥ उगितः प्रा

© Dharmartha Trust J&K. Digitized by eGangotri

हे॰ पा॰ ३२
31

तिपरिकात् स्त्रियांङीप् प्रत्ययोभवतिस्याद्यन्तानि ॥ भवतीवाचीवत्त्रूपनयः
नगितत्त्वापि ॥ याचंतानांङीप्प्रत्ययेद्रूपभेदः ॥ याश्रापणोवइतिस्थितेसर्ववच्चात्तु
संज्ञायांविवक्षावशात् धातोरित्यपिह्यात्य ॥ वर्तमानेलट् । प्रारब्धोपरिसमाप्त
श्चवर्तमानःकालः तस्मिन्वर्तमानेकालेवर्तमानाद्धातोःलट्प्रत्ययोभवतिङका
रलोपःप्रयोजनंतिङात्मनेपदानांटेरे ॥ इतिविशेषणं टकारोविदेशोलदेशाबाद्
तिविशेषणार्थः लटःशानजानचाप्रथमैकाधिकरणे । लटःशत्रुशानचावादे
शौभवतः तौचेदप्रथमासमानाधिकरणेनभवतः तयोरविशेषणसामर्थ्या ॥ लः
परस्मैपदमितिशास्त्रःपरस्मैपदसंज्ञार्था तङानावात्मनेपदमितिआत्मनेपदसंज्ञा
यांशेषात्कर्तरिपरस्मैपदमितिशास्त्रभवतिसचपरस्मैपदप्रथमासमानाधिकरणे
पिलडितिवर्तमाने । पुनःलट्ग्रहणात्भवति अकारःतगित्कार्यार्थः शकारस्तिङ्शि
त्सार्वधातुकमितिसार्वधातुकसंज्ञार्थः ॥ तिङ्शित्सार्वधातुकं ॥ तिङःशितश्च
प्रत्ययाधातुविहिताःसार्वधातुकसंज्ञाभवति । सार्वधातुकेयक इतिवर्तमाने ॥
कर्तरिशप् कर्तृविहितेसार्वधातुकेपरेधातोःशप्प्रत्ययोभवति । पकारःअनुदा
त्तार्थःपित्वादितिस्वरार्थः शकारःसार्वधातुकसंज्ञार्थः ॥ आदिप्रभृतिभ्यःशपः

ऊं॰ ३२

© Dharmartha Trust J&K. Digitized by eGangotri

अदादिभ्योधातुस्यपरस्यशपः लुग्भवति सवर्णेदीर्घः यातु इति स्थिते लङस्त्र
तूस्थानस्थो भवतः लोचेत्यथमासमानपिवर्णेन भवतः छांदसत्वात् प्राति
पदिकसंज्ञायां नगितश्चेत्यङीप् अनुबंधलोपः एवं वत् वानउकस्येति वर्त
माने ॥ आद्येनयोत्वं अवर्णान्ताद्गा इत्यनेमिनुभवति सकारस्तत्स्थः ङकारः
नश्चुरणार्थः नकारस्य ॥ नश्चापदांतस्य गलि इत्यनुस्वारः अनुस्वारस्य । यथि
परसवर्णः इति परसवर्णे कोनकारः अंतत्वात् स्वाद्युत्पत्तिः यातीयात्यौयात्य
यान्तीयान्त्यौयान्त्यः इत्यादि ॥ भसंज्ञाया ॥ नवान्तः ष्ट इति स्थिते । तथैवशा
पु अनुबंधलोपः एवं वत् नथोवधातुसंज्ञायांतिङ्वर्गेण इत्यधिकृत्य । सा
र्वधातुकार्धधातुकयोः । सर्वधातुके आर्धधातुके च परतः इगन्तस्यांगस्य गु
णो भवति ॥ इको गुणवृद्धी ॥ अनिर्दिष्टस्थानिके ये गुणवृद्धी आम्नातलेइक
एवस्थाने भवत इति वेदितव्यं अवादेशः अतो गुण इति पररूपत्वं भवत् इति ।
स्थिते तथैव ङीप् प्रत्ययः शप्श्यनोर्नित्यं ॥ शप्श्यनोर्नित्येनाभ्यान्नवरस्यशातुः
नित्येनुरागमो भवति पीनद्योः परतः अनुबंधलोपः अनुस्वारः अनुस्वारस्य
यथि परसवर्णः स्वाद्युत्पत्तिः हल्ङ्यादिलोपः भवंती भवंत्यौ भवंत्यः इत्यादि ॥

© Dharmartha Trust J&K. Digitized by eGangotri

चं॰ पां॰ ३२ दिवक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिगतिषु ॥ दिवु इति स्थिते उकारः उगिते
वेति विशेषणार्थः तथैव धातुसंज्ञायां लट् तस्य शत्रादेशः ॥ दिवादिभ्यः श्यन्
दिवु इत्येवमादिभ्यो धातुभ्यः श्यन्प्रत्ययो भवति । शपोपवादः । शकारः पूर्व-
32 वत् नकारः जित्यादिर्नित्यमिति विशेषणार्थः वोरुपधाया दीर्घ इति वर्तमाने ॥
हलि च । रेफवकारान्तस्य धातोः उपधायाः इको दीर्घो भवति अस्य परस्य दीर्घः ।
दीव्यत् इति स्थिते । श्यन्पूर्वनोतिस्य इति नित्यं नुमागमः स्वाद्युत्पत्तिः दीव्यन्ती ।
दीव्यन्तौ दीव्यन्त्यः अन्यत्सर्वं शतृवत् एवमन्यत्रापि यत्र तत्र लहयविशेषात् श-
ब्दानां रूपभेदो द्रष्टव्यः ॥ लक्ष्मीशब्दस्याङ्गत्वात् सुलोपो नास्ति । लक्ष
दर्शनाङ्कनयोः । अयिन्नुम्लट्तिङ्भ्यइत् इति वर्तमाने । लक्षेर्मुट् च । लक्षधातो दे॰
रीत्प्रत्ययो भवति मुडागमश्च अन्यत्सर्वं शतृवत् । लक्ष्मीः लक्ष्म्यौ लक्ष्म्यः ।
एवं तरीः स्तरीः तन्त्रीः ॥ स्त्रीशब्दस्यापि भेदः ॥ ष्ट्यै स्त्यै शब्दसंघातयोः ष्ट्यै शब्द
संघातः तयोः स्त्यै इति स्थिते तथैव शत्वादयो धात्वादेः षः सः इति धातुसंज्ञायां अदेच उपदे-
शेऽशिति इति आभ्यां स्त्यायेति स्थिते ॥ संस्त्याने स्त्यायतेर्ड्रट् ॥ संस्त्याने स्त्र्यर्थे स्त्यायते चं॰
र्धातोः ड्रट्प्रत्ययो भवति डकारः टिलोपार्थः टकारः टित्कार्यार्थः डावितिटिलोपः ३२

© Dharmartha Trust J&K. Digitized by eGangotri

लोपोव्योर्वलीति यलोपः । स्त्र इति स्थिते टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वर
पः ख्युनः इति ङीप् अनुबंधलोपः यचि भमिति पूर्वस्य भसंज्ञायां यस्येति च ङेलोपो क
द्रु इत्यपि हत्य इवर्णस्यावर्णस्य च लोपो भवति ई प्रत्यये भसंज्ञानिमित्ते तद्धिते च परे ।
स्त्री इति स्थिते अतद्धातुत्वात् स्वाद्युत्पत्तिः । सुलोपश्च ॥ स्त्री ॥ अजादौ विभक्तौ स्त्रियः
स्त्रीशब्दस्य इयङादेशो भवति । अजादौ विभक्तौ परतः स्त्रियौ स्त्रियः संबुद्धौ नेयङुव
ङ्स्थानावस्त्री इति नदीसंज्ञा प्रतिषेधाभावात् पूर्ववत् ह्रस्वलोपौ । हे स्त्रि हे स्त्रियौ हे स्त्रि
यः । अमि । शसि च ॥ वाम्शसोः ॥ स्त्रीशब्दस्य वा इयङादेशो भवति अमि शसि च
परतः स्त्रियं वा स्त्रीं स्त्रियौ स्त्रियः वा स्त्रीः स्त्रिया स्त्रीभ्यां स्त्रीभिः ङिद्वचनेष्वाडागमः ।
इयङादेशो वृद्धिश्च । स्त्रियै स्त्रीभ्यां स्त्रीभ्यः स्त्रियाः स्त्रीभ्यां स्त्रीभ्यः स्त्रियाः स्त्रियोः स्त्री
णां स्त्रियां स्त्रियोः स्त्रीषु ॥ श्रीशब्दस्य भेदः ॥ श्रिञ् सेवायां श्रिञ् इति स्थिते । ञ
कारलोपः । तथैव धातुसंज्ञायां क्विप् यवि । अश्रिश्रिडुस्वाप्रुजे दीर्घो असंप्रसारणं चेति
क्विप् अनेनैव च दीर्घः संप्रसारणाभावश्च अनुबंधलोपादि पूर्ववत् श्री इति स्थि
ते हलन्तत्वात् स्वाद्युत्पत्तिः सौ श्रीः अन्तत्वाभावात् हलोपो नास्ति अजादौ विभ-
क्तौ अचि श्नुधातु इवर्णोवर्णयोरियङुवङाविति इयङादेशः श्रियौ श्रियः श्रिया श्रीभ्यां श्री

© Dharmartha Trust J&K. Digitized by eGangotri

सा॰
पा॰
३२
33

यिः ङिद्वचनेनेयुवस्थानावस्त्रीति नदीसंज्ञाप्रतिषेधोपि ॥ वामि ॥ ङिति । स्त्र्याख्य
श्च ॥ योसंबंधी ङस्याः स्त्र्याख्यौ इयुवस्थानौ च । एवान नदीसंज्ञो भवति इति यत्र न
दीसंज्ञा तत्र आडागमः ह्रस्वश्च । अन्यत्र इयङादेशः । श्रियैवा श्रिये श्रीभ्यां श्रीभ्यः
श्रियावाः श्रियः श्रीभ्यां श्रीभ्यः श्रियाः वा श्रियः श्रियोः आमि वामि । आड्यावङ्
स्थानौ । स्त्री । वा । नदीसंज्ञौ भवतः आमि परतः नदीपक्षे नुडागमः श्रीणां वा श्रियां
श्रियां वा श्रियि श्रियोः श्रीषु ॥ एवं धीप्रभृतयः स्त्रीलिंगाः ॥ तनुशब्दः ॥ सवशरी
रवाची स्त्रीलिंगः अल्पार्थो त्रिलिंगः ॥ तस्य तु गुरुशब्दवत्प्रक्रिया । तनुः तन्वौ
तनवः हे तनो हे तन्वौ हे तनवः तनुं तन्वौ तनूः तन्वा तनुभ्यां तनुभिः तन्वैवा तन
वे तनुभ्यां तनुभ्यां तनुभ्यः तन्वाः वा तनोः तनुभ्यां तनुभ्यः तन्वावा तन्वोः तनूनां
तन्वांवा तनौ तन्वोः तनुषु ॥ एवमन्येपि ॥ ऊकारान्ताः स्त्रीलिंगोपि जंबूशब्दः ।
तस्यापि वधूशब्दवत्प्रक्रिया । अयं विशेषः असंनत्वात् रुल्लोपो नाबि जंबूः जं
ब्वौ जंब्वः हे जंबु हे जंब्वौ हे जंब्वः जंबूं जंब्वौ जंबूः जंब्वा जंबूभ्यां जंबूभिः जंब्वै जंबूभ्यां
जंबूभ्यः जंब्वाः जंबूभ्यां जंबूभ्यः जंब्वाः जंब्वोः जंबूनां जंब्वां जंब्वोः जंबूषु ॥ एवम
न्येपि चमूवधूप्रभृतयः ॥ स्वयंभूशब्दस्य स्वयंभूशब्दवत्प्रक्रिया ॥ श्रीशब्दवत्प्रक्रिया ॥ न॰

उ॰
३२

वङारेणापवादविशेषः स्रुः स्रुवौ स्रुवः ॥ वर्षाभूशब्दस्य विशेषः ॥ वर्षाभूप्रभृत्यभ
वनः भ्रूवसंज्ञात्वरयोरिति स्त्रियां तथैव स्वाद्युत्पत्तिः सौ वर्षाभूः उवङादेशे विभक्तौ प्रा
प्तेः । ङेः स्वपीति यणादेशः स्यात् । न भूसुधियोरिति प्रतिषेधे प्राप्ते ॥ वर्षाभ्वश्च ॥
वर्षाभूशब्दस्य उवङादेशमपवादत्वः यणादेशो भवति । वर्षाभ्वौ वर्षाभ्वः संबुद्धौ नदी
संज्ञायां ह्रस्वसलोपौ हे वर्षाभु । नत्वेव । नेयुवङ्स्थानावस्त्रीति नदीसंज्ञानिषेधेन
भवति भवत्येनेतद्भाविनियवङ्युवङोः स्थितिः तत्रानेन सूत्रेण प्रतिषेधः इह तु वर्षा
भ्वश्चेति यणादेशकरणात् नवङ्नास्ति तस्मात्तु नदीसंज्ञाप्रतिषेधः हे वर्षाभ्वौ हे
वर्षाभ्वः वर्षाभ्वं वर्षाभ्वौ वर्षाभ्वः वर्षाभ्वा वर्षाभूभ्यां वर्षाभूभिः ङित्वचनेपि तथैव नदीसंज्ञाप्रतिषे
धाभावात् नदीसंज्ञाकार्यं भवति वर्षाभ्वे वर्षाभूभ्यां वर्षाभूभ्यः वर्षाभ्वः वर्षाभूभ्यां
वर्षाभूभ्यः वर्षाभ्वः वर्षाभ्वोः वर्षाभूनां वर्षाभ्वि वर्षाभ्वोः वर्षाभूषु ॥ तथा पुनर्भूः
पुनर्भ्वश्चेति वक्तव्यमिति यणादेशविधानात् । ऋकारान्तः स्त्रीलिंगो मातृशब्दः ॥
मातृ इति स्थिते ऋन्नेभ्यो ङीप् इति ङीपि प्राप्ते न षट्स्वस्रादिभ्यः इति प्रतिषेधः स्वा
द्युत्पत्तिः पितृशब्दवत् रूपनयः मातृ स्त्रीलिंगत्वात्तत्वाभावः माता मातरौ
मातरः हे मातः हे मातरौ हे मातरः मातरं मातरौ मातॄः मात्रा मातृभ्यां मातृभिः

© Dharmartha Trust J&K. Digitized by eGangotri

दु॰
पा॰
३४

३५

मात्रे मातृभ्यां मातृभ्यः मातुः मातृभ्यां मातृभ्यः मातुः मात्रोः मातॄणां मातरि । मात्रोः
मातृषु ॥ एवंदुहितृयातृननयः । स्वसृशब्दस्य तु सर्वनामस्थाने । असृतृञ्जित्यादिना
दीर्घः स्वसा स्वसारौ स्वसारः स्वसारं स्वसारौ । शेषं समानं ॥ अथ एकारांतास्त्वका-
रांता । एकारांता अप्रसिद्धः ओकारांता स्त्रीलिंगः गोशब्दः तस्य पुंलिंगगोशब्दव-
त्प्रक्रिया । ऐकारांतः स्त्रीलिंगः रैशब्दः तस्य पुंलिंगरैशब्दवत्प्रक्रियारूपनयः
इत्यजंताः स्त्रीलिंगसमाप्ताः ॥ अथाजंतान्नपुंसकलिंगाः प्रदर्श्यंते । अकारांताः
तान्नपुंसकलिंगाः कुंडशब्दः कुंड इति स्थिते तथैव स्याद्युत्पत्तिः ॥ स्वमोर्नपुंसकां
दिति लुकि प्राप्ते ॥ अतोम् ॥ अकारांतान्नपुंसकलिंगात् स्वमोः । स्व[illegible]मं इत्येत-
योः अम् इत्ययमादेशो भवति अमि पूर्वः कुंडं द्विवचने कुंड औ इति स्थिते । ङौन आमङः
त्यनुवर्तमाने ॥ नपुंसकाच्च ॥ नपुंसकांतादंगादुत्तरस्यौङः शी इत्ययमादेशो
भवति । अकारलोपः प्रयोजनं आङ्गीत्रयोत्रमिति विशेषणं यचि भमिति एवं स्य
भसंज्ञायां यस्येति चेति अकारलोपे प्राप्ते ॥ न षणि ॥ षणिप्रतिषेधे वक्तव्य इति वचना-
न्न भवति प्राङ्कुणः बहुवचने । जसिशसोः शिः ॥ जसिशसोस्स्थेत्येकं परं एवं वा
द्यं निर्दिष्टात् जसीत्येतस्य ङकारांतस्य ग्रहणं नपुंसकादंगादुत्तरयो ॥ जश्शसोः शि

डॊ
३४

गादेशो भवति । तस्य । शिसर्वनामस्थानं । नपुंसकलिंगात्परं शिइत्येतत्सर्वना
मस्थानसंज्ञं भवति । इति सर्वनामस्थाने चासंबुद्धाविति दीर्घः । कुंडानि । संबु
द्ध्यभावे हलात हल्मात्रस्य मकारस्य पदत्वात्संबुद्धेरिति नेन लोपः । ततः एका
देशविकृतमनन्यवदिति ॥ अमि पूर्वः हे कुंड हे कुंडे हे कुंडानि । द्वितीयायामपि
कुंडं कुंडे कुंडानि पाततो शेषं पूर्ववत् रूपनयः । एवं वन । वदन वचन धना
दयः एवं सर्वनामसंज्ञानामकारांतानां प्रथमाद्वितीययो रूपनयः शेषं पुंलिंगव
त् ॥ डतरादीनामन्यतरशब्दपर्यंतानां प्रक्रियाविशेषो । किंयत्तदोर्निर्धा
रणे डतरच् वा बहूनां जातिपरिप्रश्ने डतमच् एकाच्च । प्राचां अद्ड्डतरादिभ्यः
पंचभ्यः डतरादिभ्यः पंचभ्यः डतर डतम अन्य अन्य । अन्यतर इतर इत्येतेभ्यः
क्लीबयोः स्वमोः । अद्ड् । इत्येतयोः अद्ड् आदेशो भवति । अमोपधायाः डकार
लोपः डितीति विशेषणं टेरिति लोपः वावसानेऽतिचर्त्वं कतरत् कतरद् क
तरे कतराणि । एवमेवं कतमत् कतमद् कतमे कतमानि यतरत् यतरे
यतराणि यतमत् यतमे यतमानि डतरत् डतरे । डतराणि । डतमत् ड
तमे डतमानि इतरत् इतरे इतराणि अन्यत् अन्ये अन्यानि अन्यतरत् ।

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰
पा॰
३५
35

अन्यतरे अन्यतराणि इत्यादिनेयं शेषं ङवत् ॥ एकतरशब्दस्य इतर । अन्ययो
तरत्वात् स्वमोः अद्ड्डादेशे प्राप्ते । एकतरात्सर्वत्र ॥ नेतराच्छन्दसीति ॥ इतरशब्दा
च्छन्दसि स्वमोः अद्ड्डादेशो न भवति । एकतरत्सर्वत्र । एकतरशब्दात्सर्वत्र ।
एकतरशब्दात्सर्वत्र छन्दसि भाषायां च परयोः अद्ड्डादेशो भवति इति सर्वशब्द
वत् रूपनयः एकतरं एकतरे एकतराणि । आकारांतो नपुंसकलिंगः सोमपा
शब्दः ॥ सोमपा इति स्थिते । एवं च समासान्त्यात्प्रातिपदिकसंज्ञायां ॥ ह्रस्वो
नपुंसके । प्रातिपदिकस्य । नपुंसके वर्तमानस्य प्रातिपदिकस्य ह्रस्वो भ
वति ह्रस्वः एत्वे कृत्वे ङे शब्दवत् हे सोमप सोमपं सोमपे सोमपानि ॥ इकारांतो नपुं
सकलिंगो वारिशब्दः ॥ वारि इति स्थिते स्वाद्युत्पत्तिः ॥ स्वमोर्लोपमकारात् । नपुंसका
देगाद्वरयोः स्वमोर्लोपो भवति वारि । द्विवचने । औ भवः । इकोऽचि विभक्तौ ॥ इगंत
स्य नपुंसकलिंगस्य नुमागमो भवति अजादौ विभक्तौ परतः णत्वं वारिणी बहुवचने
जस्शसोः शिरादेशः नुकारागमश्च ॥ इन्हन्पूषार्यम्णां शौ ॥ इन् हन् पूषन् अर्यमन् ।
इत्येतेषामुपधायाः शावेव नामस्थाने दीर्घो भवति नान्यत्र वारीणि । संबोधने । हे वा
रि । पदे मा इति स्थिते । पदे माहित्यनिर्देशाद्रुणं द्विगत्वेन नपुंसके ह्रस्वापरस्य वा रिफः संबोधने चाधानम

सो॰
३५

स्त्रिरूपं नांतं तथा सात्तु मध्यात्पूर्वत्वं इति माध्यंदिनिमते हे वारे हे वारिणी हे वारीणि
द्वितीयायामपि । वारि वारिणी वारीणि तृतीयैकवचने परह्रस्वाभावः वारिणा वारि
भ्यां वारिभिः ङित्वचने परह्रस्वात् घेर्ङितीति गुणे प्राप्ते इदुत्वे गुणो भ्यो तु स्वं वे विप्रति
षेधेनेति नुमागमात् वारिणे वारिभ्यां वारिभ्यः वारिणः वारिभ्यां वारिभ्यः वारिणः २
वारिणोः । आमि । नुमचिरेति स्वजावेभ्यो तुस्वं वे विप्रतिषेधेनेति नुडागमात् नुमि
सति ह्रस्वान्तत्वाभावात् नामीति दीर्घो न स्यात् वारीणां वारिणि वारिणोः वारिषु ॥
अस्थिदधिसक्थ्यक्ष्णाम् इति अन्येतेषां प्रथमा द्वितीययोः वारिशब्दवत् तृतीयादिष्वजा
दिषु रूपभेदः । इको चि विभक्तौ ॥ तृतीयादिष्वभाषितपुंस्कं पुंवद्गालवस्य ॥ इ
त्यपि कृत्य ॥ अस्थिदधि । सक्थ्यक्ष्णाम् । अनङुदात्तः ॥ अस्थिदधिसक्थ्यक्ष्णाम् इति
अन्येतेषां नपुंसकलिङ्गानां तृतीयादिष्वजादिषु परतः अनङादेशो भवति । अचो
यातः अनुबन्धलोपः एवं स्य भसंज्ञायां अल्लोपोनः । अनेन स्य भसंज्ञस्य अका
रलोपो भवति । अस्थ्ना । अस्थिभ्यां अस्थिभिः अस्थ्ने अस्थिभ्यां अस्थिभ्यः अस्थ्नः २
अस्थिभ्यां अस्थिभ्यः । अस्थ्नः अस्थ्नोः अस्थ्नां सप्तम्येकवचने विभाषा ङिश्योः अनेन त
स्यागमस्य पक्षस्याकारलोपो भवति ङिश्योः परयोः परतः अस्थि ॥ वा अस्थनि । अस्थ्नोः

© Dharmartha Trust J&K. Digitized by eGangotri

दुं
पा
३६
36

अस्थिषु एवं सक्थि अक्षि इति त्रयाणां । तथैव रूपनयः द्विशब्दस्य भेदः ॥ प्रथमा
द्वितीयाद्विवचने त्यदाद्यत्वे कृते नपुंसकाच्चेत्य । औङः शीभावः गुणः द्वे द्वे द्वाभ्यां
द्वाभ्यां द्वाभ्यां द्वयोः द्वयोः ॥ त्रिशब्दस्य । बहुवचने तथैव नुमादि ॥ त्रीणि त्रीणि
अन्यत्समानं शुचिशब्दस्य भेदः तस्य प्रथमाद्वितीययोः वारिशब्दवत् तृतीया
दिषु अजादिषु विभक्तिषु परतः भाषितपुंस्कानामिगान्तं पुंवद्भवति गालवस्याचार्यस्य
मतेन यथा शुचि कृत्स्नत्वं च न भवति तथात्रापि न भवतीत्यर्थः तृतीयायामः
विशेषः शुचिना शुचिभ्यां शुचिभिः चतुर्थ्यादिषु विशेषः पुंवद्भावपक्षे घेर्ङिती
ति गुणः अन्यत्र तु शुचये शुचिने शुचिभ्यां शुचिभ्यः शुचेः शुचिनः शुचिभ्यां ।
शुचिभ्यः शुचेः शुचिनः शुच्योः शुचिनोः शुचीनां शुचौ शुचिनि शुच्योः शुचि
नोः शुचिषु ॥ एवमन्येऽपि लिङ्गत्रयवत्त्यन्तयः इकारान्ताः भाषितपुंस्काः ईकारान्तो नपुं
सकलिङ्गः ग्रामणीशब्दः । तस्य ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः ह्रस्व :
त्वे न भवतः ततः ग्रामणिशब्दवत् तृतीयादिषु अजादिषु पुंवद्भावपक्षे रू
पनयः अन्यत्र वारिशब्दवत् ग्रामण्या ग्रामणिना । ग्रामणिभ्यां ग्रामणिभिः ग्रा ङो
मण्ये वा ग्रामणिने ग्रामणिभ्यां ग्रामणिभ्यः ग्रामण्यः वा ग्रामणिनः ग्रामण्योः वा ३६

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रामणिनोः ग्रामण्यां वा ग्रामणीनां ग्रामण्यां वा ग्रामणिनि ग्रामण्योर्वाः ग्राम
णिनोः ग्रामणिषु ॥ उकारान्तः नपुंसकलिंगः त्रपुशब्दः तस्य वारिशब्दवत्प्र
क्रिया त्रपु त्रपुणी त्रपूणि सर्वनामस्थाने च ॥ संबुद्धावित्तिदीर्घः संबुद्धौ सोः
लुकि कृते नलुमतांगस्येति प्रतिषेधस्यानित्यत्वात् अन्यथा लोपे प्रत्यय
लक्षणमित्यनेन न पतेत् ह्रस्वस्य गुण इति गुणो भवति हे त्रपो हे त्रपुणी हे
त्रपूणि । लुक् च । न लुमतांगस्येति प्रत्ययलक्षणनिषेधेन न भवितव्यं लुक
श्लुलुप इत्येतेन लसंज्ञा लुमता लुप्ते समिप्रे अङ्गस्य कार्यं प्रत्ययलक्षणं नाश्र
यितव्यमिति नैष दोषः अनित्योयं प्रतिषेधः उतोस्यानित्यत्वमवसीयते इको
चि विभक्तौ ॥ इत्यत्र अजग्रहणात् अन्यथा हलशवपि वा स्यान्नेन स्यात् अग्र । न
लोपः प्रातिपदिकान्तस्येति लोपो भविष्यति । स्वादिष्वसर्वनामस्थाने इति पदसं
ज्ञाविधानात् नहि संबुद्धौ नुमः श्रवणं प्राप्नोति उभिसंबुद्ध्योरिति न लोपप्रति
षेधात् नजाभ्यां सोः नपुंसकादिति लुकि कृते प्रत्ययलक्षणप्रतिषेधात् विभक्
के परस्याभावात् स्वयमेव नुन भविष्यति नतो जग्रहणमामाभ्यामिनित्योयं
प्रतिषेधः प्रत्ययलक्षणप्रतिषेधस्यानित्यत्वात् । संबुद्धावपि नुं प्राप्नोतीत्य

© Dharmartha Trust J&K. Digitized by eGangotri

तु॰ पा॰ ३२ 37

तत्त्वनिर्देशार्थमत्र ग्रहणं कृतं शेषं पूर्ववत् ॥ क्रुष्टुशब्दस्य भेदः ॥ तस्य पूर्ववत्तृती
यादिषु अजादिषु परतो तृज्वद्भावः तृतीयायाम विशेषः क्रुष्टुना क्रुष्टुभ्यां क्रुष्टुभिः चत
र्थ्यादिषु विशेषः क्रुष्टवे वा क्रुष्टुने क्रुष्टुभ्यां क्रुष्टुभ्यः क्रुष्टुनः क्रुष्टुभ्यां क्रुष्टुभ्यः क्रुष्टोः
क्रुष्टुनः क्रुष्टोः क्रुष्टुनोः क्रुष्टुनां क्रुष्टौ क्रुष्टुनि क्रुष्टोः क्रुष्टुनोः क्रुष्टुषु । एवं लघ्वादयः
नयः ॥ ऋकारान्तः भाषितपुंस्कानपुंसकलिङ्गः कर्तृशब्दः तस्य प्रथमाद्विती
ययोः वारिशब्दवत् कर्तृ कर्तृणी कर्तॄणि हे कर्तृ माध्वनिनिमित्ते हे कर्तः हे क
र्तृणी हे कर्तॄणि एवं द्वितीयायामपि तृतीयायामादिषु अजादिषु परतो तृज्वद्भावः कर्त्रा क
र्तृणा कर्त्रे वा कर्तृणे कर्तुः वा कर्तृणः कर्त्रोः वा कर्तृणोः कर्तरि वा कर्तृणि ।
ॠकारान्तः लृकारान्तः एकारान्ताश्चाप्रसिद्धाः । ओकारान्तो नपुंसकलिङ्गः चित्र
गोशब्दः चित्रगो इति स्थिते चित्रा गावो यस्य कुलस्येति विग्रहेऽनेकमपि प्रथमा
बहुवचनं जस् अनेकमन्यपदार्थे इति बहुव्रीहिः समासः समासश्च प्रातिपदिक
त्वात् सुपो धातुप्रातिपदिकयोरिति लुक् ह्रस्वो नपुंसके प्रातिपदिकस्येत्य
पि क्लीबत्व ॥ गोस्त्रियोरुपसर्जनस्य । गोशब्दस्य स्त्रीप्रत्ययस्य चोपसर्जनस्य ह्र
स्वो भवति एचश्च इगादेशे ह्रस्वत्वे इगेव भवति ---- चित्रगु इति स्थिते वारिशब्दवत् ॥ डो॰ ३२

© Dharmartha Trust J&K. Digitized by eGangotri

पनयः ॥ ऐकारांतो नपुंसकलिंगः अतिरै शब्दः रायमिति । क्रांतमिति विग्रहे अ
त्यादयः क्रांताद्यर्थे द्वितीयया इति समासः अतिरै इति स्थिते ह्रस्वो नपुंसके प्रातिप
दिकस्येति ह्रस्वः अतिरि अतिरिणी इत्यादि वारिवत् ॥ औकारांतः अतिनौ शब्दः ना
वमिति क्रांतं जलं इति वाक्ये अत्यादयः क्रांताद्यर्थे द्वितीयया इति समासः अतिनौ इति
स्थिते पूर्ववत् ह्रस्वे अतिनु शब्दवत् रूपनयः अजंतानपुंसकलिंगासमाप्तः ॥
अथ हलंताः पुंलिंगाः यथासंभावस्तु अंतेन तत्र पुंलिंगः गोदुह् शब्दः स च गोशब्दोपपदः
स्य ···· दुह प्रपूरणे इत्यस्य धातोः क्विबंतः दुह इति स्थिते उकारः स्वरितेत् इत्यर्थे
न्तेयो व धातुसंज्ञायां गा उस्तुपपदं गां दोग्धीति विग्रहे कृते तत्संइस्थिते प्रत्यादिना क्विप् लो
पादि पूर्ववत् ह्रस्वं लघु इति लघुसंज्ञायां पुगंत लघूपदस्य च पुगन्तस्यागमस्य लघूपद
स्य च इके गुणो भवति सार्वधातुकार्धधातुकयोः परतः इति गुणे प्राप्ते क्ङिति चेति प्र
तिषेधः गतिकारके त्यादिना समासः स्वाद्युत्पत्तिः हल्ङ्यादि लोपः । होढ इति ढत्वे
सामेपदांतस्य झलां झलीति वर्तमाने ॥ दादेर्धातोर्घः ॥ दादेर्धातोर्हकारस्य घकारा
देशो भवति झलि परतः पदान्ते च । झलां जशोऽन्ते इति जशत्वं वावसाने इति चर्त्वे गोड
ग् गोडुक् अन्यत्र संहितेवा गोडुहौ गोडुहः गोडुहं गोडुहा अन्यत्र स्यादिषु सर्वत्र ना

© Dharmartha Trust J&K. Digitized by eGangotri

वैः पाः ३८

मस्थाने परतः पदसंज्ञं भवति इति पदसंज्ञायां प्राप्तायां ग्रहणे सौ च विभक्तिरिह
वेस्य भसंज्ञा विधानार्थं न तु जश्त्वभषभावो न भवतः एवं सर्वत्र सर्वनामस्थाने ग्रहणे भसं
ज्ञा हलादौ पदसंज्ञा वेदितव्या प्राक्कडारादेका संज्ञा इति वचनात् गोदुह् गोदुहौ
गोदुग्भ्यां गोधुग्भिः गोदुहे गोधुग्भ्यां गोधुग्भ्यः गोदुहः गोदुग्भ्यां गोधुग्भ्यः गोदुहः गोदु
हो: गोदुहां गोदुहि गोदुहोः गोदुत्सु पत्वं घोश्चेति चत्वं इकारेति षत्वं वमन्त्य
पि हेतु रुहादयः लिह् शब्दस्य भेदः । सचर्षत् गाहोपपदात् लिह आस्वादने
स्मात् क्विबन्तः समासे कृते अन्तर्वर्तिनी विभक्तिमाश्रित्य पदसंज्ञायां नलोपः
प्रातिपदिकान्तस्येति नलोपः एष विशेषः हलादौ पदान्तस्य हकारस्य हो ढ इति
ढत्वं जश्त्वं वावसाने इति चत्वं लिट् लिड् लिहौ । लिहः शेषं नयमः
एवं मधुलिडादयः चित्रदुह् शब्दस्य भेदः सच चित्रोपपदात् दुह प्रपूरणे धातोः
न्स्मात् । क्विबन्तः चित्रायदुह्यतीति वाक्यं वा दुहमुहस्निहां एषां हकारस्य वा घ
कारादेशो भवति झलि परे पदान्ते च पत्वढत्वं भषभावश्च एवं च वत् चित्रधुक् चित्र
धुग् चित्रधुट् चित्रधुड् एवं पदान्ते झलि परे च द्रुहं प्रविशति हितेव मित्रद्रुहोमि
त्रद्रुहः एवं मुहादयः ॥ अनडुह् शब्दस्य स्थिते स्वाद्युत्पत्तिः चतुरनडुहोरामुदात्तः

डं० ३८

चतुर् अनडुह् इत्येतयोः संबुद्धिवर्जिते सर्वनामस्थाने परतः आमागमो भवति स
चोदात्तः मित्वादन्त्यात्स्वरात्पर इति हकारात्पूर्वो भवति सकारात्परश्च अद्धीनयोर्मित्य
पिकृत्य ॥ सावनडुहः ॥ अनडुह् इत्यस्य नुमागमो भवति सौ परे हलोऽनन्तराः सं
योग इति संज्ञायां संयोगान्तस्य लोपः ॥ संयोगान्तस्य पदान्तस्य लोपो भवति इति हका
रलोपः तस्यासिद्धत्वात् नलोपो न भवति अनड्वान् द्विवचनादिषु नुमभावात् ।
संहितैव भवति अनड्वाहौ अनड्वाहः संबुद्धौ अम्संबुद्धौ चतुरनडुहोरमागमो भव
ति संबुद्धौ परतः नुमागमश्च हल्ङ्यादिना सलोपः संयोगान्तस्य लोप इति हलोपः
हे अनड्वन् हे अनड्वाहौ हे अनड्वाहः अनड्वाहं अनड्वाहौ ॥ शसि तु असर्वनामस्थानत्वा
त् आम् न भवति अनडुहः अनडुहा हलादौ वसंस्रंसुध्वंस्वनडुहां च ॥ एषामस्य
स्य दकारादेशो भवति हलि परे पदान्ते च अनडुद्भ्याम् अनडुद्भिः इत्यादि अनडुत्सु
त्वचि चेति वत्वं ॥ यकारान्ता अप्रसिद्धाः वकारान्तः उलिङ्गः सुदिव् शब्दः शोभना द्यौ
र्यस्येति विग्रहे स्वरेणाहुवत् बहुव्रीहिः सुदिव् इति स्थिते स्याद्युत्पत्तिः सौ दिव औत्
दिवः औकारादेशो भवति सौ परतः स च अलोऽन्त्यस्येति वकारस्य भवति यणादेशः :
सुद्यौः अन्यत्र संहितैव सुदिवौ सुदिवः संबोधनेऽप्यविशेषः हे सुद्यौः हे सुदिवौ

© Dharmartha Trust J&K. Digitized by eGangotri

तु॰ पा॰ तु॰ 39

हे सुदिवः सुदिवं सुदिवौ सुदिवः सुदिवा हलादौ पदसंज्ञायां दिव उत् दिव्शब्दस्य
उत् भवति हलि परे पदान्ते च यणादेशः सुद्युभ्यां सुद्युभिः शेषं नेयं रेफान्ताः पुल्लिंगाः
चतुर् शब्दः अस्य बहुत्ववाचित्वात् बहुवचने एव भवति जस् चतुर् चतुरनडुहोरामुदात्त इ
ति आमागमः मकारो देशावयवार्थः यणादेशः चत्वारः शसि तु आमादेशो भवति । प्रस
र्वनामत्वात् चतुरः चतुर्भिः चतुर्भ्यः चतुर्भ्यः आमि ॥ षट्चतुर्भ्यश्च ॥ षट्संज्ञ
केभ्यः । चतुर्शब्दाच्च उत्तरस्यामो नुडागमो भवति रषाभ्यामिति णत्वं अचो रहा
भ्यां द्वे इति भ्यं चतुर्णां सुपि रोः सुपि ॥ सुप इति सप्तमी बहुवचनं स्यात्तेन सुपि परतः
रोः रेफस्य विसर्जनीयादेशो भवति नान्यस्य चतुर्षु ॥ लकारान्तः सकारान्ता वा अप्र
सिद्धौ ॥ मकारान्ताः पुल्लिंगाः प्रशाम् शमु उपशमे उकारलोपः प्रयोजनं उदितो वा इति
विशेषणं भ्वादयो धातव इति धातुसंज्ञायां प्रशाम्? तस्मात् तिप्? ...
वं वत् क्विप् तस्य सर्वलोपः ॥ अनुनासिकस्य क्विझलोः क्ङिति ॥ अनुनासिकान्त
स्य उपधाया दीर्घो भवति क्वौ झलादौ क्ङिति च परतः गतिकारकोपपदानां समासः
स्य प्रत्ययः मो नो धातोः मकारान्तस्य धातोः पदस्य नकारादेशो भवति प्रशान् नलो
पस्य असिद्धत्वात् न लोपो नास्ति प्रशामौ प्रशामः एवं प्रतानादयः ॥ किंशब्दस्य भेदः ॥ ङ॰ तु॰

© Dharmartha Trust J&K. Digitized by eGangotri

सचसर्वनामत्वात्रिलिंगः तस्यरूपनयः किं इति स्थिते स्याद्युत्पत्तिः अहन्नप्राविभक्ता
वित्यधिकृत्यकिमः कः ॥ किं शब्दस्यककारादेशो भवति विभक्तौपरतः शेषं सर्ववत्
संबोधनेनास्ति कः कौ के कम् कौ कान् केन काभ्यां कैः कस्मै काभ्यां केभ्यः क
स्मात् काभ्यां केभ्यः कस्य कयोः केषां कस्मिन् कयोः केषु ॥ इदं शब्दस्यभेदः ॥ स
चसर्वनामत्वात्रिलिंगः यस्माद्धि लिंगत्रयरूपभेदः इदम् इति स्थिते स्याद्युत्पत्तिः सा
भ्योदादेशत्वंबाधित्वा इदमो मः ॥ इदं शब्दस्य मकारस्य मकारादेशो भवति सौ परतः
यामो इति पितृकान्य इदोऽय्पुंसि ॥ इदम् इद्रूपस्य अय् आदेशो भवति पुंसि विषये सौ परे अ
यं द्विवचनादिषु त्यदादीनामः इत्यत्व अतो गुणे इति पररूपत्व इदमो मः इत्यधिकृत्य
दश्च ॥ इदमो दकारस्य मकारादेशो भवति विभक्तौ परतः वृद्धिः इमौ जसि सर्वनाम्नः
त्वेपररूपत्वेच कृते टेऽसुप्त्यदकारस्य मः जसः शी आद्गुणः इमे संबोधनस्याभावः
तथैव द्वितीयायाम् इमम् इमौ इमान् तृतीयैकवचने तथैव त्यदाद्यत्वपररूपत्वे अना
प्यकः ॥ इदम् इद्रूपस्य अककारस्य अन् आदेशो भवति आमि विभक्तौ परतः आ
मिति तृतीयैकवचनात्प्रभृति सप्तमी एकारेण प्रत्याहारः जड्त्वड्सामित्यादिना
नादेशः अनेन द्विवचने हलि लोपः ॥ इदम् इद्रूपस्य अककारस्य लोपो भवति हला

© Dharmartha Trust J&K. Digitized by eGangotri

इं॰ पा॰ ४०

५०

ष्ठो विभक्तावुपरतः अयमत्वदेकस्मिंस्त्रिन्ष्वेवज्ञाभावात् सुपि चेत्यंगस्य दीर्घः आभ्यां ब-
हुवचने तथैव हलि लोपः अनेनामत्पयेतिनिवेतिप्रामेनेदमदसोरकोः ॥ इदम् अ-
दस् इत्येतयोः अकक्कारकयोः संबोधनः भिसः ऐस् न भवति बहुवचने झल्यत् ए-
त्वे त्वं एभिः चतुर्थ्येकवचने त्यदाद्यत्वे परत्वे च हाते सर्वनाम्नः स्मै ॥ हलि लोपः ॥
अस्मै आभ्यां एभ्यः पंचम्येकवचने ङसिङ्योः स्मात्स्मिनौ इति स्मात् आदेशः अस्मात् आ-
भ्यां एभ्यः अस्य एवंवत् अनादेशः अनयोः आमि सर्वनाम्नः सुट् हलि लोपः एषां स-
प्तम्येकवचने स्मिन्नादेशः अस्मिन् अनयोः एषु अन्वादेशविषये द्वितीयाटौस्स्वेनः इ-
दमः एतदश्च एनादेशो भवति द्वितीयायां टौसि इत्येतेषु परेषु परतः अन्वादेशवि-
षयं एकस्य वस्तुनः किंचिद्विधाय पुनरन्यद्विधीयते सो अन्वादेशः एकस्यैवाभिधेय-
स्य पूर्वं ग्रहणं न प्रत्यमानितस्य द्वितीयं प्रतिपादने सोऽन्वादेशः एनम् एनौ एनान् ए-
नेन एनयोः एनयोः ॥ इकारान्तकारान्तावप्रसिद्धौ ॥ नकारान्तः पुंलिंगो राजन् इ-
ति स्थिते स्वाद्युत्पत्तिः सर्वनामस्थाने चासंबुद्धावित्युपधादीर्घः हल्ङ्यादिलोपः न-
लोपः प्रातिपदिकान्तस्येति नलोपः राजा राजानौ राजानः संबुद्धौ दीर्घो न भवति
असंबुद्धाविति प्रतिषेधात् न ङिसंबुद्ध्योः परान्तस्य नकारस्य लोपो न भवति ङिसं-

डं॰ ४०

© Dharmartha Trust J&K. Digitized by eGangotri

ङ्ख्योः परतः इति नलोपाभावः हे राजन् हे राजानौ हे राजानः राजानं राजानौ शसा
दिषु जातिषु यचि भमिति भसंज्ञायां अल्लोपेनः भसंज्ञकस्यान्नन्तस्य अकारलोपो भव
ति श्चुत्वेन नकारस्य ञकारः राज्ञः राज्ञा एवमन्यत्रापि ङादौ हलादौ तु स्वादिष्वसर्व
नामस्थाने इति पूर्वस्य पदसंज्ञायां नलोपः प्रातिपदिकान्तस्येति नलोपः नलोपः सु
प्स्वरसंज्ञातुग्विधिषु कृति ॥ इति असिद्धत्वात् लोपे चेति दीर्घो न भवति राजभ्यां राजभि
राज्ञे राजभ्यां राजभ्यः राज्ञः राजभ्यां राजभ्यः राज्ञः राज्ञोः राज्ञां ङि प्रत्यये विभाषा ङिश्यो
रिति विकल्पेन अकारलोपः राज्ञि वा राजनि राज्ञोः राजसु ॥ एवं पूषन् इत्यन्नन्तप्र
नयः ॥ पूषन् शब्दस्य भेदः ॥ इन्हन्पूषार्यम्णां शौ वित्यपि कृत्य ॥ सौ च एषां ताव
वत्सर्वनामस्थाने परतः उपधाया दीर्घो भवति नान्यत्र अन्यत्समानम् पूषा पूषणौ पू
षणः सम्बुद्धौ दीर्घो न भवति हे पूषन् हे पूषणौ हे पूषणः पूषणं पूषणौ शसि अ
लोपे कृते पूषा भ्यामिति णत्वं शेषं नेयं एवमर्यमन् शब्दः ॥ ब्रह्महन् शब्दस्य भेदः ॥
सत्रहन्हेमारभ्योरिति स्मात् ब्रह्मन् शब्दोपपदात् क्विबन्तः हन इति स्थिते अल्लोपेना
लोपः ब्रह्मन् उपपदे ब्रह्माणं हन्ति इति विग्रहे ह्लोतेः हते इत्यपि ह्ना ॥ ब्रह्मणा
कृते क्विपि ब्रह्माणं हन्ति इत्यन्ये उपपदे हन्तेः धातोः क्विप् प्रत्ययो भवति ह्ते

हं· प्रा· ५२

51

कालेयज्ञवंधलोपः एवंवत् नपपदमतिहृ इति समासः हृदंतत्वात्स्वाद्युत्पत्तिः
प्रथमाद्वितीययोः एवंवत् ब्रह्महा ब्रह्महणौ ब्रह्महणः संबोधने हे ब्रह्मणा हे ब्र-
ह्मणौ हे ब्रह्मणः शसादिष्वजादिषु ॥ अचि भमिति भसंज्ञायां अल्लोपेन इति अल्लो-
पे कृते वज्रोः कादिगणे नोदित्यधिकृत्य ॥ हो हंतेर्ञ्णिन्नेषु ॥ हंतेः हकारस्य घका-
रः ञिणिणिति प्रत्ययेन कारे च परतः ब्रह्मघ्नः ब्रह्मघ्ना ब्रह्महभ्याम् ब्रह्मब्रह्महभि
ङि प्रत्यये विभाषा ङिश्योरिति विकल्पेन अल्लोपे कृते ब्रह्मघ्नि वा ब्रह्महणि एवं वृत्रहः
नादयः ॥ पूषन् अर्यमन् शब्दस्य भेदः शसादावजादौ अल्लोपेन इति अल्लोपे प्राप्ते ॥ नसं-
योगात्वमंतात् समानं सपर्वा सपर्याणौ सपर्वाणः सुपर्वाणं सुपर्वाणौ सुपर्वाणः
सुपर्वाणा सुपर्वभ्यां सुपर्वभिः इत्यादि शेषं पूर्ववत् ॥ एवमन्येऽपि यज्वन् सुशर्मन् प्र-
भृतयः ॥ श्वन् युवन् शब्दस्य भेदः श्वन् इति स्थिते स्याद्युत्पत्तिः सर्वनामस्थाने एवंवत्
श्वा श्वानौ श्वानः श्वानं श्वानौ भसंज्ञाविषये वप्रोः संप्रसारणमित्यधिकृत्य श्वयु-
वमघोनामतद्धिते श्वन् युवन् मघवन् इत्येतेषामंगानां संप्रसारणं भवति अत-
द्धितप्रत्यये परतः ॥ इग्यणः संप्रसारणं संप्रसारणाच्च संप्रसारणादचि परतः पू-
र्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति शुनः शुना इत्यादि हलादौ विशेषः

उ· ५२

© Dharmartha Trust J&K. Digitized by eGangotri

घभ्यां घभिः तथैव यवन्नु ग्राहुः तस्य सर्वनामस्थाने पूर्ववत् शसमासावङासौ संप्रसा
रणे कृते एव व्रूपत्वे सवर्णदीर्घः यकारस्य ऊनः संप्रसारणे प्राप्ते न संप्रसारणे संप्रसा
रणमिति प्रतिषेधः ऊनः ऊना युवभ्यां युवभिः इत्यादि नेयं तथैव मघवन्नु ग्राहुः
तस्य शसादौ संप्रसारणे एवं व्रूपत्वे च गुणः मघोनः मघोना मघवभ्यां मघवभिः इ
त्यनेयं ॥ अर्वन्न ग्राहुस्य भेदः अर्वन्न इति स्थिते तथैव स्याद्यन्तविभक्तिः सौ अर्वा अर्वौ
व विभक्तिषु ॥ अर्वणस्त्रसावनञः अर्वन्न ग्राहुस्य अनञः परस्य तृ आदेशो भवत्य
सौ विभक्तौ परतः स चालोन्त्यस्येति नकारस्य भवति न तु च अनेकालात् सर्वस्य भ
वितव्यमनेन ऽ टकितेनानुबन्धकृतमनेकाल्त्वमिति वचनात् टकारलोपः अर्वा [illegible]
नेत गित इत्युक्ति विशेषणात् उगिदचां सर्वनामस्थाने धातोः उगितां संगानां धातुवति
नानां धन्वति तेस्य नुमागमो भवति सर्वनामस्थाने परतः अर्वन्तौ अर्वन्तः हे अर्व
न् हे अर्वन्तौ हे अर्वन्तः अर्वन्तं अर्वन्तौ शसि त्वसर्वनामस्थानत्वात् नुम् न भवति अ
र्वतः अर्वता अर्वद्भ्यां लोज मत्व अर्वद्भ्याम् अर्वद्भिः शेषं नेयं अनञ इति किं अनर्वा अन
र्वाणौ अनर्वाणः ॥ पंचन्न ग्राहुस्य भेदः तस्य बहुअर्थवाचित्वात् बहुवचनमेव भ
वति त्रिष्वपि लिङ्गेषु समानं रूपं अलिङ्गत्वात् इङ्के स[illegible]ख्यानाशुम्भरस्मान्तकभः

© Dharmartha Trust J&K. Digitized by eGangotri

दू॰
पां॰
५२

५२

अयमलिंगकमिति ॥ ष्णांताषट् ॥ षकारनकारांतानाषट्संज्ञाभवति षड्भ्योलुक् ष
ट्संज्ञकेभ्यः उत्तरयोर्जस्शसोः लुग्भवति प्रत्ययलक्षणेन सर्वनामस्थाने चासं
बुद्धाविति दीर्घो न भवति न लुमताङ्गस्येति प्रत्ययलक्षणनिषेधात् नलोपः प्रा
तिपदिकांतस्येति नलोपः पंच पंच पंचभिः पंचभ्यः आमि षट्चतुर्भ्यश्च न्नुट् नामी
त्यपि कृते नोपधायाः ॥ नकारांतस्यांगस्योपधाया दीर्घो भवति नामि परे नः न
कारलोपः पंचानां पंचन् सप्तन् नवन् दशन् इत्यनेन शब्दाः ॥ अष्टन् शब्दस्य भे
दः ॥ तस्य बहुत्वविवक्षायां बहुवचनमेव भवति ॥ अष्टन आ विभक्तौ ॥ अष्ट
न शब्दस्य आकारादेशो भवति विभक्तौ परतः ततः यत्र आत्वं तत्र अष्टाभ्यः औश्
अष्टन् शब्दात् कृताकारात्परयोः जस्शसोः ॥ औशित्ययमादेशो भवति परतः
रेव दीर्घो ह्यकारांतत्वापत्तमात्वविकल्पस्य आकारः सर्वादेशार्थः वृद्धिः अष्टौ अष्टौ
अष्टाभिः अष्टाभ्यः अष्टाभ्यः असि आत्वे कृते ष्णांताषट् इत्यत्र अष्टानामसंख्यात
अन्नकारांतस्यापि षट्संज्ञायां न्नुट् अष्टानां ॥ यत्रात्वं न भवति तत्र षड्भ्यो लुगि
ति जस्शसोर्लुक् नलोपश्च अष्ट अष्ट अष्टभिः अष्टभ्यः अष्टभ्यः अष्टानाम् अ ॐ
ष्टसु ॥ कतिशब्दस्य भेदः कारडतिस्त्रियने कारस्यालिङ्गतिविग्रहे अतडतिप्रत्ययो ५२

© Dharmartha Trust J&K. Digitized by eGangotri

अकारांतात्प्रातिपदिकात् इनिठनौ प्रत्ययौ भवतः तदस्यास्त्यस्मिन्नर्थे इति इनिः
इकारेणकारपरित्राणार्थः तद्धितान्तत्वात्प्रातिपदिकसंज्ञायां सुपो धातुप्रातिप
दिकयोरिति सुपो लुक् यचि भमिति एवं सर्वत्र भसंज्ञायां ॥ यस्येति चेति अकारलो
पः स्याद्यन्तत्वात् इन्हन्पूषार्यम्णां शावित्यधिकृत्य सौ चेति दीर्घः नलोपः करीष
न्धसंहितावकारिणोकारिणः शेषं नेयं एवं शिखिन् योगिन् हस्तिन् प्रभृतयः ऊह्
यन्तः ॥ इतोनां पथिन् शब्दस्य भेदः तस्य सौ पथिमथ्यृभुक्षामात् पथिन् म
थिन् ऋभुक्षिन् इत्येतेषां सौ परे आ आकारादेशो भवति ॥ इतोत्सर्वनामस्थाने ॥ पथ्या
दीनामिकारस्य अकारादेशो भवति सर्वनामस्थाने परे सवर्णदीर्घः ॥ थो न्थः ॥ पथि
मथोस्थकारस्य न्थ आदेशो भवति सर्वनामस्थाने परतः सत्वविसर्गौ पन्थाः द्विवचना
दिषु सर्वनामस्थाने चासंबुद्धाविति दीर्घः पन्थानौ पन्थानः हे पंथः हे पन्थानौ हे पन्था
नः शसादावजादौ यचि भमिति भसंज्ञायां ॥ भस्य टेर्लोपः ॥ पथ्यादीनां भसंज्ञकाना
संज्ञानां टेर्लोपो भवति पथः पथा पथिभ्यां पथिभिः पथे पथिभ्यां पथिभ्यः पथः पथि
भ्यां पथिभ्यः पथः पथोः पथां पथि पथोः पथिषु ॥ एवं मथिन् शब्दः ऋभुक्षिन्
शब्दस्य थो न्थ इति नास्ति शेषं पथिवत् ऋभुक्षाः ऋभुक्षाणौ ऋभुक्षाणः हे ऋभु

© Dharmartha Trust J&K. Digitized by eGangotri

तु॰ पा॰ भ॰ 43

त्तः । हे ऋभुक्षाणौ हे ऋभुक्षाणः ऋभुक्षाणं ऋभुक्षाणौ अत्ताहावङाहौ भस्य टेर्लोपः
ऋभुक्षः ऋभुक्षा ऋभुक्षिभ्यां ऋभुक्षिभिः इत्यादि शेषं नेयं सभगणान्ताः प्रसिद्धाः
तत्त्वबुध् बुध अवगमने बुध इति स्थिते अकारस्येत्संज्ञा लोपः प्रयोजनं अनुदात्ते
त्त्वादात्मनेपदार्थं तत्त्वम् उपपदं तत्त्वं बुध्यते इति विग्रहः । अन्येभ्योऽपि दृश्यन्ते इति क
र्तरि क्विप् शेषं पूर्ववत् हल्ङ्यादिलोपः एकाचो बशो भष्झषन्तस्य स्ध्वोः इति प्राप्ते ब
कारस्य भकारः जश्त्वचर्त्वे कृते तत्त्वभुद् तत्त्वभुत् अन्यत्र सहिते तत्त्वबुधौ तत्त्व
बुधः सम्बोधनेऽपि तद्वत् तत्त्वबुधम् तत्त्वबुधौ तत्त्वबुधः तत्त्वबुधा तत्त्वभुद्भ्यां तत्त्व
भुद्भिः शेषं नेयं एवमन्येऽपि ज्ञानबुध् अर्थबुध् प्रभृतयः जकारान्तः जन्मभाज् शब्दः
भज सेवायां अकारलोपः प्रयोजनं स्वरितञितः इत्यर्थः तथैव धातुसंज्ञायां जन्मन्
उपपदे जन्म भजते इति विग्रहे धातोरिति वर्तमाने भजो ण्विः ॥ भजेः धातोः ण्वि
प्रत्ययो भवति णकारो वृद्ध्यर्थः इकारो वेरपृक्तस्येति सामान्यग्रहणार्थः वेरपृक्तस्ये
ति वकारलोपः प्रत्ययलोपे प्रत्ययलक्षणमिति वचनात् भजेः वृद्धिः अचो ञ्णिति
विहितत्वे ॥ अत उपधायाः अङ्गस्योपधाया अकारस्य वृद्धिर्भवति ञिति णिति च प्र
त्यये परतः नकारलोपः जन्मभाज् इति स्थिते स्वाद्युत्पत्तिः चोः कुः चवर्गस्य कवर्ग

उ॰ भ॰

गोरेशोभवति गलिपरहतेव ॥ चत्वं जन्मभाग् जन्मभाक् अन्यत्र संहिते जन्मभाजौ
जन्मभाजः संबोधनेपितत्वं जन्मभाक् जन्मभाजौ जन्मभाजः जन्मभाजं जन्मभाजौ
जन्मभाग्भिः जन्मभाजो जन्मभागो जन्मभाग्भ्यः जन्मभाजः जन्मभाग्भ्यां जन्मभा
ग्भ्यः जन्मभाजः जन्मभाजोः जन्मभाजां जन्मभाजि जन्मभाजोः द्विपित्वेविवेति च
त्वं षत्वं जन्मन्नमभाक्षु ॥ भिषज् शब्दस्य स्वाद्युत्पत्तिः सोः हल्ङ्यादिलोपः गलिप
रहतेव चोः कुः ॥ चत्वं भिषक् भिषग् भिषजौ भिषजः संबोधनेपितद्वत् भिष
जं भिषजौ भिषजः भिषजा भिषग्भ्यां भिषग्भिः इत्यादि शेषं नेयं ॥ ऋत्विज् शब्दस्य भे
दः ॥ ऋत्विग्योगे इकाररेफयोः इत्वतपसप्तमीति इत्वं तालोपः स्योर्जनं इति
नोवाद्युतिविशेषणांतंस्थैवधातुसंज्ञाया ... ऋग्योनुरुत्वं क्विन्बिंत्यपिहत्व ऋत्विग्द
धृक् स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां ऋत्विक् दधृक् स्रक् दिक् उष्णिक् एते शब्दा
क्विन्प्रत्ययान्ता निपात्यंते अञ्चुयुजिक्रुञ्चः इत्येतेभ्यः क्विन्प्रत्ययो भवति नकारो
ज्वित्यादिन्नित्यमितिविशेषणार्थः ग्रन्तबधलोपः हृदंततत्वात्स्वाद्युत्पत्तिः नति
ऽचात्सर्वनामस्थानेधातोरित्यपिहत्व ॥ युजेरसमासे ॥ युजेर्नागमस्तु नागमो
भवति सर्वनामस्थाने परतः असमासे विषये ॥ क्विन्प्रत्ययस्यर्थः ॥ क्विन्प्रत्यया

© Dharmartha Trust J&K. Digitized by eGangotri

सृ: प्रा: ५५

तस्य पदस्यान्तः कवर्गादेशो भवति झलि पदान्ते च इति जकारस्य गकारः ततः अनुस्वार
परसवर्णौ संयोगान्तस्य लोपः युङ् युञ्जौ युञ्जः युञ्ज युञ्जौ पञ्चादौ नृ असत्वेनासस्थान
त्वात् नेन भवति युञ्जः युञ्जा युग्भ्याम् युग्भिरित्यादि समासे ज शब्दस्य भेदः राजृ दीप्तौ अ
कारलोपः प्रयोजनं नास्ति मिथ्याम्लादि लोपमिति विशेषणार्थः तथैव धातुसंज्ञा या स
मः प्राक्प्रयोगः सम्राजते इति विग्रहे कृते सम्राट् क्विप् डकार ड हयुज विद भिद छिद जि
नी राजा सुपसर्गेपि क्विप् शेषं पूर्ववत् पापानिषु मः क्वौ ॥ सप्त मकारस्य मकारादे
शो भवति राजतौ क्विपुत्पत्यानेपरेण इति अनुस्वार उपधनाशो मकारस्य मकार
रः स्थाद्यन्त्वात् क्विः हल्ङ्यादिलोपः भ्रस्ज सृज मृज यज राज भ्राज च्छशां षः ॥ व्रश्चा
दीनां धातूनां भ्रस्जादि छकारशकारपदान्तानां षकारादेशो भवति झलि परे पदान्ते च जश्त्व
चर्त्वे ऋटुरषाणां मूर्धा इति स्थानसाम्यत्वात् डकारटकारौ सम्राड् सम्राट् सम्राजौ स
म्राजः संबोधनेपि विशेषः सम्राजं सम्राजौ सम्राजः सम्राजा सम्राड्भ्याम् सम्राड्भि
रित्यादि शेषं ज्ञेयं ॥ इति जशब्दस्य भेदः ॥ यज देवपूजासंगतिकरणदानेषु अकारस्य
इत्संज्ञा ``` कर्त्रभिप्राये क्रियाफले इत्यर्थः यज इति स्थिते देवशब्द उपपदे सं
वान् यजतीति विग्रहे कृते क्विप् ॥ वचिस्वपियजादीनां कित् ॥ पञ्चानां समासे ॥ डं: ५५

© Dharmartha Trust J&K. Digitized by eGangotri

भवतिप्रत्ययेपरतः इत्यउकारस्यउकारः संप्रसारणमिति एवं रूपत्वात् गुणः देव
न इति स्थिते एवंवत् षत्वजश्त्वचत्वानि देवेड् देवेड् देवेजौ देवेजः शेषं नेयं
वगडांनामप्रसिद्धः सनामत्वाविशेषः दकारांतो वेदविद् शब्दः विद ज्ञाने इति वि
द्वेदं उपपदं वेदं वेत्तीति विग्रहे एवंवत् क्विपीयोरिति वेदविद् वेदविद् वेदवि
दौ वेदविदः शेषं नेयं एवमन्येपि सर्वविदादय ॥ द्विपाद् शब्दस्य भेदः द्वौ पादौ यस्य
ति विग्रहे सर्वे शब्दवत् बहुव्रीहि द्विपद । इति स्थिते पादस्य लोपोहस्त्यादिइत्यपि
हात्य संख्यासु एवंस्य च ॥ संख्या एवंस्य सु एवंस्य च पादशब्दस्यान्तलोपो भवति इ
ति अकारलोपः द्विपात् इति स्थिते स्वाद्युत्पत्तिः हल्ङ्यादिलोपः ॥ द्विपात् द्विपाद्
द्विपादौ द्विपादः द्विपात् द्विपादौ शसादावजादौ पादः पात् पपाच शब्दस्य बहुव्री
हौ कृतान्त्यलोपस्य पदादेशो भवति भसंज्ञाविषये सति विद्यमानस्य पादेशो भव
तीति पाद्शब्दस्य पदादेशो भवति द्विपदः द्विपदा द्विपाद्भ्यां द्विपाद्भिः द्विपदे द्वि
पाद्भ्यां द्विपाद्भ्यः शेषं नेयं ॥ एवं सुपादादयः उद्शब्दस्य शब्दस्य भेदः सच सर्वना
मत्वात्त्रिलिंगः यदा पुंलिंगस्तदा रूपनयः स्वाद्युत्पत्तिः सत्यदाद्यत्वात् अनोउण
इति पररूपं नहोः मः सावनौ त्यदादेरिति उकारस्य सकारः हत्वविसर्गौ सः अन्यत्तम

© Dharmartha Trust J&K. Digitized by eGangotri

दु॰ पा॰ ४५ 45

वेशब्दवत् तौ ते तं तौ तान् तेन ताभ्यां तैः तस्मै ताभ्यां तेभ्यः तस्मात् ताभ्यां तेभ्यः
तस्य तयोः तेषां तस्मिन् तयोः तेषु ॥ तद्वद्यच्छब्दः एवमेतच्छब्दः तदोः सः सा
वनंत्ययोरिति तस्य सः अवेशान्तयपयोरिन्यपत्वमात्रमन्यत् एषः एतौ एते अ
न्वादेशविषये द्वितीयाटौःस्वेनः इति एतच्छब्दस्य एनादेशः एनं एतं वा एनौ एतौ वा ए
नौ एतान् वा एनान् एतेन वा एनेन एताभ्याम् एतैः एतस्मै एताभ्यां एतेभ्यः एतस्मा
त् एताभ्याम् एतेभ्यः एतस्य एतयोः एतेषां एतस्मिन् एतयोः वा एनयोः एतेषु ॥ ख
कारान्तः चित्रलिख्शब्दः चित्रशब्दोपपदात् लिखः अतरविग्रहः इत्यः साहान्तः
क्विबन्तः चित्रलिक् चित्रलिग् चित्रलिखौ चित्रलिखः शेषं नेयं ॥ फकारान्तः अप्र
सिद्धः ॥ थकारान्तः अग्निमथ् मिथ् विलोडने फकारलोपः प्रयोजनं अग्नेरपि मा
मजाः शिरस्को हितानि विशेषणं तद्वद्धातुमत्ताद्यो अग्निरुत्पपदं अग्निमन्थाति
ति विग्रहे क्विप् इति क्विपो लोपः एवं तस्याद्यप्रत्ययः हल्ङ्यादि लोपः जश्त्वं चर्त्वं
म् अग्निमद् अग्निमत् अग्निमथौ अग्निमथः अग्निमथा अग्निमद्भ्यां अग्निमद्भिः शेषं
नेयं ॥ चकारान्तः पुंलिङ्गः सुवाच्शब्दः शोभना वाक् सुवाक् सुवाग् सुवाचौ सुवाचः सु ड॰
वाग्भ्यां सुवाग्भिः इत्यादि ॥ प्राच्शब्दस्य भेदः अञ्चु गतिपूजनयोः उकारलोपः ४५

© Dharmartha Trust J&K. Digitized by eGangotri

प्रयोजनं ततो वेति विशेषणं तथैव धातुसंज्ञायां एवं वत्प्र शाहस्य प्राक्प्रयोगः प्रां
चतीति विग्रहे ह्लाले ऋत्विग्दधृगित्यादिना क्विन् प्रत्ययः तस्य सर्वलोपः अनिदितां
हल उपधायाः क्ङिति ॥ अनिदितां नाम गानां हलन्तानां उपधाया नकारस्य लोपो
भवति क्ङिति परतः गतिकारकोपपदादिना समासः सवर्णे दीर्घः प्राञ्च् इति स्थिते स्वा
द्युत्पत्तिः हल्ङ्यादिलोपः ॥ उगिदचां सर्वनामस्थाने धातोरित्यनुमागमः क्विन्प्र
त्ययस्येति कवर्गस्य ककारः नश्चापदान्तस्य झलीत्यनुस्वारः अनुस्वारस्य ययि
परसवर्णः संयोगान्तस्य लोपः प्राङ् प्राञ्चौ प्राञ्चः सम्बोधनेऽपि विशेषः प्राञ्चं प्राञ्चौ
शसि तु असर्वनामस्थानत्वात् नुम् न भवति भसंज्ञाविषये ॥ अचः लुप्तनकारस्य अञ्चेः
स्थाने दीर्घो भवति प्राचः प्राचा प्राग्भ्यां प्राग्भिः प्राचे प्राचः ङः जश्त्वं प्राग्भ्यां प्राग्भ्यः
प्राचः प्राग्भ्यः प्राचः प्राचोः प्राचां प्राचि प्राचोः प्राक्षु ॥ तथैव प्रत्यक् एवं प्रत्यञ्चतीति क्वि
प्रत्ययश्च ॥ प्रत्यङ् तस्य सो प्रत्यञ्चौ प्रत्यञ्चः शसि प्रत्यच् अस् इति स्थिते अच इत्यकारलो
पः चौ इति इकारस्य दीर्घः प्रतीचः एवं भसंज्ञाविषये जश्त्वं प्रतीचा । प्रत्यग्भ्यां प्रत्यग्
भिरित्यादि विशेषणे यथा तथा तद्वदस्य अञ्चतेः क्विन्नन्तस्य तद्वच्च शब्दाः तद्वद् उदञ्चौ
उदञ्चः सम्बोधनेऽपि तद्वत् उदङ् उदञ्चौ उदञ्चः शसादावजादौ भसंज्ञायां उद ईत् उत उदीचः

© Dharmartha Trust J&K. Digitized by eGangotri

हे° पा° ५६

56

न्नरस्य लत्वमनकारस्याञ्चतेः ईदादेशो भवति स च आदेशो नरस्य परस्य विधीयमानं कार्यं
परस्याद्यादेर्भवति उदीचः उदीचा ललाटे न यत्वं उदग्भ्यामुदग्भिः शेषं नेयं ॥ तथैव
वृत्तिर्यञ्च्शब्दः तिरस्शब्दस्योपपदे तिरः अञ्चतीति विग्रहे कृते तथैव क्विन् शेषं
पूर्ववत् तिरस् अञ्च् इति स्थिते सध्र्यदेवयोश्चेरद्यै च भावो प्रत्यये इत्यपि कृत्वा ॥ तिर
सस्तिर्यलोपे तिरस्शब्दस्य तिरि आदेशो भवति । अञ्चतौ वप्रत्ययान्ते तत्पुरुषे अ
लोपे यत्र अच् इति अकारलोपेन भवति इत्यर्थः यणादेशः तिर्यङ् तिर्यञ्चौ तिर्यञ्चः
संबोधनेप्येवं विशेषः तिर्यञ्चं तिर्यञ्चौ भसंज्ञाविषये तिरि आदेशो न भवति अलोप
इति प्रतिषेधात् अच इति अकारलोपः स्तोः श्चुना श्चुः इति सकारस्य शकारः तिर
श्चः तिरश्चा तिर्यग्भ्यां तिर्यग्भिरित्यादि शेषं नेयं ॥ तथैव समस्य च शब्दः सम्पूर्वस्या
ञ्चतेः समञ्चतीति विग्रहे तथैव क्विन् ॥ समः समि ॥ संशब्दस्य समि आदेशो भव
ति अञ्चतौ क्विप्रत्ययान्ते उत्तरपदे यणादेशः सम्यङ् सम्यञ्चौ सम्यञ्चः संबोधनेपि
तत्वं सम्यञ्चं सम्यञ्चौ भसंज्ञायां अच इति अच अच इति स्थिते अच इत्यकारलोपः चौ इ
ति दीर्घः समीचः समीचा सम्यग्भ्यां सम्यग्भिः शेषं नेयम् ॥ सहपूर्वस्याञ्चतेः । ङों°
सहाञ्चतीति विग्रहे पूर्ववत् क्विन् सह अञ्च् इति स्थिते सहस्य सध्रिः ॥ सहाड ५६

नेतस्य सध्रि आदेशो भवति अञ्चतौ वप्रत्यये परतेऽनरपदे यमादेशः सध्र्यङ् सध्र्यञ्चौ
सध्र्यञ्चः सध्र्यञ्चं सध्र्यञ्चौ भसंज्ञाविषये सध्रि अञ्च् अस् इति स्थिते अचः इत्यकार
लोपः चौ इति दीर्घः सध्रीचः सध्रीचा सध्र्यग्भ्यां सध्र्यग्भिः इत्यादि शेषं तद्वत् यदा
अञ्चतिः पूजायामर्थे वर्त्तते तदा प्र अञ्च् इति स्थिते नयथ वा क्ङिन्प्रत्ययः क्ङिन सव
लोपः ॥ अनिदितां हल उपधायाः क्ङिति ॥ इति नकारस्य लोपे प्राप्ते नाञ्चेः पूजा
यामिति न लोपो न भवति क्ङिन्प्रत्ययस्य नकारे इति च प्रत्यञ्चः अनुस्वारवर्गान्तौ संयोगा
न्तस्य लोपः प्राङ् प्राञ्चौ प्राञ्चः प्राञ्चा हल्ङ्याब्भ्यो संयोगान्तलोपे कृते तत्र नकारस्य
ङकारः प्राङ्भ्यां प्राङ्भिः शेषं तद्वत् प्राङ् सु इति स्थिते क्रुञ्चः ङ्णोः कुक्टुक् शरि ॥ ककारः अत्यन्त
नभि सम्बध्यते ङकारणकारयोः ङ्णोः कुक्टुक् इत्यनेनागमो भवति शरि परतः अन्य
स्मिन्मते प्राङ्क्ष्व ङकारान्तो प्रसिद्धः उकारान्तो मघवन् शब्दः मघवा मघवानौ मघवानः म
घवन्तं मघवानौ मघोनः मघोना मघवभ्यां मघवभिः इत्यादि शेषं तद्वत् भवत् शब्दस्य भेदः भ
वत् इति स्थिते ऽकारः उगिदचां सर्वनामस्थानेऽधातोः ॥ अत्वसन्तस्य चाधातोः ॥ अत्व
न्तस्य असन्तस्य च धातुवर्जितस्य दीर्घो भवति असंबुद्धौ सौ परतः नुमागमे एवं भवत्
भवान् भवन्तौ भवन्तः संबुद्धौ विभाषा भवतु भगवद्वत् अघवतामोश्चावस्य ॥ इतिन

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰ पा॰ ५७

५८

कारस्य वा नत्वं अवमाह्नस्य वडोकारः हेभोः हेभवन् हेभवन्तौ हेभवन्तः भवन्तं भवं-
न्तौ भवतः भवता भवद्भ्यां भवद्भिः शेषं नेयं एवं भगवत् शब्दस्य वत्विस्येति तोऽकारानुबंधोऽ-
कारान्तो भगवन् भगवन्तौ भगवन्तः संबोधने नस्य रुत्वं अवस्य ओकारश्च विकल्पेन
हाते हेभगो हेभगवन् हेभगवन्तौ हेभगवन्तः एवं हे अघो हे अघवन् शत्रन्तस्य भव-
त् शब्दस्य भेदः स च त्रिलिंगः भवन् इति स्थिते ऋकारलोपः प्रयोजनम् उगितश्च
ति उगित्कार्यं ह्रस्वत्वात् स्याद्युत्पत्तिः हल्ङ्यादिलोपः उगिदचामिति नुमागमः १
संयोगान्तलोपः अत्वसन्तस्येत्यभावात् दीर्घो न भवति भवन् भवन्तौ भवन्तः हे भव-
न् हे भवन्तौ हे भवन्तः एवं पचन् प्रत्यया शत्रन्तः संज्ञायां वर्तमाने लट् लटः श-
त्रनुबन्धलोपः एवं वर्तमानेऽर्थे शप् इति शप्प्रत्ययः जह्नात्यादेः श्नः ॥ जह्नात्या-
दित्यदन्तस्य शपः श्लुक् भवति एकाचो द्वे प्रथमस्य अजादेर्द्वितीयस्येत्यधिकृत्य ॥ १
श्लौ परे सत्य अनन्त्यास्य धातोः अवयवस्य प्रथमस्य एकाचो द्वितीयस्य वा यथायोगं हे भ-
वतः स्वराश्रत् इति स्थिते ॥ पूर्वोऽभ्यासः ॥ अस्मिन् प्रकरणे यद्द्वे विहिते तयोः पूर्वो यो वयवो
अभ्याससंज्ञो भवति लोपोऽन्त्यास्य निवर्तमाने ह्रस्वः अभ्यासस्य ह्रस्वो भवति सार्वधा-
तुकमपित् ॥ सार्वधातुकं यदपित् ङिद्वद्भवति अभेअन्त्यस्य अस्मिन् प्रकरणे यद्द्वे-

डं॰ ५७

© Dharmartha Trust J&K. Digitized by eGangotri

विहिते न तत्र अपि सप्तमस्थिते अभ्यस्तसंज्ञो भवति ॥ श्नाभ्यस्तयोरातः ॥ श्ना इत्येतस्य
अभ्यस्तसंज्ञकस्य च आकारस्य लोपो भवति सार्वधातुके क्ङिति परतः ददत् इति
स्थिते उगिदचामित्यादिना नुमि प्राप्ते नाभ्यस्ताच्छतुः ॥ अभ्यस्तादंगादुत्तरस्य श
तुः नुमागमो न भवति ददत् ददतौ ददतः एवं दधत् प्रत्ययः ॥ अत्यागमे च वर्ज्ये ।
इति जक्षत्वमेव विशेषः जक्ष भक्षहसनयोः जक्ष इति स्थिते अकारः परस्मैपदार्थः ।
तथैव धातुसंज्ञायां लटः शत्रादेशः कर्तरि शप् तस्य अदिप्रभृतिभ्यः शप इति लुक् ज
क्ष इति स्थिते स्याद्यन्तवत् अलोपः ॥ जक्षित्यादयः षट् जक्षादयो षड् धातवः
जक्षत्स्व अभ्यस्तसंज्ञा भवति नाभ्यस्ताच्छतुरिति नुमः प्रतिषेधः जक्षत् जक्षतौ
जक्षतः एवं जागृ निद्राक्षये दरिद्रा दुर्गतौ चकासृ दीप्तौ शासु अनुशिष्टौ दीधीङ्
दीप्तिदेवनयोः वेवीङ् वेतिना तुल्ये इत्येतेषां धातूनां लटः शत्रादेशे कृते प्रयो
क्ते जाग्रत् दरिद्रत् शासत् चकासत् इत्यादीनामभिन्नानां ददत्प्रत्यये
नां च धातूनामभ्यस्तसंज्ञायां तथैव नुमागमप्रतिषेधे कृते जाग्रत् दरिद्रत्
ककारपकारान्ता अप्रसिद्धौ षकारान्तः पुंलिंगः विश् प्रावेश्यः स्याद्युत्पत्तिः हलि प
रे ते च व्रश्चभ्रस्जेत्यादिना षत्वं जश्त्वं चर्त्वं च विट् विशौ विशः शेषं नेय ताड्वत् ।

हं॰ पा॰ ४८

५१४६

शब्दस्यभेदः सवनत्वप्रसङ्गात् हन्ममः क्विरन्तः हन्प्रेर्न्तेणोः उकारेफयोः इत्संज्ञा
लोपः प्रयोजनं हरितोवेतिविशेषणं तथैवधातुसंज्ञायां इणपदेममिवप्रकृतीति
विग्रहेत्यसादिषु हन्मोनात्त्वचोनेकन्तु त्यदादिषुणुपदेषु हन्तोणतोरनालेवने
वर्तमानान्यप्रत्ययोभवति चकारङन्तिमुत् च श्रुतबपलोपादिषु एवंवचनात् ननु
हन्म इतिस्थिते हन्महशाहन्व धातुप्यितिवर्तमाने प्राप्तसर्वनाम्नः ॥ हन्महशाहन्तेपरे
षुसर्वनाम्नः आकारादेशोभवति सवर्णदीर्घः त्याद्यत्यत्निः क्विन्प्रत्ययस्यकुरिति
झलिपदान्ते चकुत्वं शाकारस्यविहितत्वात् तस्यासिद्धत्वात् प्रधानस्य हन्मापव
षकारः कुत्वं तस्यजश्त्वं गकारः तस्यापिचर्त्वं ककारः ताहक् ताहन्मोनाहश :
हेताहक् शोहन्मः ताहन्मशोमाः माताहन्म्याताहन्भिः शेषंतेय एवंयाहक् शा
ह्वः षकारान्तः त्रिलिङ्गाः रत्नत्रुषु शब्दः त्याद्यत्यत्निः झलिपदान्तेजश्त्वं चहेम् चर
तस्तुह षोषः शेषंतेयम् एवंद्विषित्यादयः षष्शब्दस्यभेदः तस्यबहुत्वार्थवाचित्वा
द्बहुवचनमेवभवति सांताषट् इतिषट्संज्ञायांषड्भ्योलुक् जस्शसोर्लुक् रजः
त्वं चर्त्वं चषट्षट्षड्भिः षड्भ्यः षड्भ्यः आमिषट्चतुर्भ्यश्चेतिनुमागमाः एवंस्या
पदसंज्ञायन्तुनामिकत्वेणेतिडकारस्यणकारः नकारस्यचष्टुत्वंणका टी॰ ४८

४२५

रः पुंसामपदुत्क्रम सकारांतः पुंलिंगः स्ववचं शब्दः स्याद्युत्पत्तिः अंत्वसंतस्य चाधातोः
रिति दीर्घः ॥ अन्यत्समानं स्ववचाः स्ववचसौ स्ववचसः संबोधनस्यैवं स्ववचसम् ।
स्ववचसौ स्ववचसः स्ववचसा स्ववचोभ्यां स्ववचोभिः पदसंज्ञायां सत्वे उत्वं शेषं नेयं
एवं सुचिन्मनस्प्रभृतयः अथ श्रेयस्शब्दस्य भेदः स्वचोकारानुबंधः स्वरितगिरचां सर्व
नामस्थाने इत्यादिना नुम् सान्तमहतः संयोगस्य सकारान्तस्य महतश्चोपधाया दीर्घो
भवति संबुद्धिवर्जिते सर्वनामस्थाने परतः श्रेयान् श्रेयांसौ श्रेयांसः हे श्रेयन् हे
श्रेयांसौ हे श्रेयांसः श्रेयांसम् श्रेयांसौ श्रेयसः श्रेयसा श्रेयोभ्यां श्रेयोभिः शेषं
नेयं एवं गरीयःपटीयःप्रभृतयः शब्दाः उकारानुबंधाः सकारान्ताः ॥ उशनश
ब्दस्य भेदः तस्य सौ ऋदुशनस्पुरुदंसोऽनेहसां चेत्यनङादेशः अन्यत्समानं उशना
उशनसौ उशनसौ हे उशनन् संबुद्धिविषये अनङ् इष्यते हे उशनन् नलोपो विप
क्षे इष्यते हे उशन न तथा चोक्तं संबोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तं
तमस्यति निर्विशेषि गुणाढ्यगतेन ससके व्याघ्रपदं वरिष्ठं शेषं नेयं पुरुदंसस् अने
हस् इत्येतयोरप्येवं रूपं विहस्शब्दस्य भेदः विदस्ताने इत्यः सान्तस्यैवात् लह
शब्दाः कर्तरि सान्तस्य नुक् अन्यघलनेन उणादिप्रत्ययेन लमसं नामस्येति शब्द

© Dharmartha Trust J&K. Digitized by eGangotri

इः
पाः
५०
50

निमित्ते गुणोऽप्राप्ते सार्वधातुकमपित् इति धातोर्ङित्वात् क्ङिति चेति प्रतिषेधः वि-
देः धातुकमपित् इतिर्वसुः विदेःशतुरस्य धातोः वसुआदेशो भवति उकारः वसोः संप्रसा-
रणमिति विशेषणार्थः विद्वस् इति स्थिते स्याद्युत्पत्तिः सर्वसर्वनामस्थाने उगित्सर्वनाम-
स्थाने नुम् इति नुमागमः सान्तमहतोः संयोगस्येति दीर्घः विद्वान् विद्वांसौ विद्वांसः हे वि-
द्वन् हे विद्वांसौ हे विद्वांसः विद्वांसं विद्वांसौ शसादावचि वसोः संप्रसारणं वस्वन्तस्य
भस्यानस्य संप्रसारणं भवति संप्रसारणाच्चेति पूर्वरूपत्वं षत्वं विदुषः विदुषा हलादौ
वसुस्रंसुध्वंस्वनडुहां दः इति सस्य दः विद्वद्भ्यां विद्वद्भिः विदुषे विद्वद्भ्यां विद्वद्भ्यः शे-
षं एवं दृष्टवत् पपिवस् प्रभृतयः पुम्स् शब्दस्य भेदः स्याद्युत्पत्तिः पुंसोऽसुङ् शब्दस्य स-
र्वनामस्थाने परे असुङ् आदेशो भवति अनुबन्धलोपः उगिदचामित्यादिना नुम् सोट
सान्तमहतोः संयोगस्येति दीर्घः हल्ङ्यादिलोपः संयोगान्तलोपश्च पुमान् पुमांसौ पु-
मांसः पुमांसं पुमांसौ पुंसः संयोगान्तलोपः पुंभ्यां पुंभिः पुंसे पुंभ्यां पुंभ्यः पुंसः पुंभ्यां
पुंभ्यः पुंसः पुंसोः पुंसां पुंसि पुंसोः पुंसां पुंसि पुंसोः पुंसु ॥ अदस् सर्वनाम त्रिलिंगः
यदा पुंलिंगः तदा रूपनयः स्याद्युत्पत्तिः अदस औ सुलोपश्च अदसः सोः परतः औकारा-
देशो भवति सुलोपश्च तदोः सः सावनन्त्ययोरिति दकारस्य सकारः केचित्सकारं हत्वा

डः
५०

स्य लोपं कुर्वंति असौ अन्यत्र त्यदाद्यत्वपररूपत्ववृद्धिः अदसो मे दादु दो मः ॥ अदसः
अकारस्य संबंधिनो दकारात्परस्य सवर्णमात्रस्य मकारात्परे उशो भवति दकारस्य मकार
श्च उकारः प्रयोगानुसारेण एकमात्रस्य एकमात्रः द्विमात्रस्य द्विमात्रः इति दीर्घो भ
वति अमणमघोः सर्वसवर्णः अद बहुवचने त्यदाद्यत्वं जसः शी गुणः अदे इति स्थिते उ
तरेह बहुवचने अदसः सकारस्य संबंधिनो दकारात्परस्य बहुवचने उत्वं त्रस्य नका
रस्य ईकारादेशो भवति दकारस्य च मकारः अमी अमि एवं बहुत्वं एवं रूपत्वं च अ
मुं अमू अमून् तृतीयैकवचने घिसंज्ञायां नाभावः अनुना न च एवं नामि द्विसिद्धि
त्वसूत्रस्यासिद्धत्वात् नाभावो न प्राप्नोति तेनेष दोषः न मुने नाभावे कर्तव्ये मुभावो नासि
द्धो भवतीति प्रतिषेधात् भवत्येव अमुना मि अत्वे दीर्घत्वं च कृते आ तत्र तस्य दीर्घ ऊकारः
स्य मः अमूभ्याम् भिसि अत्वे कृते ऐसि प्राप्ते नेदमदसोरकोरिति प्रतिषेधः पश्चादेत्वम्
एत ईद्बहुवचने इति ईत्वे मत्वे च अमीभिः ङित्सु उत्वयोरसिद्धत्वात् सर्वनाम्नः स्मै इति
स्मैभावः अमुष्मै अमूभ्याम् अमीभ्यः अमुष्मात् अमूभ्याम् अमीभ्यः अमुष्य अमुयोः अमी
षां अमुष्मिन् अमुयोः अमीषु ॥ हलंताः पुंलिंगाः समाप्ताः ॥ अथ हलंताः स्त्रीलि
गाः हकारांतः स्त्रीलिंगः उपानह् शब्दः उपपूर्वात् नह बंधने इत्यस्मात् क्विप्

© Dharmartha Trust J&K. Digitized by eGangotri

हैं॰ पा॰ ५१

51

अनुबंधलोपः एवंवत् नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ नह्यादिषु क्विपु
त्ययांतेषु परभूतेषु उपसर्गाकारस्य दीर्घो भवति स्याद्युत्पत्तिः नह्यः नहो हकारस्य ध
कारादेशो भवति झलि परतः पदांते च जश्त्वं च अनुस्वारसहिते उपानत् उपानहौ उपा
नहः संबोधनेपि तद्वत् उपानहा उपानद्भ्यां उपानद्भिः शेषं नेयं यकारांतः स्त्रीलिंगो
प्रसिद्धः वकारांतः स्त्रीलिंगः दिव्शब्दः तस्य पुंलिंगः दिव्शब्दवत् रूपनयः रे
फांतः स्त्रीलिंगः गिर्शब्दः गॄ निगरणे धातुः संपदादित्वात् क्विप् अनुबंधलोपः ॠत इद्धातो
ऋकारांतस्य धातोः इकारादेशो भवति क्ङिति परतः रपरत्वं स्याद्युत्पत्तिः र्वोरुप
धाया दीर्घ इकारः रेफवकारांतस्य धातोरुपधाया इकारो दीर्घो भवति झलि पदांते च रेफस्य
विसर्जनीयः ॥ गीः गिरौ गिरः एवमन्येपि तद्वत् सावयः चतुर्शब्दस्य भेदः तस्य स
र्वत्र त्रिचतुरोः स्त्रियां तिसृचतसृ इति चतसृ आदेशः अचि र ऋतः इति रेफादेशः चतस्रः
चतसृ चतसृभिः चतसृभ्यः चतसृभ्यः चतसृणां नामि इति दीर्घे प्राप्ते न तिसृचतसृ इ
ति प्रतिषेधः चतसृषु ॥ लकारसकारांतावप्रसिद्धौ मकारांतः स्त्रीलिंगः किंशब्दः
स्याद्युत्पत्तिः सर्वत्र किमः कादेशो वक्तव्ये आङाद्युपाबितिमपि वर्तते स्त्रीलिंगत्वे शा ङे॰
रूपवद्रूपनयः इदंशब्दस्य भेदः सोऽयमीमः इदंशब्दसंबंधिनो दकारस्य यकारादेशो भ ५१

वतिसौपरे हल्ङ्यादिलोपः इयं अन्वत्रत्वहायबहम् अङायउष्णाम् तवर्णदीर्घः इस्ये
तिद्कारस्य मकारः ऊङः धीभावादिद्भुमेद्भ्मा आङि अनाप्यकः अनादेशः एत्वे
अयादेशः अनया हलि लोप अस्यै आभ्यां आभ्यः आभ्यां आभ्यां आभ्यः अनयोः आ
सां अस्यां अनयोः आसु ॥ अन्वादेशविषये एनादेशः एनां एने एनाः एनया एनयोः
जकारणकारांतावप्रसिद्धौ नकारांताः स्त्रीलिंगः सीमन् शब्दः तस्य राजन् शब्दव
द्रूपनयः एवं पापन्ह्वामनत्वङराजन्महनयः संख्या शब्दाः पंचादयः नकारांताः स्त्री
षाउलिंगवद्रूपनयः फकारांतोप्रसिद्धः भकारांतः ककुभ् शब्दः तस्य झलि पदांते ।
वजश्त्व अवसाने त्वं ककुप् ककुभौ ककुभः शेषं नेयं मकारांतावप्रसिद्धौ धका
रांतः स्त्रीलिंगः समिध् शब्दः तस्यापि विशेषः समित् समिधौ समिधः शेषं नेयं एवं वी
रुधादयः जकारांतः स्त्रीलिंगः सज् शब्दः तस्यापि भषवत् शब्दवद्रूपनवः बगडांता अप्र
सिद्धः दकारांतः स्त्रीलिंगो दृशद् शब्दः तस्यापि विशेषः दृशत् दृशदौ दृशदः एव
शरत्संपद्विपदादयः उद् शब्दस्य भेदः अहेदृश तस्या उसौ तुदोः समासावनन्ययोरिति ङ
कारस्य मकारः हल्ङ्यादिलोपः सो अन्यत्सर्वं शब्दवत् नेनाः इत्यादि एवं यद् एतः
दृशाद्यो विपक्वतयानाप्रसिद्धाः चकारांताः स्त्रीलिंगः त्वच् शब्दः तस्य चोः कुरिति

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰ पा॰ ५२
52

कुत्वं त्वक् त्वचौ त्वचः शेषं नेयं एवं वाच् शब्दः छकारान्तो अप्रसिद्धः जकारान्तः स्त्रीलिंगः
विद्युत् शब्दः तस्य एवं वत् प्रक्रिया थकारान्तो अप्रसिद्धः पकारान्तः स्त्रीलिंगः अप् शब्दः
तस्य बह्वर्थवाचित्वात् बहुवचनमेव भवति जसि अप् शब्द इत्यादिना दीर्घः आपः शसि त्व
सर्वनामस्थानत्वात् दीर्घो न भवति अपः भकारादौ अपो भि अपः पकारस्य दकारादेशो भ
वति उकारादौ मत्वर्थे परे तत्वं अद्भिः अद्भ्यः अद्भ्यः अपाम् अप्सु। शकारान्तो दृश् शब्दः
दृश् इत्यस्मात् क्विप् एवं क्विन् सर्वं लोपः स्पृशाद्यन्तेभ्यः क्विन् अप्रत्ययस्य कुरि
ति कुत्वं शकारस्य ककारः दृक् दृग् दृशौ दृशः दृशा दृग्भ्यां दृग्भिः शेषं नेयं षकारा
न्तः त्विष् शब्दः तस्य पुंलिंगवत् द्विष् शब्दवद्रूपं नयेः सकारान्तः स्त्रीलिंगः सुवच् शब्दः त
स्यापि पुंलिंगः सुवचः शब्दवद्रूपं नयेः सकारान्तः स्त्रीलिंगः अदस् शब्दः तस्यापि पुंलिं
गः सुवचः शब्दवद्रूपं नयेः अदस् शब्दस्य भेदः तस्यैषा पुंलिंगवत् असौ अन्यत्र त्यदाद्य
त्वपररूपत्वयोः कृतयोः टाप् स्त्रीभावाय अदसो मेरादेशः एवं सवर्णदीर्घः अमू अमू
अमूः आङि एत्वं यकारादेशः अमुया अमूभ्यां अमूभिः ङे द्विवचने सर्वनाम्न्या स्याट् ह्रस्वश्च
अमुष्यै अमूभ्यां अमूभ्यः अमुष्याः अमूभ्यां अमूभ्यः अमुष्याः अमुयोः अमूषां अमुष्यां अ
मुयोः अमुषु ॥ इति हलन्ताः स्त्रीलिंगाः ॥ अथ हलन्ता नपुंसकलिंगाः ॥ तत्र हयवान्ता

ॐ॰ ५२

ग्रप्रसिद्धाः रेफान्तो नपुंसकलिङ्गः स्वर् शब्दः स्याद्युत्पत्तिः जस्शसोः शिः चतुरशब्दस्तु बहो॰
र्गम्यत्वात्: षण्णादेशः चत्वारि शेषं पुंवत् वार् शब्दस्य भेदः स्याद्युत्पत्तिः स्वमोर्नपुंसका
दिति स्वमोर्लुक् रेफस्य विसर्गः शोभावशोभावोवाः वारी वारि इत्येवं वस्त्रीभावशोभावौ॰
पुनरप्येवाः वारी वारि हे वाः हे वारी हे वारि शेषं पूर्ववत् वारा वार्भ्यां वार्भिः वारे वा॰
र्भ्यां वार्भ्यः शेषं नेयं लकारजकारान्तावप्रसिद्धौ मकारान्तो नपुंसकलिङ्गः किम्शब्दः स्या
द्युत्पत्तौ स्वमोर्लुक् प्रत्यलक्षणेन कादेशो प्राप्नोति न लुमताङ्गस्येति प्रतिषेधः कादेशो हि त
शोभावादिः किं कानि पुनरप्येवं शेषं पुंवत् शब्दस्य भेदः स्याद्युत्पत्तौ स्वमोर्लुक् प्रत्यय
लक्षणेन हश्चेति इकारस्य मकारादेशो न भवति न लुमताङ्गस्येति प्रतिषेधात् इदं अन
न्यलक्षणत्वपरहूपत्ये इश्चेति मकारः शोभावादि इमे इमानि २ शेषं पुंवत् ङकारणकारां
तावप्रसिद्धौ नकारान्तो नपुंसकलिङ्गः चर्मन् शब्दः स्याद्युत्पत्तौ स्वमोर्लुक् नलोपः
चर्म अन्यत्र शोभावाभ मस्ता या विभाषा ङिश्योरिति अल्लोपे प्राप्ते न संयोगाद्वमन्तादिति प्र
तिषेधः चर्मणी चर्माणि पुनरप्येवं शेषं पुंवत् संबोधने तथापि ॥ एवं कर्मन् वर्मन् मन्यात्ह
न्यः अहन् शब्दस्य भेदः स्याद्युत्पत्तिः स्वमोर्लुक् संमसजुषोरिति रुत्वे विहितस्य अहन् अह
न् शब्दस्य पदस्यान्ते भवति रूलिपदान्ते च रेफस्य विसर्गः अहः ओडि विभाषङिश्योरिति

© Dharmartha Trust J&K. Digitized by eGangotri

दे° पो° पत्र
५३

अल्लोपः अह्नी वा अह्नि अह्नानि इत्यन्यत्र पथ्येवं शेषं तद्वत् अह्नादेः हल्लादेः पदसंज्ञायां अहन्
इति स्थिते रुत्वं उत्वं गुणश्च अहोभ्यां अहोभिः शेषं नेयं पंचादीनां नकारांतानां नपुंसक
लिंगानां तु बहुरूपनयः पंचच्छत्रमप्रभृतीनां अप्रसिद्धाः ततः सत्यं विशेषं दकारांतानां न
पुंसकलिंगानां नलशब्दः स्वाद्युत्पत्तिः स्वमोर्लुक् प्रत्ययलक्षणं तत्सामर्थ्यत्वे प्राप्ते नलम
नागस्येति प्रतिषेधः अन्यत्र त्यदाद्यत्वे शौ भावादिति नलानि इत्यन्यत्र पथ्येवं शेषं तद्वत् त
थैव यद् यत् एतद् हलौ व्यपक्वयोनां अप्रसिद्धाः चकारांतानां नपुंसकलिंगाः प्राच्छब्दः
स च एवं वर्तिनि नः स्वाद्युत्पत्तौ स्वमोर्लुक् नलोपे संज्ञायां न चतुष्टयकारलोपः चावि
तिदीर्घः प्राक् प्राची प्रांचि इत्यन्यत्र पथ्येवं शेषं तद्वत् शौ नपुंसकस्य झलचः इत्यनेन अनुस्वा
रपरसवर्णौ शेषं पूर्ववत् एवं प्रत्यच् उदच् तिर्यच् सम्यच् प्रत्यचः दकारांतो प्रसिद्धः त
कारांतः शकृत् शब्दः स्वाद्युत्पत्तिः स्वमोर्लुक् शकृत् शकृती शकृंति इत्यन्यत्र पथ्येवं शे
षं नेयं अभ्यस्तसंज्ञकानां शतृप्रत्ययांतानां भेदः ददत् शब्दस्य इति स्थिते स्वाद्युत्पत्तिः ददत् दद
ती जक्षित्यादयः षड् इत्यभ्यस्तसंज्ञाः नपुंसकस्य झलचः इति नुमि प्राप्ते नाभ्यस्ताच्छतुः इति व
र्तमाने वा नपुंसकस्याभ्यस्तस्य नपुंसकस्य सर्वनामस्थाने वा नुमागमो भवति ददंति
ददंति ॥ ब्राह्मणकुलानि इत्यन्यत्र पथ्येवं एवं द्विकान्तानां धातुमाजत्वादीनां च इव

उ° पत्र

तन्वहृयेनाभ्यस्तसंज्ञायां विषये रूपभेदः स्याद्युत्पत्तिः अनभ्यस्तसंज्ञायामपि शासंता॰
नो रूपभेदः एवं वच्यात् इति ऋकार उगित्कार्यार्थः कृदन्तत्वात्प्रातिपदिकसंज्ञायां स्या
द्युत्पत्तिः धातोर्द्विवचने आस्थीनयज्ञुमितिवा तु वत्तीवायाज्ञी शोन उत्तकस्य गत्वं च
इति नुं उनरघ्येवं शेषं पूर्ववत् एवं पचत्प्रभृतयः भवत् इति स्थिते ऋकारः उगित्कार्यः
स्याद्युत्पत्तिः स्वमोर्लुक् भवत् द्विवचने शप्प्रत्यये नित्यमिनुमागमः भवन्ती भवन्ति शे
षं पूर्ववत् एवं देवयत्प्रभृतयः एवमस्मिन्नहृयेरूपभेदे न षडन्ता इष्यन्ते ककारघका
रघकारान्ता अप्रसिद्धाः षकारान्तास्तु सर्वलिंगाः षष्शब्दः तस्य उलिंगवद्रूपं तथा
सकारान्तः पयस्शब्दः स्याद्युत्पत्तिः रुत्वविसर्गौ पयः पयसी पयांसि इह वन्नुदीर्घः नञ्चा
पदान्तस्य रुत्वे तान्यनुस्वारः शेषं नेयं एवं तेजस् यशस् वचस् वयस् प्रभृतयः अदस्श
ब्दस्य भेदः स्याद्युत्पत्तिः स्वमोर्लुक् उत्वविसर्गौ अदः अन्यत्र त्यदाद्यत्वपररूपत्वं च अदः
से मेमा उदो मः इति नत्वं मत्वं च अमू अमूनि उत्तरत्र शेषं नेयं ॥ इति हलन्ता नपुंस
कलिंगाः समाप्ताः ॥ अथ हलन्तेषु लिंगेषु भेदः सम्भाव्यते तेन यो स्त्रीलिंगवाचित्रि
लिंगे उत्तमाने रूपं कथं त्वत् उमानु त्वन्तोत्वनउत्तमकं अहं उमानु अहं त्वौ अहं नपुंसक
युष्मदस्मदि विभक्तिस्थिते तथैव स्याद्युत्पत्तिः युष्मदस्मद्भ्यां ङसोऽमामित्यपि विहत्य ङे प्रथमयो

© Dharmartha Trust J&K. Digitized by eGangotri

दूं: पा: ५४ 54

रम् ॥ युष्मदस्मद्भ्यामुत्तरस्य ङे इत्येतस्य प्रथमाद्वितीययोश्च विभक्त्योः अमादेशो भव
ति मपर्यन्तस्येत्यपि कृत्वा ह्याह्यौ सौ युष्मदस्मदोः परस्य ङयि परतः तुभ्य मह्य इत्येतावादेशौ
यथासंख्येन ॥ शेषे लोपः शेषे विभक्तौ परतः युष्मदस्मदोः दकारस्य लोपो भवति य
त्र विभक्तौ वहंमात्यंवनाभिहितं स शेषः अमि एवं इति प्रवरूपत्वं त्वम् अहं तथैव द्विव
चनस्यादेशः युवावौ द्विवचने युष्मदस्मदोः मपर्यन्तस्य द्विवचने परतः युव आव आदे
शौ भवतः अष्टन आ विभक्तावित्यपि कृत्वा युष्मदस्मदोः आ आदेशः इत्यनुवर्तमाने प्रथ
मायाश्च द्विवचने भाषायां ॥ प्रथमाया द्विवचने परतः युष्मदस्मदोः आकारादेशो भवति
भाषायां स्वरोत्सर्गाणि: अमि एवं त्वंस्युवां आवां जस्लत्थैव प्रमादेहेशोहते यूयवयौ जसि
युष्मदस्मदोः पर्यन्तस्य यूय वय इत्येतावादेशौ भवतः जसि परे शेषलोपः अमि एवं त्व
यूयं वयं अमेपि तथैवादेशः त्वमावेकवचने युष्मदस्मदोर्मपर्यन्तस्य चैकवचने त्वम
इत्येतावादेशौ भवति द्वितीयायां च द्वितीयायां विभक्तौ परतः युष्मदस्मदोराकारादेशो
भवति सवलदीर्घः अमि एवं इत्यस्य एवं त्वं मां द्विवचने एवं वयं युवां आवां भवतः द्वितीया
चेत्यात्वं युवां आवां शसो मासि प्राप्ते शसो मानः ॥ युष्मदस्मद्भ्यामुत्तरस्य शसः नकारादे ठे: ५४
शो भवति न चादेः परस्य परस्य विधीयमानं कार्यं परस्यादेरकारस्य भवति द्वितीयाया

© Dharmartha Trust J&K. Digitized by eGangotri

वेत्यात्वं सवर्णे दीर्घः संयोगांतस्य लोपः युष्मान् अस्मान् तृतीयैकवचने त्वमावे
कवचने इति त्वमौ भवतः युष्मदस्मदोरनादेशे इति वर्त्तमाने योचि युष्मदस्मदोर्द
कारस्य यकारादेशो भवति अनादेशे अचि विभक्तौ परतः त्वया मया सवर्णे दीर्घः त्वामि
यत्वौ भवतः युष्मदस्मदोरनादेशे आकारादेशो भवति विभक्तौ परतः सवर्णे दीर्घः
युवाभ्यां आवाभ्यां भिसि युष्मदस्मदोरनादेशे इत्यात्वं सवर्णे दीर्घः युष्माभिः अस्मा
भिः चतुर्थ्येकवचने ङे अथ मध्योरमित्यनेन तुभ्यमह्यौ ङयि युष्मदस्मदोरन्त्यपर्यंतस्य ङे प्र
त्यये परे तुभ्यमह्यौ इत्येतावादेशौ भवतः शेषे लोपः अमि एवं तव तुभ्यं मह्यं द्विवचने
युवाभ्यां आवाभ्यां बहुवचने ॥ भ्यसोभ्यम् युष्मदस्मद्भ्यां उत्तरस्य भ्यसो भ्यमादेशो भ
वति शेषे लोपः युष्मभ्यं अस्मभ्यं अस्मभ्य अग्रहणेनेतनदेतो वविधिरिति स्थितिव
चनात् पत्वेन भवति पंचम्या अद्दित्यधिकृते ति एकवचनस्य च युष्मदस्मद्भ्यां उत्तरस्य
पंचम्येकवचनस्य अदादेशो भवति त्वमावेकवचने शेषे लोपः पररूपत्वं त्वत् मत्
युवाभ्यां आवाभ्यां ॥ पंचम्या अत् युष्मदस्मद्भ्यां उत्तरस्य पंचम्या भ्यसः अदित्ययमा
देशो भवति शेषे लोपः अतो गुणे इति पररूपत्वं युष्मत् अस्मत् षष्ठ्येकवचने यु
ष्मदस्मद्भ्यां ङसो श अस्मदस्मद्भ्यां उत्तरस्य ङस इत्ययमादेशो भवति अकारस्य वोहे

© Dharmartha Trust J&K. Digitized by eGangotri

तै॰ पा॰ ५५

55

ङार्थे: तत्समानस्य युष्मदस्मदोः प्रत्ययः पर्यन्तस्य तवममङ्इत्येतावादेशौ भवतः ङसि
परतः शेषे लोपः परश्रूपत्वं तव मम ङसि यवावौ भवतः योऽचि इति यकारः युवयो
आवयोः आमि शेषे लोपः कस्य शेषः पंचम्याश्चतुर्थ्याश्च षष्ठी प्रथमयोरयि यात्वहि
वचनान्यत्र शेषे लोपः विधीयते आमि सर्वनाम्नः सुडिति सुडागमः साम आकं युष्म
दस्मद्भ्यामुत्तरस्य साम आकमादेशो भवति सवर्णे दीर्घः युष्माकं अस्माकं ङौ तथे
त्वमौ भवतः योऽचि इति यकारः त्वयि मयि ङौ युवयोः आवयोः सुपि युष्मदः अस्मदो
रत्वादेशः इत्यात्वं सवर्णे दीर्घः युष्मासु अस्मासु अनुवर्तनानयोरेवास्मदस्मदोः षष्ठीच
तुर्थीद्वितीयास्थयोः क्वचित्पदात्परयोः विधानाङ्गेषु उत्रो युवयोः स्वमः उत्रो आवयोः
स्वराजा युवाभ्यां दास्यति राजा आवाभ्यां दास्यति शिवो वां युष्माकं रक्षतु शिव आवां
रक्षति एवं स्थिते पदस्य परत्वात् अनुयातं सर्वे न पादादौ वित्यधिकृत्य षष्ठीचतुर्थीद्विती
यास्थयोर्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः परान्तयोः पादादौ वर्त
मानयोः वांनौ इत्येतावादेशौ भवतः यथासंख्येन संहिता अन्यो वां स्यात् उत्रो वां दास्यति उ
त्रो नौ दास्यति शिवो वां रक्षतु शिवो नौ रक्षतु तयोरेव बहुवचनान्तयोः तस्मिन्नेवाधि
कारे युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनौ वित्यधिकृत्य बहुवचनस्य वस ङः ५५

© Dharmartha Trust J&K. Digitized by eGangotri

सौ ॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाबहुवचनांतयोः वस्नसावित्येतावादेशौ
भवतः यथासंख्येन वांनावोरपवादः पुत्रो वः स्वं पुत्रो नः स्वं पुत्रो नो ग्रास्यति पुत्रो॰
वो दास्यति पुत्रो वो रक्षति पुत्रो नो रक्षति ॥ तथैवैकवचनांतयः युष्मदस्मदोः षष्ठी
चतुर्थ्येकवचनापन्नांतयोः त्वस्योः अपादानादौ वर्तमानयोः तेमे इत्येतावादेशौ भ
वतः यथासंख्येन संहितायां पुत्रस्ते स्वं पुत्रो मे स्वं पुत्रस्ते दास्यति पुत्रो मे दास्यति द्वासा
द्वितीयायाः द्वितीयैकवचनांतयोः युष्मदस्मदोः त्वामा इत्येतावादेशौ भवतः संहितायां
पुत्रस्त्वा रक्षतु पुत्रो मा रक्षतु सर्वं पूर्ववत् ॥ नावादयो द्वादेशा विषये विभाषा वक्तव्ये
ति वचनाद् विकल्पेन भवंतीति तेयं कम्बलस्ते स्वं कंबलं तव स्वं कंबलो मे स्वं कं
बलो मम स्वं अन्वादेशे इति किं ग्रामो ते ग्रामः ग्रामो मे ग्रामः ॥ न चवाहाहैवयुक्ते ॥ १
च वा ह अह एव इत्येतै ॥ युक्तान्त्यापरयोर्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीया
स्थयोः वांनावादयो न भवंति पुत्रो युष्मयोश्च स्वं पुत्र आवयोश्च स्वं पुत्रो युष्मभ्यं वा आभ्यां च
दास्यति पुत्र आवाभ्यां च दास्यति देवो युवां चावां च रक्षतीति एवं वा ह अह
एव इत्येतैर्योगे मंतव्यं पश्यार्थैश्चानालोचने चक्षुषा दर्शनमालोचनं न॰
आलोचने अनालोचने ज्ञानार्थैरनालोचने वर्तमानैर्योगे युष्मदस्मदोर्वांनावा

© Dharmartha Trust J&K. Digitized by eGangotri

नु॰ पा॰ ५६ 56

ह्येकेनभवति ग्रामस्तव स्वगृहंतमेत्यागताः ममस्वंमद्भ्यंहीयमानंतमोत्यागतः
त्वभ्यंच ग्रामःस्वंतमोत्यागतः मांचस्वनालोचनेइतिकिं उष्णःस्वांपश्यतिमापश्य
ति ॥ अथलिंगसंख्याविभक्तिभेदानिअसंख्यानिविधानि न्यूभुत्यत्नेःसर्वंतानीति।
संक्षेपेणाव्ययंतेनतथाचोक्तं सदृशंत्रिषुलिंगेषु सर्वासुचविभक्तिषुवचनेषुच
सर्वेषुयन्नव्येतितदव्ययं ॥ अथस्वरादिनिपातमव्ययंस्वरादयश्चनिपाताश्चाव्ययसंज्ञा।
भवंतिकेपुनःस्वरादयः स्वर् अंतर् प्रातर् पुनर् उच्चैस् नीचैस् शनैस् ऋते युग
पत् आरात् पृथक् तिरस् ह्यस् श्वस् दिवा सायम् चिरम् मनाक् ईषत् आहु बहिस्
स्वयम् नक्तम् सामि चित् अंतरा विना नाना स्वस्ति अस्ति दोषा मिथ्या मुधा मि।
थस् वशस् मुहुस् साकम् सार्धम् अभीक्ष्णम् प्रायःस् अत्यंताश्च आसमा
प्ति स्त्रियवदित्येवमादयः स्वरादयः तत्र स्वरित्येतस्मात्स्वाद्युत्पत्तिः प्रथमैकवचनेसत
स्याव्ययादाप्सुपइति लुग्विधानात्सर्वत्रैवैकरूपं एवमन्यस्मादपि तथाच पुन :
निपातसंज्ञकाः च वा ह अह एव एवं नूनं शश्वत् वेत् नम् नाह यत्र तत्र हन्त
अमानो नाप्रतिषेधे वषट् स्वाहा ओम् तथा यदि हि इह किल अथ सम् यावत् उं॰
त् तावत् किल किं स्म उत पिक हा हाहा आहो स्वित् ननु अहो अथो इति सन्त ५६

© Dharmartha Trust J&K. Digitized by eGangotri

नन्वेवं अपस्य जातु कथं जनः यतः तः ततः यदा तदा अये स्वरा अंग कश्चित् ।
अये अहे भूयं अले हे सहु उरत् नरत् कामम् आ ओ स्त आस्थ नोहि नहि अंत
रेण रह मत्र रे सर्वादिमानानाम् उपसर्गविभक्तिस्वरप्रति रूपकाश्चादयः पत्यस्याद्य
न्ताः प्रादयोऽसत्त्वे निपाता इत्यपि कृत्वा चादयो सत्त्वे सत्त्वे द्रव्ये असत्त्वे अद्रव्ये वर्त
मानाश्चादयो निपातसंज्ञा भवन्तीति निपातसंज्ञायां स्वरादिनिपातमव्ययमित्यव्यय
संज्ञायां अव्ययादाप्सुपःइति सेः लुग्भवति ॥ इति विभक्तिविचारः समाप्तः ॥ अ
थ स्त्रीप्रत्यया निर्दिश्यन्ते ॥ प्रत्ययपरस्त्वात्प्रातिपदिकात्स्त्रियामित्यपि कृत्य ।
अजाद्यतष्टाप् ॥ अजादीत्यात्वावाता प्रातिपदिकात्स्त्रियां ज्या प्रातिपदिकादित्य
त्रासति पकारेस्य ग्रहणं न स्यात् टकारलोपः प्रयोजनं आबिति सामान्यग्रहणं वि
ज्ञातार्थः असति हि तस्मिन्नेकारानुबन्धग्रहणे नानुबन्धकस्येत्यस्यैव ग्रहणं स्यात्
नडाश्चापोः अकः सवर्णे दीर्घः एडका अजा कोकिला अश्वा चटका वडवा मूषि
का बाला वत्सा इत्येवमादयः अजादयः अकारान्तात् स्त्री दत्ता जाया जाया वाबे
हृद्दा लविगा मत्तिका पिपीलिका क्षत्रिया ज्वालामाला देवदत्ता इत्यादयः सर्वे ।
अजादिग्रहणं किं बहवो राजानो यस्यां नगर्यां इति विग्रहे अनेकमन्यपदार्थे इति ब

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰ पा॰ ५७ 57

ङ्ब्रीहिः सुपोधातुप्रातिपदिकयोरिति सुपोलुक् सीमन्तबङ्गराजन् इत्येवंस्थिते
अन्तेन्त्यडीपृइति डीपिप्राप्ते नषट्स्वस्रादिभ्य इत्यपि निषेधात्सिमनः मनन्तात्प्रातिपदिकत्वद्वियो
डीपृप्रत्ययो न भवति ततस्त्रियामित्यपिङ्गत्वट्डाबुभाभ्यामन्यतरस्यां मनन्तात्प्रातिपदि
कात् अनन्तहाश्चबङ्ब्रीहेः स्त्रियांडापृप्रत्ययो भवति अन्यतरस्यांडकारलोपः प्रयोजनं
नेर्विंशते स्त्रितीति विशेषणोपकारः सचाभ्यवहरणार्थः यद्विभमिति एवंस्य भसंज्ञायांअग्र
स्य भस्याल्लोपो नस्तेर्विंशतेर्त्तितीत्यपि हृत्यटेः डिङिति प्रत्यये परे भगस्यांगस्य टेः लोपो भ
वति सीमासीमा बङ्गराजा अन्यत्र राजन्शब्दवत् उष्ट्रमुख शब्दाद्धेकवचनं गंधशब्दात्प
ष्ठेकवचने उष्ट्रस्यैव गंधोयस्येति विग्रहे अनेकमन्यपदार्थे इति बङ्ब्रीहिः सुलोपाल्लु
क् उत्तरार्थानामप्रयोग इति इवशब्दस्य लोपः उष्ट्रगंध इति स्थिते गंधस्य इत्वन्निरूपमाद
न्यपि हृत्य उपमानाच्च समासान्तः उपमानवाचीयो गंधशब्दस्तदन्तात्समासादित्प्रत्ययो
भवति इकार इत्संज्ञक उच्चारणार्थः तथैव भसंज्ञायां यस्येति चेत्यकारलोपः उष्ट्रगंधि
इति स्थिते उष्ट्रगंधिर्नाम कश्चित्तस्य उष्ट्रगंधेरपत्यमिति विग्रहे तद्धितः समर्थानां प्रथ
माद्वाप्राग्दीव्यतोण् इत्यपि हृत्य तस्यापत्यं तस्येति षष्ठीसमर्थादपत्यमित्येतस्मिन्न
र्थे यथाविहितं प्रत्ययो भवति तागोत्रे एप्रत्ययः णकारः अचोञ्णितीति हृद्यर्थः इञ्छिता ठं॰ ५७

© Dharmartha Trust J&K. Digitized by eGangotri

इति तद्धितसंज्ञायां कृत्तद्धितसमासाश्चेत्य प्रातिपदिकसंज्ञायां स्वपोयात्त्र प्रातिपदिकस्य
योरिति सुपो लुक् । तद्धितेष्वचामादेः इति णिति च तद्धिते परे अंगस्यादेरचो वृद्धिर्भवति
भसंज्ञायां अंगस्य भस्य नस्तद्धिते टेर्लोपो काण्ठ्वत्यपि कृत्यप्रत्ययस्येति च ॥ इवर्णावर्णयो
र्लोपो भवति ईकारे प्रत्यये भसंज्ञानिमित्ते च तद्धिते परतः इत्यकारस्य लोपः ज्ञत्रुद्रुंगय इ
ति स्थिते संयोगे गुरु इति गुरुसंज्ञायां अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे इत्यनेन श
ब्दः स्वभावात् त्रिप्रभृतीनामन्त्यात् समाहृ उत्तमस्य समीपमुपोत्तमं उपोत्तमं संयोगा गु
रोनार्षयोः न्ऋषिवाचकयोः गोत्रे विहितयोः ष्यङ् प्रत्ययो भवति षकारस्य प्रत्ययस्य प्रत्य
यस्यादिभूतस्य षकारस्येत्संज्ञा भवति षकारङकारलोपः प्रयोजनम् ष्यङः संप्रसार
णे पुत्रपत्योः [illegible] इति विशेषणायस्येति चेत्यकारलोपः यङश्चाप् यङ
न्ताच्चाप् प्रत्ययो भवति स्त्रियां पकारलोपः एवं वत्सकारस्थित इत्यतो [illegible] सवर्णे
दीर्घः कौमुदगन्ध्या इति स्थिते गत्योप्यवंत हात्वाद्यात्यन्तिः जायाशब्द बहुव्रीहिः को
मुदगंध्यावो मुदगंध्यो कोमुदगंध्याः इत्यादि पूर्ववद्बोधगन्ध्याद्यः कर्ता ऋन्नेभ्यो ङीप्
ऋकारान्तेभ्यो नकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति ङकारस्य लश
क्वतद्धिते इतीत्संज्ञा लोपः प्रयोजनं ङीति सामान्यग्रहणं पकारस्य हलन्त्यमितीत्संज्ञा।

© Dharmartha Trust J&K. Digitized by eGangotri

वृं॰ पा॰ ५८ 58

लोपः प्रयोजनं मातीति सामान्यग्रहणार्थः ङकारः पकारः अनुदात्तौ स्थापितावित्यनुदा
त्तार्थः इको यणचीति ऋकारस्य रेफः कर्त्री एवं हर्त्री स्रष्ट्री भवित्री वक्त्री दंतिनी हस्तिनी
दंडिनी इत्यादि भवत् गोमत् कृतवत् पचत् यजत् पचामः उकार ऋकारलृगित्याद्यर्थो
पकारः स्वरार्थः ॥ उगितश्च ॥ उगिद्भ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप्प्रत्ययो भवति अनु
बंधलोपः प्रयोजनं पूर्ववत् भवती गोमती पचन्ती कृतवती यजती महती इत्यादिने
ये ॥ वयसि प्रथमे ॥ कालकृता शरीरावस्था शैशवयौवनादिर्वयः अस्मिन्प्रथमे वयसि
यत्प्रातिपदिकं अदन्तं वर्तते तेन तत्ककारांतात् स्त्रियां ङीप्प्रत्ययो भवति अनुबंधलोपः प्र
योजनं पूर्ववत् यस्येति चेत्यकारलोपः कुमारी किशोरी तरुणी इत्यादि प्रथमे इति कि
स्थविरा वृद्धा अज इत्येव सिद्धः ॥ कृदिकारादक्तिनः ङीष्वा कृत इकारः कृदिकारः उ
दन्तात् ङी भवति वक्तव्यमिति ङीष्प्रत्ययः प्रत्ययेन संबंधी इकारस्तदन्तान्न भवति ङ
कारषकारौ ङीपीति सामान्यग्रहणात् विघातार्थौ यस्येति चेत्यकारलोपः अङ्गुली अ
ङ्गुलिः आली आलिः आवली आवलिः पद्धती पद्धतिः धूली धूलिः रात्री रात्रिः इत्या
दि अक्तिन इति किं कृतिः अकृतिः मतिः स्वाभिः वोतो गुणवचनात् अन्यतो ङीषिति
वर्तते गुणमुक्तवान् गुणवचनः गुणवचनात्प्रातिपदिकात् उकारांतात् स्त्रियां ङीष्

ङी॰ ५८

© Dharmartha Trust J&K. Digitized by eGangotri

त्ययो वा भवति अनुबन्धलोपादि पूर्ववत् यणादेशः पङ्गुः पङ्गूः श्वश्रुः श्वश्रूः एव
मुखी उरुरुवौ त्यादि गणावचनादिति किं शाम्भवीयं जाते स्त्रीविषयादयोपधा
तु जातिवाचिनः प्रातिपदिकान्न च स्त्रियामेव नियतं स्त्रीविषयं न यकारोपधं चेत्तस्मा
त्स्त्रियां ङीष् प्रत्ययो भवति अनुबन्धलोपादि पूर्ववत् हंसः उभानु हंसी स्त्री एवं कूर्मी
ऊङुतः ॥ शूकरी आर्या ब्राह्मणी वृषली नदी भ्यामिजाते रिति किं मुण्डा अस्त्रीविष
यादिति किं मक्षिका अयोपधादिति किं क्षत्रिया ॥ शार्ङ्गरवाद्यञो ङीन् शार्ङ्गरवादे
त्येवमादित्य अयं तेत्र प्रातिपदिकेभ्यः स्त्रियां ङीन् प्रत्ययो भवति शार्ङ्गरवी अञ्
न्तेभ्यः बिदस्य स्त्री बैदी औरी गौतमी गार्गलवी गोभिली त्यादि पत्ये पिण्डात तत्वाय
त्ये नीतत्याक ज्ञी शब्दवद्रूपनयः ॥ ऊङुतः ॥ मनुष्यजातिरिति वर्तते उकारान्तात्
प्रातिपदिकान्मनुष्यजातिवाचिनः स्त्रियां ऊङ् प्रत्ययो भवति ङकारो न स्थानेति ति वि
शेषणार्थः अकसवर्णे दीर्घः अन्तादिवच्चेत्येकादेशः सवर्णे प्रत्ययवत्प्रातिपदि
कत्वादिवन्मवतीत्यादिवत्सा वा प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः ब्रह्मबन्धूः वीरब
न्धूः इत्येवमादयो गन्तव्याः ॥ यूनस्तिः ॥ युवन् इत्यस्मात् प्रातिपदिकात् स्त्रियां
ति प्रत्ययो भवति तस्य तद्धितत्वात् प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः सविशब्दव

© Dharmartha Trust J&K. Digitized by eGangotri

रू॰ पा॰ ५५ 59

रूपमयः यावतिः यावतीः यावन्तय इत्यादिन लोपः प्रातिपदिकान्तस्येति नलोपः
इति लोपः प्रत्ययावतारः ॥ यद्यर्थान्तरनिरपेक्षाणामक्षरस्य विहितत्रिः सम्भवः प्रातिपदि
कार्थः अत्र ग्रहणं रूपलक्षणं अर्थवद्वत् अत्र विभक्तिक्रमः प्रदर्श्यते ॥ कास्त्रवि
भक्तयः स्वपलिन स्वतन्त्ररूपः सप्तविभक्तयः सिऔजस इति प्रथमा अम्औशसिति
द्वितीया टाभ्याम्भिसिति तृतीया ङेभ्याम्भ्यसिति चतुर्थी ङसिभ्याम्भ्यसिति पंचमी ङस
ओसामिति षष्ठी ङिओस्सुविति सप्तमी कस्मिन्नर्थे प्रथमा प्रातिपदिकार्थलिंगप
रिमाणमात्रे प्रथमा प्रातिपदिकार्थः सत्ता लिंगस्त्रीनपुंसकादि परिमाणमस्याभिव
चनमेकत्वद्वित्वबहुत्वानि प्रातिपदिकार्थमात्रे लिंगमात्रे परिमाणमात्रे वचनमा
त्रे प्रथमा विभक्तिर्भवति किंच प्रातिपदिकं अर्थवदधातुरप्रत्ययः प्रातिपदिकं अ
भिधेयवचनोर्थशब्दः अर्थवच्छब्दरूपं धातुप्रत्ययान्तवर्जयित्वा प्रातिपदिकसंज्ञो
भवति कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञा भवन्ति अप्रत्यय इति एवं सत्युपपदसमा
सः नस्यपदार्थस्य चानेन प्रातिपदिकसंज्ञा विधीयते अर्थवत्सूत्रे समासग्रहणंतमास
ग्रहणं नियमार्थं तेन वाक्यस्यार्थवतः प्रातिपदिकसंज्ञा न भवति कस्यचिद्दृष्टव्या
चकं प्रातिपदिकमित्यर्थः तत्र प्रथमायां तु सुपोलोपः एवं वर्तहत्तः सः हत्तौ ना

डों॰ ५५

© Dharmartha Trust J&K. Digitized by eGangotri

हलाबेतेनयासर्वत्तः सर्वतौसर्वताः ऊंजरःऊंजरौऊंजराः अप्ष्याःअप्ष्यौअप्ष्याः वपुः
वहौवहाः नौःनावौनावः देवविद्देवविदौदेवविदः हंतिनौहंतिनौहंतिनः १
अप्डःअप्डौअप्डाः एवंसर्वत्रयोज्यंसंबोधनेचप्रथमेतिवर्तते आदिशुल्मेकारणेसंबो
धनं उद्दीपिवंप्रातिपदिकार्थेप्रथमानप्राप्नोतिवचनमारभ्यतेतेनसंबोधनेर्थेप्रथमा
विभक्तिर्भवतिसामंत्रितं संबोधनेयाप्रथमाविहितासंतंज्ञंभवतिहेदे
वदत्तपाहि हेयज्ञदत्तत्रवातिष्ठ अरेविस्मरन्माआगाः हेतातंशुत्त्वदेवेसमीप्या
गौः याहिसंबोधहिवचनेन हंसोरमेषाऽत्वनोऽत्वनौवरयाऽजनारौमेवरमासाथाकहाः
रथ्याचकोकिलोगजोनहेजिह्मोयाषापदोधायाचपादपावडवचनेप्राग्यायतिमा
ऽमागछतहतासंयमच्छेरयान् तपस्विनःतमहंच वीरुधःफलताभुना उत्यंव
सर्वत्रयोज्यं कस्मिन्नर्थेद्वितीयाकर्मणिद्वितीयाअनभिहितइतिवर्ततेतिंङ्कृत्तद्धित
समासैरणभिहितेअनुक्तेअनिर्दिष्टेकर्मणिकारकेद्वितीयाविभक्तिर्भवतिकिंकर्म
कर्तुरीप्सितंकर्मकर्तांक्रियययाप्राप्तमिष्टतमंतत्कारकंकर्मसंज्ञंभवति अन्नंभुंक्ते
कटलोपालसमन्वबह्रणतिहृदंस्खित्रातिवाटंकरोतिग्रामंगच्छति ॥ अकथितंच ॥१
अपादानादिभिर्विशेषकारकैर्यदकथितं तत्कारकंकर्मसंज्ञंभवतिदेवदत्तंभोजनं

© Dharmartha Trust J&K. Digitized by eGangotri

हे॰
पा॰
६०
60

याचते धनं सज्जनः मार्गं माणवकं पृच्छति अजां ग्रामं नयति उक्तः देवं हरिणी तेह्यर्थो वंद
मसौ पश्यति सानवकोऽन्तिनः पश्यति अन्तिते नौ गुरुमानोपपश्यति पूतानि गीतेते का
कान्विध्यति कवः करोति वेधानधीते देवानामन्ति गुरुन्वाविवस्यति प्रियान्प्रीणयति
इत्यव्वदयेत्नं उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि
दृश्यते उभयतो ग्रामं सर्वतो ग्रामं तप्पर्यं परि ग्रामं अधोधो ग्रामम् धिग्देवदत्तम् अभितः
परितः समयानिकषाहाप्रतियोगेऽपि दृश्यते अभितो ग्रामं परितो ग्रामं समया ग्रामं नि
कषा ग्रामं हा देवदत्तं बुभुक्षितं न प्रतिभाति किंचित् अकथितेन कर्मयुह्रियाचिन्तिधिअ
च्छिमहितिविश्वयोगेनिमित्तसहदेवविपाञ्जविशासि युणानवयत्सवनेनसाकीतितमा
चरितं कविना अन्तरान्तरेणयुक्ते द्वितीया विधीयते अन्तराशब्दान्तरेणशब्दौ निपातौ
एतत्ताभ्यां योगे द्वितीया विभक्तिर्भवति षष्ठ्यपवादोऽयं योगः अन्तराशब्दो मध्यमार्थः
यस्तान माञ्चवेशो अन्तरेणशब्दो वर्जितस्य विनार्थे अन्तरा नदीं अन्तरा त्वां मां च कमण्डलुः अ
न्तरेण पुरुषाकारं न किंचिल्लभ्यते अन्तरेण देवदत्तो च विश्वामित्रः अन्तरेण हरिं किं जीवि
तेन अन्तरा चक्रं कमलः अन्तरेण बलानि चरति नश्रमं वी अन्तरेण वाजिनः केन पु॰ उ॰
ज्यते उत्तमाहिमवंधाकालाध्वनोरत्यन्तसंयोगे कालशब्देभ्योऽध्वशब्देभ्यश्च द्वितीया विभक्ति ६०

© Dharmartha Trust J&K. Digitized by eGangotri

ंभवति अत्यन्तसंयोगे गम्यमाने क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः संबंधः अत्यन्त
संयोगे मासमधीते संवत्सरमधीते मासं कल्याणी मासं गुडधाना अध्वनः खल्वपि क्रो
शमधीते क्रोशं कुटिला नदी योजनं पर्वतः अत्यन्तसंयोग इति किं मासस्य द्विरधीते क्रो
शस्यैकदेशे पर्वतः गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि गत्यर्थानां धा
तूनां चेष्टाक्रियाणां परिस्पन्दक्रियाणां कर्मणि कारके अध्ववर्जिते द्वितीयाचतुर्थ्यौ
भवतः ग्रामं गच्छति ग्रामाय गच्छति ग्रामं व्रजति ग्रामाय व्रजति गत्यर्थ इति किं ।
ओदनं पचति कर्मणीति किं अश्वेन व्रजति चेष्टायामिति किं मनसा पाटलिपुत्रं गच्छ
ति अनध्वनीति किं अध्वानं गच्छति अध्वशब्दस्य ग्रहणं पंथानं गच्छति आस्थितप्रति
षेधश्चायं विज्ञेयः आस्थितः संप्राप्त आक्रान्त उच्यते यत्र ह्युत्पथेन पंथानं गच्छतीत
त्र भवतीव मेव चतुर्थी पथे गच्छति द्वितीयाग्रहणं किं न चतुर्थ्येव विकल्पेन अप
वादविषयेपि यथा स्यात् ग्रामं गन्ता ग्रामाय गन्ता कृद्योगलक्षणा षष्ठी यन्न भवति द्वि
येतृतीया कर्तृकर्मणोस्तृतीया कर्तरि करणे च कारके तृतीया विभक्तिर्भवति कः
कर्ता स्यान्तत्र कर्ता स्वतंत्रः प्रधानः क्रियाप्रतिसिद्धौ यः स्वातंत्र्येण प्रधान्येन विवक्षि
तो यस्तत्कारकं संज्ञं भवति किं करणं साधकतमं करणं क्रियाप्रसिद्धौ यत्प्रकृष्टोपा

© Dharmartha Trust J&K. Digitized by eGangotri

तृं पा ६२

६१

पकारकं विवक्षितं तस्माद्यकतमं कारकसंज्ञं भवति तत्र तृतीया भवति हस्तिना हतः शिलाखं
डितः करणे धनुषा प्रहरति चक्षुषा पश्यति देवदत्तेन कृतं तेन हृतं तेन रामेण रावणो
हतो दक्षिणेन पथेन चक्षुषा नरेन्द्र सूरेणागामात्तु चरेण भग्नारक्तो गणः मालमसतुनेनाः
नायाभ्यां पीडितेति निःस्वः शत्रुभ्यां यक्ष्यते मिथः तेनान्याबाधते काचिद्दृष्टिभ्यामिद्य
तेमनः यतैर्बाणैर्हताः कोचिद्दानैर्दैग्नैः परवाचि भिद्यमानो मायाभिर्हति वा
नरान् इत्यादि तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानं प्रकृत्यादिषु यः प्रकृत्यादर्शी
नीयः गार्ग्योस्मि गोत्रेण समानधाहृतिविषमेण धावतीत्यादि यथा चानेन प्रकृत्या च
पलेविप्रयोगो त्रेणा त्रेधप्रवदनयत्नो प्रधानेतृतीया विभक्तिर्भवति सहदेवदत्तेन य
त्नदत्तश्चागतौ पुत्रेण सहागतः पिता पुत्रेण सहस्थूलः पितृत्रक्रियाभिसंबंधः गा
हूतो यत्र पुत्रस्य तु प्रतीयमानत्वे तिनस्याप्राधान्यं सहार्थेन योगविधानात्प्रयोगे
पि भवति विनापि सहार्थेन भवति वृद्धो युनेति निपातनात् हतेन पिता स्थितः साकं
तेनाभ्यां जगतं सह तेन सार्धं कायाभ्यां नयने च चरीघं स्त्रिया स्वदते रलकास्वसावसयः
ननहेतवो मराजिः सार्धं जनैवनवा राजा सबकेः स्थितवा हित्यादि इत्थं नाम विवका
रः ॥ ग्रगस्रोहोत्रोगमस्तुदारोयपारीरंचतेते येनेति चलनवपवोहतत्वेननितिस्वचेन्येयेना

डो ६२

गण विकृतेनांगिनो विकारो लक्ष्यते ततोऽत्र तृतीयाविभक्तिर्भवति अक्ष्णा काणः पादेन
खंजः पाणिना कुणिः अत्र स्वधर्मेण सदृशापेक्षे त्र लक्ष्यते अंगविकारे इति किं अक्षि वी
णानस्य इत्थंभूतलक्षणे किंचित्प्रकारं प्राप्तः इत्थंभूतः तस्य लक्षणमित्थंभूतलक्ष
णं तत्र तृतीयाविभक्तिर्भवति श्वेतातपत्रेण राजानमद्राक्षीत् छात्रेणोपाध्यायं स्मरे
मकरध्वजेन गांडीवचक्राभ्यां शार्ङ्गिणं तेवेः पिनाकिन इत्यादि ॥ हेतौ ॥ तृतीयेति
वर्तते हेतुः साधनयोग्यः पदार्थो हेतुरित्युच्यते इहादि तत्र तृतीयाविभक्तिर्भवति
धनेन कुलं स्यात् तेन सेवते शाडीभ्यां हन्यते हलाभिर्ज्यते दत्वादि इत्यादि सर्वं ॥ कार्थे च
तुर्थ्यर्थं प्रधानो वा चतुर्थी संप्रदाने कारके चतुर्थी विभक्तिर्भवति किं संप्रदानं कर्मणा
यमभिप्रैति स संप्रदानं कर्मणा करणभूतेन यमर्थमभिप्रैति कर्त्ता तत्कारकं संप्र
दानं तत्र चतुर्थी वेदविदे गां ददाति छुहसूपन्नं देहि देवाय भोजनं देहि पात्राय ज
लं देहि मातापितृभ्यां वाणिं ददाति कापिभ्यां पितृकं ददाति शृगोभ्यस्ताय वितरति
केशेभ्यस्तैलं ददीत इत्यादि ॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ क्रोधः अमर्ष
अपकारः द्रोहः अक्षमः ईर्ष्या गुणेषु दोषाविःकरणम् असूया क्रोधाद्यर्थानां धातू
नां प्रयोगे यं प्रति कोपस्तत्कारकं संप्रदानसंज्ञं भवति देवदत्ताय क्रुध्यति मित्राय द्रु

© Dharmartha Trust J&K. Digitized by eGangotri

दै॰ पा॰ ६२

62

ष्यति ग्रार्थायाय ईषति बाधवायामूयते इत्यादि तादर्थ्ये चतुर्थी वक्तव्या क्लृप्तायं जल्पमा॰
नयहृतार्थमित्यर्थः हिरण्यं कुण्डलायेदं चरुः पूजाकालिनं यज्ञपशुरानीतः यानाश्रवि
स्वकर्मणोसंयमायस्कान्त पत्नेनयमोयसंयमपर्नमोत्तायमेधावीधनं स्नानाय उत्तमाये ता॰
न्याते रत्नाप्यमाने चतुर्थी वक्तव्या वातायवकापिला विद्युत्हला तपाय बलोहिनी ॥ हितयो
गे चतुर्थी वक्तव्या पर्यागिणोहितं ग्रामयिनेहितं क्रियार्थोपपदस्य च कर्मणि स्थानिनः ।
क्रियाया: अर्थः क्रियार्थः स उपपदं यस्य सायं क्रियार्थोपपदः तस्मात् लौकिक्रियायाः क्रि
यार्थायामित्येष विषयो लक्ष्यते क्रियार्थोपपदस्य स्थानिनः अप्रयुज्यमानस्य धातोः क
र्मणि कारके चतुर्थी भवति द्वितीयापवादे योगः एधेभ्यो व्रजति एधानाहर्तुं फलाभ्याह
र्तुं व्रजतीत्यर्थः क्रियार्थोपपदे स्येति किं कि प्रविशन पर्णाप्रविशपिंडीम् भक्षितत्र
याने नतु क्रियार्थोपपदः कर्मणीति किम् एधेभ्यो व्रजति शकटेन स्थानिन इति किं ए
धानाहर्तुं व्रजति तुमर्थाच्च भाववचनात् ॥ तुमुनातमर्थः तुमर्थः तुमर्थं भाववच
न प्रत्ययान्तात्प्रातिपदिकाच्चतुर्थी भवति पाकाय व्रजति त्यागाय व्रजति संपत्तये व्र
जति तुमार्थादिति किं पाकः त्यागः भाव वचनादिति किम् कारको व्रजति नमः स्वस्ति
स्वाहास्वधालंवषड्योगाच्च ॥ एतैर्योगे चतुर्थी भवति नमः सर्वेत्तयन नमः शंकरायन

गे॰ ६२

रायणाभ्यां नमो मातापितृभ्यां नमो गुरुभ्यः नमस्त्राचार्येभ्यः स्वस्ति प्रजाभ्यः स्वाहा इ
न्द्राग्नाय स्वधा पितृभ्यः अलं मल्लो मल्लाय अलमिति पर्याप्त्यर्थस्य ग्रहणं तेन प्रभु
र्मल्लो मल्लाय समर्थः सासंयस्मारमेयाय वषडिति ग्रायेत्यादि सर्वत्र ॥ कस्मिन्नर्थे पंच
म्यपादाने पंचमी अपादाने कारके पंचमी विभक्तिर्भवति किमपादानं ध्रुवमपाये
अपादानम् अपायोऽपगमः अपगमात्मकत्वेन विषयभूते यद् ध्रुवमवधिभूतं विवक्षितं
तत्कारकमपादानसंज्ञं भवति तत्र पंचमी वृक्षात्पत्रं पतति हस्तिनोऽवतीर्णः वृक्षात्प
त्रं पतति ग्रामादागच्छति धावतोऽश्वात्पतति ग्रामादाहवति रिष्यति हर्षात्प्रेरते संसारा
न्मुक्तोऽयाना भयापयः स्ववति स्त्रीतोऽव्याप्रति गुरुभ्योऽनागत्य ज्ञितं ग्रामादाहवति र
ष्यति हर्म्यात्प्रेरयते संसारान्मुक्तो नाभयापयः स्रवति स्त्रीभ्योऽव्यापति उपाध्यायादध्य
याति पर्वतेभ्यः सूतेऽद्रुत्यादि ॥ भीत्राणानां भयहेतुः बिभीत्यर्थानां त्रायत्यर्थानां च प्रयो
गे तो प्रयोगे भयस्य हेतुर्यत्तत्कारकमपादानसंज्ञं भवति व्याघ्राद्बिभीत्यमानात्पित्र
भयात्रस्यति पापेभ्यः त्रस्यति चौराडुद्विजते चौराद्रायते स्ववशं नृपं सन्नः पापात्त्रायते
भगवान् जायते जराव्याधिभ्यः परिरक्षति सूत्रकृंः वेभ्यः पाति गोपालः सर्पेभ्यो गाः
पालयतीत्यादि ॥ अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥ पंचमी

© Dharmartha Trust J&K. Digitized by eGangotri

वृ॰
पां॰
६३
63

निवर्त्तते ॥ अन्य आरात् इतरर्त्ते दिक्शब्द अञ्चूत्तरपद आच् आहि इत्येतैर्योगे पंच
मी भवति अन्य इत्यर्थग्रहणं तेन पर्यायप्रयोगेपि भवति अन्यो ग्रामाद्विहारः अत्रादन्या
द्वजने अन्यो देवदत्ताद्यज्ञदत्ताभिन्नो विसदृशभिन्नो हवमित्रः अर्थान्तरं देवदत्तात् विल
क्षणो देवदत्तात् आराच्छुद्धो हन्तीति कथ्यवर्त्तते ग्रामाच्चाराद्दूयनम् वनाद्ग्रामान्तरीय
तर इति निर्दिश्यमानस्य प्रयोगोपदार्थः उच्यते इतरो देवदत्ताद्यज्ञदत्तः स्वामिन इतरो
मेवकः ऋते इत्ययं वर्जने वर्त्तते ऋते धनान्नमस्तुष्टिः दिक्शब्दे पूर्वो ग्रामान्नदीइन्ना
शानगरात्तरीग्रामान्पूर्वं वनं ऐन्ननाइन्त्रग्रामनदीत्यादि ॥ दिक्शब्देन्यत्र शब्दग्रहणादेशः
कालवृत्तिनापि योगे यथा स्यात् इतरथाहि दिग्वृत्तिनैव स्यात् इयग्रामात्पूर्वेति शब्द
ग्रहणात्पत्ति दिग्दिशि दृष्टः शब्द इत्ययमर्थो लभ्यते तेन यद्यपि संप्रति दिग्वृत्तो देशे का
ले वा वर्त्तते सोपि दिग्दिशि दृष्ट इति उद्योगेपि पंचमी भवति तत्र देशवृत्तिना योगे पूर्वो
ग्रामाद्देशः कालवृत्तिनापि योगे पूर्वो ग्रीष्माद्वसन्तः अञ्चूत्तरपदे प्राग्यामाद्दयानदीः
ग्रामाद्दक्षिणपूर्वो देशः प्राग्ग्रामात् प्रत्यग्ग्रामात् आच् दक्षिणा ग्रामाद्वनेऽन्नदानगरात्
आहि दक्षिणाहि वसति चेडालाइति इत रवचनयोरपि योज्यं पृथग्विनानानाभिस्तृ
तीयान्नितरस्यां पंचमी ग्रहणमिहानुवर्त्तते पृथग्विनानाना इत्येतैर्योगे तृतीया विभ

डो॰
६३

© Dharmartha Trust J&K. Digitized by eGangotri

त्तिर्भवत्यन्यतरस्यां पंचमी च पृथग्देवदत्तेन पृथग्देवदत्तात् नाना देवदत्तेन नाना
देवदत्तात् पृथग्विनानानाभिरिति योगविभागो द्वितीयार्थः विना वातं विना वर्षं वि
द्युत्प्रपतनं विना विना हस्तिकृतान्दोषान्केनेमौ पातितौ द्रुमौ ॥ विना वातेन विना वि॰
त्प्रपतनेन विना विना हस्तिकृतैर्दोषैः केनेमौ पातितौ तेन नोण करणे च स्तोका॰
ल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य स्तोक अल्प कृच्छ्र कतिपय इत्येतेभ्योऽसत्त्वव
चनेभ्यः करणे कारके तृतीया विभक्तिर्भवति अन्यतरस्यां पंचम्यत्र पक्षे विधीयते तृ
तीया तु करणे इत्येव सिद्धा यदा धर्ममात्रं करणतया विवक्षितं न द्रव्यं तदा स्तोका
दीनामसत्त्ववचनता स्तोकान्मुक्तः स्तोकेन मुक्तः अल्पान्मुक्तः अल्पेन मुक्तः कृ
च्छ्रान्मुक्तः कृच्छ्रेण मुक्तः कतिपयान्मुक्तः कतिपयेन मुक्तः असत्त्ववचनस्येति॰
किं स्तोकेन विषेणाहतः अल्पेन मधुना मत्तः करणे इति किं क्रियाविशेषणे क
र्मणि मा भूत् स्तोकं चलति ॥ विभाषा गुणेऽस्त्रियां ॥ पंचमीति वर्तते हेताविति
वर्तते गुणे हेतौ अस्त्रीलिंगे विभाषा पंचमी भवति तृतीया च जाड्येन बद्धः जाड्या
द्बद्धः गर्वेणावक्रिगर्वोद्धक्रि अन्यत्र शाठ्यात् हतवाच्येनत्यादि सर्वम् दूरान्ति॰
कार्थैः शब्दैर्योगे षष्ठ्यन्यतरस्यां ॥ पंचम्यनुवर्तते दूरान्तिकार्थैः शब्दैर्योगे षष्ठी वि

© Dharmartha Trust J&K. Digitized by eGangotri

दूः पां: ६५

64

भक्तिर्भवत्यन्यतरस्यां दूरं ग्रामात् दूरं ग्रामस्य ॥ विप्रकृष्टं ग्रामात् विप्रकृष्टं ग्रामस्य
अंतिकं ग्रामात् अंतिकं ग्रामस्य अभ्याशं ग्रामात् अभ्याशं ग्रामस्य ॥ दूरांतिकार्थेतः
शब्देभ्यो द्वितीया विभक्तिर्भवति पंचमी च तृतीयासप्तम्यावपि दृश्यते ---- दूरं ग्रा
मस्य दूरेण ग्रामस्य अंतिकं ग्रामस्य अंतिकेन ग्रामस्य अंतिकाद्ग्रामस्य अंतिके ग्राम
स्य तदेवं दूरांतिकार्थेभ्यश्चतस्रो विभक्तयो भवंति द्वितीया तृतीया सप्तमी पंचमी च
कस्मिन्नर्थे षष्ठी शेषे ॥ षष्ठी शेषे ॥ कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्व
स्वामिसंबंधादिः शेषः तत्र षष्ठी भवति राज्ञो मतेः पशोः पादः पितुः पुत्रः दृष्ट्वा तः वं
नेमेव कस्यावेद्नुः सतुरस्य तेरस हृर्दस्य राशिमः प्रलालस्य भस्म ॥ स्वहस्तेः संगतिः
प्रीत्यै विद्वषां मेरणाय च मित्रियोरमृतं वाक्यं उत्तयोः स्वधिकं ततः ॥ दन्तानां सहः
तिर्भाति महतां वाग्मिनापि च वृत्ताणां च फलं भाति उष्णाणां गंधपत्वं च ॥ प्रियाणां
मधुरं वाक्यं कवीनां रसवत्वचः गुरूणां वचनं पथ्यं कातराणां उत्तमं वचः ॥ अन्यादि ॥
तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां तुल्योपमाशब्दौ वर्जयित्वा शेषविषये वि
धानात्तयोरुक्तौ षष्ठ्येव भवति चंद्रेण तुल्यं मुखं चंद्रस्य तुल्यं मुखं कमलेन समं व
क्त्रं वक्त्रस्य सदृशः शशी सदृशः शशिना राजा राज्ञो भास्वान्त्यभावतः ॥ नेत्राभ्यामुत्प

डोः ६५

© Dharmartha Trust J&K. Digitized by eGangotri

नेतज्ञ्ये इत्यलघोषज्ञते न गौः स्वमनन्नागौं ज्ञानगौं ज्ञायते स्वमानगाः इत्यादिसिद्धं वैयोज्यं अ
धीगर्थदयेशां कर्मणि ॥ शेष इत्यनुवर्तते अधीगर्थाः स्मरणार्थः दयतिर्दानगतिरक्षण
हिंसादानेषु ईश ऐश्वर्ये एषां कर्मणि शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति मातुरध्येति मातुः स्म
रति सर्पिषो दयते सर्पिष ईष्टे कर्मणीति किम् मातृगुणैः स्मरति शेष इत्येव मात
रं स्मरति ॥ कृञः प्रतियत्ने ॥ सतो गुणान्तराधानं प्रतियत्नः करोतेः कर्मणि कार
के शेषत्वेन विवक्षिते प्रतियत्ने गम्यमाने षष्ठी भवति एधोदकस्योपस्कुरुते काण्डगुण
स्योपस्कुरुते प्रतियत्ने इति किं कटं करोति कर्मणीति किं एधोदकस्योपस्कुरुते प्र
यत्नः शेष इत्येव एधोदकमुपस्कुरुते ॥ आशिषि नाथः नाथयाच्ञोपतापैश्वर्याशीःषु
वर्तते तस्याशीः क्रियस्य कर्मणि कारके षष्ठी भवति सर्पिषो नाथते मधुनो नाथ
ते आशिषीति किं माणवकमुपनाथति ॥ रुजार्थानां भाववाचिनामज्वरेः
रुजार्थानां धातूनां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां कर्मणि कारके ष
ष्ठी भवति चौरस्य रुजति रोगः चौरस्यामयत्यामयः रुजार्थानामिति किम् एति जीव
न्तमानन्दः भाववाचिनामिति किं नदी कूलानि रुजति अज्वरेरिति किम् चौर
ं ज्वरयति ज्वरः शेष इत्येव चौरं रुजति जासिनिप्रहणनाटक्राथपिषां हिंसायां जा

© Dharmartha Trust J&K. Digitized by eGangotri

कं॰ पा॰ ६५

65

जासिनिप्रहणनाटक्राथपिषः इत्येतेषां हिंसाक्रियाणां कर्मणि कारके षष्ठी भवति ज
सिर्हिंसयां जासताडने मृत्यवा च्युरादिरौपदेशिके चौरस्योज्जासयति चौरस्य निप्रहन्ति चौ
रस्य प्रणिहन्ति चौरस्य निहन्ति चौरस्य प्रहन्ति चौरस्य प्रहन्ति चौरस्योन्नाटयति चौरस्य
क्राथयति चौरस्य पिनष्टि हिंसायामिति किं धानाः पिनष्टीत्यादि व्यवहृपणोः स
मर्थयोः ॥ व्यवहृपणः इत्येतयोः समानार्थयोः कर्मणि कारके षष्ठी भवति द्यूत
क्रयविक्रय व्यवहारे च समानत्वमनयोः शतस्य व्यवहरते शतस्य पणते आयप्रत्य
यकस्मान्न भवति स्तुत्यर्थस्य पणेरायप्रत्ययो भवति न व्यवहारार्थस्य समर्थत्वं व्यवहा
रेण साहचर्यं पणतेः समर्थाविति किम् शलाकां व्यवहरति वित्तपतीत्यर्थः ब्राह्मणा
न्पणायते स्तौतीत्यर्थः ॥ कास्मिन्नर्थे सप्तमी ॥ सप्तम्यधिकरणे च अधिकरणे
कारके सप्तमी सप्तमी विभक्तिर्भवति चकाराद्दूरान्तिकार्थेभ्यश्च किमधिकरणं कर्
तृकर्मणोः क्रियाश्रयभूतयोर्धारणं क्रियासिद्धय आधारस्तत्कारकमधिकरणसं
ज्ञं भवति तत्र सप्तमी कटे आस्ते शकटे आस्ते पुष्पेषु गन्धः समीपे तु नद्यां गावश्चरन्ति त
नयोः पतति तेने त्वे नेत्रयोः पतति मनः ॥ यूनस्तु पादपाः सन्ति गंगायास्तु वालुकाः वानी
रवर्तते बहिः प्रायो धर्मकथासु च ॥ वृत्तेषु सन्ति पुष्पाणि पुष्पेषु भ्रमराः शालाः

गो॰ ६५

© Dharmartha Trust J&K. Digitized by eGangotri

चलावनेशुमातंगाश्चरमागिरि [illegible] मानुषु ॥ इत्यादि ॥ सप्तमीविधानेऽकर्मको॰
द्विविषयस्यकर्मणउपसंख्यानं अथतोव्याकरणविनिगणिती ॥ याज्ञिक ॥ साधसा॰
धुप्रयोगात्सप्तमीवक्तव्या साधुर्देवदत्तेमातरि असाधुर्देवदत्तःपितरिकारकार्हे
णांचकारकत्वेसप्तमीवक्तव्यासरिद्देष्वासीनेषुअश्वांधजातेअश्वेष्वेषुभंजनेषुदरि
द्राश्रासते ॥ अकारकार्हाणामपिकारकत्वेसप्तमीवक्तव्या अश्वेष्वासीनेषु
दरिद्रांधजातेइत्यादिइत्यतिकार्थेनास्य ॥ इदंदेवदत्तःसमीपंआसनंतत्याआ
सन्नेआसतेइत्यादि ॥ निमित्तात्कर्मसंयोगेवाच्यासप्रतिसप्तमीधर्मणिद्वीपि
नंहंतिदंतयोर्हंति कुंजरंकेशेषुचमरींकलिमी ॥ स्निग्धेष्वलकोहतः इत्या
दिकर्मसंयोगाइतिकिं वेतनेनधान्यंलुनातियस्यचभावेनभावलक्षणम् सप्त
मीवर्ततेभावःक्रियायस्यभावेनयस्यक्रियायाक्रियांतरंलक्ष्यतेततोभाववतःस
प्तमी भवतिक्रियाक्रियांतरंलक्ष्यतेततोभाववतःसप्तमीभवतिक्रियाक्रियांतरं
लक्ष्यति ॥ नटस्यतिभावृतिजातोरात्रःपुत्रीजातोरात्रःपुत्रोव्यपेततनपइवःपुत्व
न्पउत्तमालिनिपतितोगतिः उदयतिचंद्रसमसिविकसत्याम्नाम्नचनिवर्षतिदेवोवा
रश्रायातिवातोवातिउक्त्राहतेभंजनेराजनिप्रविष्टोमाभूः राजनिआगच्छति॰

© Dharmartha Trust J&K. Digitized by eGangotri

सु॰ प्र॰ ६६ 66

गतो मातुः मातोः पित्रोरग्रजस्य गतः गोष्ठस्य मातामह्या गतः दुग्धमात्रागतः संपत्त्येप्सा
गतः उपाध्यायस्य मेघगतः श्रीनेषपतेषसर्वेषु नागतः अत्याहिभावनेतिक्रियः
जाजाभिः साधुत्वे भावलक्षणमिति क्रियायोगे सप्तमी वक्तव्यः षष्ठी चानादरे ॥ एवंणा ॥
सप्तम्याः समासे षष्ठी विधीयते चकारात्सापि भवति अनादरे अधिके भावलक्षणे भाव
वतः षष्ठीसप्तम्यौ भवतः हिंषतः पश्यतः त्वंगच्छ हिंषति पश्यति त्वंगच्छ आगच्छः प
बलस्य स्वयं क्रीडति राजा आगच्छति परबले स्वयं क्रीडति राजा मातापित्रोः रुदतोः प्र
व्रजति विक्रयतो जनानां गतः स चोरः विक्रीणत्सु जनेषु गतः स चोरः किमपि व
हृतां वक्तास्वयमाधीयाति साधुमार्गेणान्यादियतस्वति धौरणा षष्ठी सप्तम्यौ वर्त
ते जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं ततः षष्ठीसप्त
म्यौ भवतः मनुष्याणां क्षत्रियः शूरतमः मनुष्येषु वा गवां कृष्णा संपन्नक्षीरतमा गो
षु वा पथगानां धावन्तः शीघ्रगः पथगेषु वा पृथगिति वचनयोरपि पञ्चम्यनेकाविधे
षु षष्ठी विभक्तीनामर्थविभाग इति ॥ इति विभक्तिवृत्तान्तः समाप्तः ॥ अथ सबाता
मेव पदानां परस्परसंबन्धिनां समास उच्यते सोऽपि षड्बतद्वास्वबताश्रितद्वाश्वसब
तानन्तरं संतपनोपदिश्यते सच षड्वेपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधान गो॰ ६६

© Dharmartha Trust J&K. Digitized by eGangotri

तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधाने द्वंद्वः इति चतुर्विधः त
त्र प्रथमं नाम अव्ययीभाव उच्यते उपकुंभ इति स्थिते उपशब्दस्य समीपवाचिनः प्रथमैक
वचनं सु कुंभशब्दस्य षष्ठ्येकवचनं ङस् अविग्रहो नित्यसमासः अस्वपदविग्रह इति
वा कुंभस्य समीपम् इत्यन्यपदेन विग्रहः सुबामन्त्रिते पराङ्गवत्स्वरे ॥ प्राक्कडारात्स
मासः सह सुपा अव्ययीभाव इत्यधिकृत्य अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावा
त्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथा--- नुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्या
न्तवचनेषु ॥ विभक्त्यादिष्वर्थेष्वव्यय--- सुबन्तं वर्तते तदन्येन सुबन्तेन सह स
मस्यते अव्ययीभावसंज्ञकश्च समासो भवति स च समर्थः पदविधिरिति समर्थानामे॰
व भवति इति वेदितव्यं समासश्चात्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां सुपो॰
धातुप्रातिपदिकयोरिति सुपो लुक् प्रथमानिर्दिष्टं समास उपसर्जनमिति उपश
ब्दस्योपसर्जनसंज्ञा उपसर्जनं पूर्वमिति उपशब्दस्य पूर्वनिपातः एकपद्यमैकस्व॰
र्यमेकविभक्तित्वं समासस्य प्रयोजनं उपकुंभ इति स्थिते तत्स्वाद्युत्पत्तिः प्रथमैक
वचनं सु अव्ययीभावश्च अव्ययीभावः समासः अव्ययसंज्ञो भवति इत्यव्ययसंज्ञायां
अव्ययादाप्सुप इति सो लुकि प्राप्ते ॥ नाव्ययीभावादतोऽम्त्वपञ्चम्याः अकारान्तादव्य

© Dharmartha Trust J&K. Digitized by eGangotri

द्वं॰ पा॰ ६७ 67

यीभावादकारान्तस्य उपकुम्भं भवति तस्यान्तरमन्तरस्यैव भवति पञ्चम्याः अमि पूर्वे
त्व उपकुम्भे तिष्ठति कुम्भस्य समीपं तिष्ठतीत्यर्थः तथैव द्वितीयायामम्भावः उपकुम्भे
पश्येत्यादि तृतीयासप्तम्योर्बहुलम् अकारान्तादव्ययीभावादनयोस्तृतीयास
प्तम्योः बहुलमम्भावो भवति ॥ उपकुम्भेन हृतं उपकुम्भेन हृतम् वा तथा सप्तम्यां भा
वः उपकुम्भे देहि उपकुम्भादागतः उपकुम्भम् उपकुम्भे निधेहि उपकुम्भे निधेहि ॥ नि
र्मक्षिका इति स्थिते निशब्दादर्थाभाववाचिनः प्रथमैकवचनं सु मक्षिकाशब्दाच्च
षष्ठीबहुवचनं भवति आम् मक्षिकाणामभाव इति विग्रहे कृतेष्वपि कार्येषु अव्य
यविभक्तीत्यादिना समासः सुलुकि निशब्दस्य पूर्वनिपातः अव्ययीभावश्च अव्य
यीभावश्चाः समासो नपुंसकलिङ्गं भवति इति नपुंसकलिङ्गत्वे ह्रस्वो नपुंसके
प्रातिपदिकस्येति ह्रस्वत्वे कृते तथैव स्याद्युत्पत्तिः एवमम्भावादि निर्मक्षिकं व
र्तते मक्षिकाणामभावो वर्तते इत्यर्थः शेषमुपकुम्भवन्नेयं यथाशक्तिः इति स्थिते
यथाशब्दादव्ययादनतिवृत्तिवाचिनः प्रथमैकवचनं सु शक्तिशब्दाद्द्वितीयैकवचन
मम् शक्तिमनतिक्रम्येति तथैवान्यपदेन विग्रहे कृतेऽपि कार्येषु यथापदेशेणायागमता
वीप्सापदार्थानतिवृत्तिः सादृश्यप्रत्ययाथार्थाः तत्र यथेति एवंविधोऽसिद्धेऽनन्तरेण साहः डां॰ ६७

ग्य प्रतिषेधार्थे नञा सादृश्ये वर्तमाने यथाशब्दस्त्वन्यपदेन सह समस्यते अव्ययी-
भावसंज्ञकश्च समासो भवति तत्र पूर्ववत्समासत्वात् सुपो लुक् तथैव यथाशब्दस्य
पूर्वनिपातः स्वाद्युत्पत्तिः ॥ पूर्ववदव्ययत्वात्तत्रायामव्ययादाप्सुप इति सुपो लुक् अमभा-
वः त्वनदन्तत्वान्न भवति यथाशक्ति करोति शक्तिमनतिक्रम्येत्यर्थः यथावृद्धिं व
ब्राह्मणानामन्त्रयस्व यथा सादृश्ये इति किं यथा देवदत्तस्तथा यज्ञदत्तः यावदम-
त्रमिति स्थितेऽमत्रशब्दोऽपि जलस्य यावति अमत्राणि सम्भवन्तीति विग्रहे तेष्वधिकारेष्वय-
वधारणे यावच्छब्दोऽवधारणे वर्तमानेऽन्यपदेन सह समस्यते अव्ययीभावसंज्ञ-
कश्च समासो भवति शेषं पूर्ववत् यावदमत्रं ब्राह्मणानामन्त्रयस्व ॥ अथ तत्पुरुष-
समासः ॥ कष्टश्रित इति स्थिते कष्टशब्दाद्द्वितीयैकवचनं श्रितशब्दात्सु कष्टं
श्रित इति विग्रहे समर्थः पदविधिः सुबामन्त्रिते परा‥ प्राक्कडारा‥त्समासः स-
ह सुपा विभाषा तत्पुरुष इति प्रकृत्य ॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्ता-
पन्नैः ॥ द्वितीयान्तं सुबन्तं समर्थैः श्रितादिभिः सुबन्तैः सह विभाषा समस्यते तत्पु-
रुषसंज्ञकश्च समासो भवति पूर्ववत्सुपो लुक् पूर्ववत्कष्टशब्दस्य पूर्वनिपातः त-
तः स्वाद्युत्पत्तिः कष्टश्रितः श्रितशब्दस्य क्रियावाचित्वात्त्रिलिङ्गता कष्टश्रिते

© Dharmartha Trust J&K. Digitized by eGangotri

हे: पा: ६६ 68 क्षेरत्नः । कष्टश्रितो ब्राह्मणो कष्टश्रितं ब्राह्मणं जलं पूर्वमतीतादिभिः समासः । शं
कुलाखण्ड इति स्थिते शंकुला टा इ खण्ड सु शंकुलया खण्ड इति विग्रह विग्र
हे एवं स्थिते विकारे तृतीयान्तं तत्कृतार्थेन गुणवचनेन ॥ तृतीयान्तं तत्कृतसमर्थ
गुणवचनेन तत्कृतेन तृतीयाकृतेनार्थशब्देन वोत्तरपदेन सह विभाषा समस्यते
तत्पुरुषश्च समासो भवति शेषं पूर्ववत् स्यादि लोपः । शंकुलया खण्डः शंकुलाखण्डः
खण्डशब्देन गुणवचनत्वात् त्रिलिंगत्वात् धान्येनार्थ इति विग्रहे तेनैव तृतीयान्तं धान्यश
ब्दस्यार्थशब्देन समासः शेषं पूर्ववत् धान्यार्थः । कृतशब्दपूर्वपाणि कुण्डलहिर
ण्य इति स्थिते कुण्डलशब्दात् तादर्थ्ये चतुर्थ्येकवचने ङे हिरण्यशब्दात् कुण्डलाय
हिरण्यमिति विग्रहे चतुर्थी ॥ तदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यन्तं तदर्थेन
समर्थेन तदर्थवाचिनोत्तरपदेनार्थबलिहितसुखरक्षितैः सह विभाषा स
मस्यते तत्पुरुषश्च समासो भवति शेषं समानं स्यादि लोपः । न उत्तकत्वान्नारभो
वः कुण्डलहिरण्यं कुण्डशब्दः पूर्वपदः पूर्वपदपाद्यादि ॥ चौरभयमिति स्थि
ते चौरशब्दात् पञ्चमी भयशब्दात् चौरेभ्यो भयमिति विग्रहे पञ्चमी भयेनापञ्चम्यन्तं डो: ६६
तेन समर्थं भयशब्देनोत्तरपदेन सह विभाषा समस्यते तत्पुरुषश्च समासो भवति

© Dharmartha Trust J&K. Digitized by eGangotri

शेषं पूर्ववत् चौरभयं जंङशालावद्रूपनयः एवं वृकभयमित्यादि राजन्पुरुषइति स्थि
ते राजन्ङसाल्लात्स्यैकवचनं ङस् पुरुषसाल्लात् स्यारानः पुरुषइति विग्रहे ॥ ष
ष्ठी ॥ षष्ठ्यन्तं सुबन्तेन समर्थेनोत्तरपदेन सह विभाषा समस्यते तत्पुरुषश्च समा
सो भवति सुपो लुक्क्रियते अन्तर्वर्तिनीं विभक्तिं समीक्ष्य परसंज्ञायां न लोपो नः
लोपः प्रातिपदिकान्तस्येति नलोपः शेषं पूर्ववत् राजपुरुषः देवदत्तस्य गवे अक्ष
शौण्ड इति स्थिते अक्षसुप्साल्लात्सप्तम्या बहुवचनं शौण्डसाल्लात्सु अक्षेषु शौण्ड इति
विग्रहे सप्तमी शौण्डैः सप्तम्यन्तं सुबन्तं शौण्डादिभिरुत्तरपदैः सह विभाषा समस्य
ते तत्पुरुषश्च समासो भवति शेषं पूर्ववत् स्याद्यन्तत्वाद् अक्षशौण्डः एवमन्येव
भावादयः पंचन् पूल इति स्थिते उभयत्रापि प्रथमा बहुवचनं जस् पञ्च पूलाः समा
हृता इति विग्रहे एवमस्मिन्नेकाधिकारे दिक्संख्ये संज्ञायामिति वर्तमाने तद्धितार्थो
त्तरपदसमाहारे च तद्धितार्थविषये उत्तरपदे परतः समाहारे चाभिधेये पि
वन्नात्मे समानाधिकरणेनोत्तरपदेन सह विभाषा समस्यते तत्पुरुषश्च समासो
भवति संख्यापूर्वो द्विगुः ॥ संख्यापूर्वस्तत्पुरुषः समासो द्विगुसंज्ञो भवति द्विगु
रेकवचनं द्विगुः समासो एकवचनान्त भवति स नपुंसकं यस्यायमेकवद्भावः

© Dharmartha Trust J&K. Digitized by eGangotri

सनपुंसकलिंगो भवतीति नपुंसकलिंगेऽप्राप्ते अकारांतोत्तरपदे द्विगुस्त्रियां भाष्य
ते इति स्त्रीलिंगतायामित्यपि ज्ञातव्यं ॥ द्विगोः ॥ द्विगोः समासात् ङीप्प्रत्ययो भ
वति ङकारपकारयोर्लोपः प्रयोजनम् पूर्ववत् एवं स्यभसंज्ञायां यस्येति इत्यकार
लोपः स्यात् तस्मात् स्त्रीप्रत्ययान्तत्वात् पंचमूली कत्रीगाह्लवटूपनयः एकवद्भावात् सर्व
त्रैकवचनमेव पंचकपाली दशकपाली प्रत्ययः नीलउत्पल उत्पल इति स्थिते उभ
यत्रापि प्रथमैकवचनं तु विशेषणविशेष्यभावप्रसिद्ध्यर्थं तु उभयत्रापि च प्राप्तप्रयो
गः नीलं च तदुत्पलं चेति विग्रहे एवं सिद्धे चाधिकारे एवं काले सर्वजगत्स्वगण
नवकेवलात् समानाधिकरणेनेति वर्तमाने विशेषणं विशेष्येण बहुलं ॥ एक
विषये समानाधिकरणं भेदकं विशेषणं भेद्यं विशेष्यं विशेषणवाच्यं तु बहुतं सम
र्थं विशेष्यवाचिना समानाधिकरणेन सह बहुलं समस्यते तत्पुरुषश्च समासो भ
वति ॥ तत्पुरुषः समानाधिकरणः कर्मधारयः समानाधिकरणस्तत्पुरुषः कर्म
धारयसंज्ञो भवति इत्यर्थः नाम प्रयोग इति यथा प्राप्तनिवृत्तिः स्वार्थे प्रत्ययः नपुंसक
त्वात्स्वार्थभावः नीलोत्पलं एवं रक्तोत्पलादयः ॥ तथाहि कृत्वा चासौ गौरीति वि
ग्रहे समासे कृते एवंवत् कर्मधारयसंज्ञायां पुंवत्कर्मधारयजातीयदेशीयेषु

69

उत्तरपदे इति वर्त्तते कर्मधारये समासे जातीयदेशीययोश्च प्रत्यययोः परतः एवंपः
रूपस्य पुंवद्भावो भवति पुंवद्भावात् टापो निवृत्तिः स्वाद्युत्पत्तिः कल्याणी पूर्वोत्तरपदे
ष्वयः नान्यस्य इति स्थिते नकारलोपः प्रयोजनं नलोपो नञः इति विशेषणं उभयत्रा
पि स्तु अघातव इति ग्रहणेन नञ् न जन्तुबन्तं समर्थं उत्तरपदेन सुबन्तं समर्थं न तत्पुरुषवि
भाषा समस्यते तत्पुरुषश्च समासो भवति अमुष्यपुत्रत्वं पदमित्यधिकृत्य ॥ नलोपो नञः
नकारस्य लोपो भवति उत्तरपदे परतः ॥ तस्मान्नुडचि ॥ तस्मात् लुप्तनकारान्नञः उ
त्तरस्य अजादेः उत्तरपदस्य आगमस्य नुडागमो भवति अनुबन्धलोपः स्वाद्युत्पत्तिः अनश्वः
एवमब्राह्मणादयः अथ बहुव्रीहिः चित्रगो इति स्थिते उभयत्रापि जस् चित्रा गावो
यस्येति विग्रहः तत्पुरुषवर्जिते एतस्मिन्नेवाधिकारे शेषो बहुव्रीहिरिति वर्त्तमाने अ
नेकमन्यपदार्थे अनेकं सुबन्तं समर्थं समस्यते बहुव्रीहिसंज्ञकश्च समासो भवति तत्
श्चैव सुपि लुक् विहिते स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणी
प्रियादिषु भाषितपुंस्कादनूङः स्त्रीप्रत्ययस्य पुंशब्दवत् आदेशो भवति पूरणी प्रिया
दिवर्जिते समानाधिकरणे स्त्रीलिंगे उत्तरपदे परत इति एवं परस्य पुंवद्भावः गोस्त्रियो
रुपसर्जनस्य ॥ उपसर्जनगोशब्दस्य उपसर्जनस्त्रीशब्दस्य च ह्रस्वो भवति स च पञ्चगुः

© Dharmartha Trust J&K. Digitized by eGangotri

दु॰ पा॰ ७० २० ज्ञादेशे इति गैवारस्य उकारः प्रातिपदिकात्स्वाद्युत्पत्तिः चित्रगुः ज्ञानमालूवद्
पनुया एवं शबलगुः शीतगुः अन्यतयः रूपवती भार्या यस्येति विग्रहे एवं बलमासेन्द्र
नेउवज्ञावोज्ञस्वत्व वस्वाद्युत्पत्तिः रूपवद्भार्यः आस्ताः प्रतियद्यः यंयामं गुत्ति मेघा
नेनउपद्धतपशुरसौ उद्धतः औदनेयस्याः वीणाः उनया अस्मिन्निति विग्रहे प्रथमार्
थे वर्जयित्वा ता सविभक्त्यर्थे पूर्ववद्बहुव्रीहिः शेषं समानं प्रासाविग्रामः रूढ
योनड्वान् उपद्धतपशुः यतः उद्धतौदनास्ताः लोम्रत्र समासीकृते नपुंवीरउत्तपको
ग्रामः नरसत्वत्वः कविनिति ग्रयिद्धत्व शेषाद्विभाषेति कप्प्रत्ययः बहुव्रीहौ समा
से सर्वत्र समासपदानां प्रथमानिर्दिष्टत्वात् नियमेन पूर्वनिपात आसे ॥ सप्तमी
विशेषणे बहुव्रीहौ ॥ बहुव्रीहौ समासे यत्सप्तम्यन्तं यच्च विशेषणं पदं तत्पूर्वं नि
पतति इति विशेषणपदस्य पूर्वनिपातः एवं तेबहुत्वेप्येवं बहुव्रीहिमेवति कंठे
चित्रविविधपुष्पफलतरुवनोपशोभितोद्यानभूमिकं नगरमित्यत्र चित्राणि वृत्ता
नि विविधानि चेति विशेषणं पुष्पाणि च फलानि चेति चार्थे द्वंद्वः समासः तरूणां वन
तरुवनमिति षष्ठीसमासः चित्रविविधानि फलानि येषां तानि चित्रविविधानि पुष्प
फलानि च तानि तरुवनानि चेति उन विशेषाणाम समासः उद्यानस्य भूमिरुद्यानभूमिः ड॰ ७०

© Dharmartha Trust J&K. Digitized by eGangotri

रिति षष्ठीसमासः चित्रविविधपुष्पफलऽलंकृतवनेनपरिशोभितेति विग्रहे कार्यकारणे
कृताबहुलं कर्त्तरिचकरणेचधातृतीयाविहिताऽलंकृतशब्दस्यपंचम्येकदेशेतेनोत्तरपदे
नसहबहुलंसमस्यतेतत्पुरुषसंज्ञकस्तत्समासोभवति साऽद्यानभूमिर्यस्मिन्
नगरेऽचित्रविविधपुष्पफलालंकृतवनोपशोभितोद्यानभूमिकंनगरमितिबहुव्रीहि
समासः उपशोभितापदस्यविग्रहः ऽविविस्त्याहिताग्न्यादिषुवा शेषाद्विभाषेति
कप्रत्ययः स्यायत्तत्रिः उंऽशब्दवद्रूपनयः पूर्वविधपुष्पफलालंकृतंतऽमस्त
नाहृतमिवरपर्वतोऽस्याः ॥ इत्यादि ॥ अथद्वन्द्वः ॥ पटुश्चमृदुश्चपटुमृदू इतिस्थिते
ऽभयत्रापिसमुत्तरयोगचशब्दप्रयोगः पटुश्चतम्रश्चमृदुश्चपटुमृदुश्चेतिविग्रहेत
स्तुषवर्जितेपूर्वस्मिन्नेवाधिकारे अनेकमन्यपदार्थे इतिवर्त्तमाने ॥ चार्थेद्वन्द्वः ॥
चार्थेवर्त्तमानमनेकंसुबन्तंसमर्थेनसुबन्तेनसहसमस्यतेद्वन्द्वसंज्ञकश्चसमासो
भवतिसमस्यचार्थान्वयेऽत्रेतरयोःसमाहारश्चार्थः नतुसमस्यचार्थान्वचययोस्त्रसमा
सोनात्यसमर्थत्वात् इतरेतरयोगसमाहारेचसमासोबहिरङ्गपूर्ववत्तत्रसोलु
कपूर्ववच्छब्दनिष्पत्तिः ॥ द्वन्द्वेच ॥ द्वन्द्वसमासस्यान्तेपूर्वनिपततिइतरेतरयो
गत्वानत्वात्सर्वत्रद्विवचनमेवभवति पटुश्चमृदुश्चपवमनिर्पूर्वोऽन्यपवर्तः

© Dharmartha Trust J&K. Digitized by eGangotri

रू॰ पा॰ ७१

71

वित्यादि नञः गम्यमानत्वनन्ययोप युक्तिस्थिते व्याघ्रात्यतिः समाहारे समाहृप्रयोगः नञः
गम्यमानस्य सतस्त्वन्ययोपश्चेति विग्रहे समाहारे द्वंद्वः समासः नत्थैव स्त्वक प्रश्न
युते प्रश्नादिचार्हत्तवणाहृद्वंद्वः समासः एवं निपतन्त्यस्वहृ सतन्ययोपशाहृ
योः एवं निपतति: नञः गम्यमानत्वनन्ययोपस विभाषा वृत्तस्तृगतहृधान्यं व्यञ्जनपा
स्वगातुन्यस्त्ववाड्वपूर्वोपरेपोत्तरगण हत्याद्यर्थानाम् माहानां द्वंद्वो विभाषैकवद्भव
ति नञस्तकमिति न ञस्तकलिङ्गो भवति एकवद्भवति एकवद्भावे एकवचनं भवति एवं
वद्भावाभावपक्षे उद्भयसमृध्यं भवति उद्भ्रशांश उद्भशांसतन्ययोपस सतन्ययो
यो उद्भवर उद्भवशोपववेदिरं धववेदिरौ इत्यादि ॥ इति समासाश्चत्वारः ॥ कुवि
समासेपि विभक्त्यः श्र यत्र न समासो समासो वेति संदेह उपजायते अतस्तन्नि
वृत्त्यर्थमलुगधिकारः प्रदर्श्यते अलुगुत्तरपदे स्त्वपोधानप्रातिपदिकयोरिति समास
प्रातिपदिकावयवस्य सुपो लुक् न स्यात् समासप्रत्ययेषु: अलुगधिकारः प्रागानङ्त्यु
दात्तिकः प्रागाङ्गाहिकाद्यात् स्तोकसुकानिकार उद्भागतनकृच्छ्र सुकादति स्थिते कारणे
च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥ स्तोक ॥ अल्पकृच्छ्रकतिपयाद
त्यतेभ्यः असत्त्ववचनेभ्यः करणाकारके अन्यतरस्यां पञ्चमी विभक्तिर्भवति हगतिकौ

ॐ ७१

थैः षष्ठ्यन्यतरस्यां पंचम्यनुवर्तते दूरांतिकार्थैः शब्दैर्योगे षष्ठी विभक्तिः भवति अन्य
तरस्यां पंचमी च इति दूरांतिकशब्दाभ्यामपि पंचमी स्तोकांतिकदूरार्थकृच्छ्राणि
क्तेन स्तोकादयः शब्दाः पंचम्यन्ताः क्तान्तेन सह समस्यन्ते तत्पुरुषश्च समासो भव-
ति समासत्वात् प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरिति सुपि लुकि प्राप्ते
पंचम्याः स्तोकादिभ्यः ॥ स्तोकादिभ्य उत्तरस्याः पंचम्या अलुग्भवति स्तोकान्मुक्तः
अन्तिकान्मुक्तः दूरादागतः कृच्छ्रान्मुक्तः ओजस कृतस्य सहस कृतस्य अम्भस
कृतस्य तमस कृतस्य इति स्थिते कर्तृकरणयोस्तृतीया च कर्तृकरणे कृता बहु-
लं कर्तरि करणे च या तृतीया तदन्तं कृदन्तेन सह बहुलं समस्यते तत्पुरुषश्च समा-
सो भवति ततः प्रातिपदिकत्वे सुपो लुकि प्राप्ते ओजस्सहोम्भस्तमसस्तृतीयायाः
ओजस सहस अम्भस तमस अञ्जस इत्येतेभ्यः परस्यास्तृतीयाया अलुग्भवति ओजसा
कृतम् अम्भसा कृतम् तमसा कृतम् अञ्जसा कृतम् इत्यादि मनसा गुप्ता मनसा संग-
ता इत्यत्र पूर्ववत्तृतीयासमासत्वात् ततो लुकि प्राप्ते मनसः संज्ञायां मनसशब्दात्पर-
स्यास्तृतीयाया अलुग्भवति संज्ञायां विषये मनसा संगता मनसा गुप्ता इति किं मनो-
दत्ता कन्या ॥ मनसा आज्ञातुं शीलमस्येति विग्रहे सुप्यजातौ णिनि ताच्छील्ये इति

© Dharmartha Trust J&K. Digitized by eGangotri

वृं॰
पां॰
७२
72

णिनिप्रत्ययः आतोयुक्चिण्कृतोः इति युगागमः सोचीति दीर्घः एवं वसूतीयाम
मासाश्च ततोलुकिप्राप्ते ॥ आज्ञायिनि ग्रहेऽत्र परे मनसः परस्याल्लुतीयया
अलुग्भवति मनसाज्ञायी आत्मनेपदम् आत्मनेभाषा इति स्थिते चतुर्थीति योग
विभागाच्चतुर्थीति पुनः चतुर्थीति यो
गविभागात्समासे कृते ततो लुकि प्राप्ते वैयाकरणाख्यायां चतुर्थ्याः वैयाकर
णानामाख्या वैयाकरणाख्या आख्या संज्ञा यथा संज्ञा वैयाकरणा एव व्यवहर
न्ति तस्यां गम्यमानायामात्मनशब्दादुत्तरस्याश्चतुर्थ्या अलुग्भवति आत्मनेपदम्
आत्मनेभाषा अथवालुग्विधानसामर्थ्यादेव चतुर्थीसमासश्च वेदितव्यः सेभाव
श्च वेदितव्यः ॥ परपदं परभाषा इति स्थिते एवं चतुर्थीसमासश्च सेभावश्च भव
ति तस्य लुकि प्राप्ते ॥ परस्य च ॥ परस्य च या चतुर्थी तस्या वैयाकरणाख्यायामलु
ग्भवति परस्मैपदं ॥ परस्मैभाषः ॥ युधिष्ठिरः गविष्ठिरः हविस्तारः अरण्येतिलकः
अरण्येमाषकः इति स्थिते ॥ संज्ञायाम् ॥ संज्ञायां विषये सप्तम्यन्ते रूपात् हसन्तस्या ॐ॰
ते तत्पुरुषश्च समासो भवति ततः सुपो लुकि प्राप्ते हलन्तात्सप्तम्याः संज्ञायां हलन्तेः ७२
नाम्ना तालव्यपरस्याः सप्तम्या अलुग्भवति संज्ञायां विषये युधिष्ठिरादिः भगाङ्क्रपसंख्यानम्

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रासिस्थकः शविस्थकः हृदिस्पृक् हलादिषा उत्तरपदे कारबन्धे(?) इति स्थिते संज्ञा
यामिति समासः ॥ कारनाम्नि च प्राचां हलादौ ॥ प्राचां देशे यत्कारनाम तस्मिन्
हलादावुत्तरपदे हलन्तात् उत्तरस्याः सप्तम्या अलुग्भवति कारविशेषस्यैषा संज्ञा
कारो राजग्राह्यो बलिविशेषः कार्षिकाः कल्पिताः एवं नैव सिद्धे नियमार्थमिदं प्राचामेव
कारनाम्नि पूर्वं हलादौ चेति नान्यस्मिन्निति प्राचामिति किम् यूथे पशुः यूथपशु
मध्ये गुरुः सप्तमीति योगविभागात्समासः ततोऽलुग्विभाषा ॥ मध्याद्गुरौ ॥ मध्याच्छ
ब्दादुत्तरस्याः गुरावुत्तरपदे सप्तम्या अलुग्भवति अन्ताच्चेति वक्तव्यम् अन्तेगुरुः कण्ठेकालोर
सिलोमः उरसिलोमानः इति स्थिते कण्ठे कालोऽस्येति कण्ठेकालः उरसि लोमान्यस्य
तिन उरसिलोमा उरसिलोमानोऽस्येति उरसिलोमानः सर्वत्र योगविभागात्सप्तमीति समासः
ततोऽलुग्विभाषा ॥ अमूर्धमस्तकात्स्वाङ्गादकामे ॥ मूर्धमस्तकवर्जितात्स्वाङ्गवा
चिनः परस्याः सप्तम्या अलुग्भवति कामवर्जिते उत्तरपदे परतः अमूर्धमस्तकादि
ति किं मूर्धशिखः अकामे इति किं मुखे कामोऽस्येति मुखकामः हस्तेबन्धः चक्रेब
न्धः चक्रबन्धः अन्यत्र सिद्धस्तत्पुरुषे बन्धः पश्च ॥ सिद्धावितिहलदन्तसप्तम्यतेसमस्यते
तत्पुरुषसप्तमीसमासो भवति ततोऽलुग्विभाषैवं बन्धे च विभाषा ॥ बंधग्राहे ॥ उत्तरपदे

© Dharmartha Trust J&K. Digitized by eGangotri

दु॰ पा॰ ७३ 73

सप्तम्या विभाषा अलुग्भवति तंभेरमतीति कर्णेजपः उपपदसमासः सुपो लुकि प्राप्ते ॥
तत्पुरुषे कृति बहुलं ॥ तत्पुरुषे समासे कृदंते कृदंते उत्तरपदे सप्तम्या बहुलमलु
ग्भवति भवति कुरुचरः मद्रचरः खेशाले खेशयः खशयः ग्रामेवासः ग्राम
वासः ग्रामीवासी उपपदसमासः ॥ शयवासवासिष्वकालात् ॥ शयादिषूत्तर
पदेषु कालवाचिनः परस्याः सप्तम्या अलुग्भवति विभाषा ॥ चौरस्यन्ना ॥ अहः
हस्याः पतिः अत्र षष्ठीसमासे प्राप्ते सुपो लुकि प्राप्ते ॥ षष्ठ्या आक्रोशे उत्तरपदे प
रतः षष्ठ्या अलुग्भवति आक्रोशे गम्यमाने आक्रोशेनिमो सचाल्लुकापवयेत्यते
आक्रोशे इति किं ब्राह्मणकुलं षष्ठीप्रकरणे ॥ वाग्दिक्पश्यद्भ्यो युक्तिदंडहरेषूप
संख्याने ॥ वाचोयुक्तिः दिशोदंडः पश्यतोहरः दास्याः पुत्रः दासीपुत्रः अत्रापि लु
कि प्राप्ते ॥ पुत्रेऽन्यतरस्यां ॥ पुत्रशब्दे उत्तरपदे षष्ठ्या आक्रोशे गम्यमाने अन्यतर
स्यामलुग्भवति आक्रोशेनैव ब्राह्मणपुत्राः पितुः पुत्रः पितरंतेवासी होतुः पु
त्रः होतरंतेवासी अत्रापि लुकि प्राप्ते ॥ ऋतो विद्यायोनिसंबंधेभ्यः परस्याः पारस्याः
षष्ठ्या अलुग्भवति मातुःस्वसा पितुःस्वसा अत्रापि लुकि प्राप्ते विभाषा स्वसृप
त्योः स्वसृपति इत्येतयोरुत्तरयोः ऋकारांतेभ्यो अन्यतरस्याः षष्ठ्या अलुग्भवति वि

डं॰ ७३

© Dharmartha Trust J&K. Digitized by eGangotri

भाषायस्त्वलुक् नत्वा मातृपितृभ्यां स्वसः मातृपितृभ्यामुत्तरस्य स्वसृसकारस्य मूर्ध-
न्यादेशो भवति मातृष्वसा पितृष्वसा अलुक् नत्वा मातृपितृभ्यामन्यतरस्यां मातुर् पितु
र् इत्येताभ्यामुत्तरस्य स्वसृसकारस्यान्यतरस्यां मूर्धन्यादेशो भवति मातृष्वसा पितृ-
ष्वसा मातुःष्वसा पितुःष्वसा मातुःष्वसा मातुःस्वसा पितुःस्वसा होतृपोतृनेष्टृ-
नेतृ उद्गातृप्रशास्तृ प्रतिहर्तृ प्रतिस्थितानां होतृद्वंद्वानामनपनीतत्पुषा ॥ आनङृ-
तो द्वंद्वे ॥ ऋकारान्तानां विद्यायोनिसंबंधिवचनानां यो द्वंद्वस्तत्रोत्तरपदे परे पूर्वप-
दस्य आनङ् आदेशो भवति होतापोतारौ नेष्टानेतारौ प्रशास्ताप्रतिहर्ता-
रौ योनिसंबंधिनां मातापितरौ जामातानन्दारौ इन्द्रावरुणौ इन्द्रासोमौ इन्द्रपूषा-
णौ इन्द्राबृहस्पती इन्द्रपूषाणौ उपषामीपक्रतद्वंद्वानां देवताद्वंद्वे च ॥ देवतावाचि-
नां यो द्वंद्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशो भवति इन्द्रावरुणौ इन्द्रासोमौ इन्द्राबृ-
हस्पती इन्द्रापूषणौ अग्नीसोमौ अग्नीवरुणौ अत्र ईदग्नेः सोमवरुणयोः सोमवरुण-
योरुत्तरपदयोः अग्नेरीकारादेशो भवति देवताद्वंद्वे चेत्यानङोपवादः अग्नीसोमौ अ-
ग्नीवरुणौ अग्नीः स्तुत्स्तोमसोमयोरिति षत्वं ···· इद्वृद्धौ ॥ कृतवृद्धावुत्तरपदे पू-
र्वदेवताद्वंद्वे अग्नेरिकारादेशो भवति अग्निवारुणीमानडुहीमालभेत आग्निमारुत-

© Dharmartha Trust J&K. Digitized by eGangotri

तं॰
पा॰
७४
74

क्रियतेअग्निवारुणौदेवतेअस्याः अग्निमारुतौदेवतेअस्याः इतितद्धितः तत्रदेवताद्वंद्वं
चेत्युभयपदस्यवृद्धौकृतायांईद्धानतौराधित्वाइकारःक्रियते इति अव्ययाधिकारः समा॰
प्तः ॥ अथस्त्र्यबंतात्सपत्यार्थेविशेषतद्धितप्रत्ययान्निता उबंतत्वाच्छ्रितत्वात्स्त्रस्त्रव॰
नंतरंसंक्षेपेणोपदिश्यतेउपगोरपत्यमितिविग्रहेप्रत्ययःपश्चस्याप्रातिपदिकात्तद्धि
ताःसमर्थानांप्रथमाद्वाप्राग्दीव्यतो इति इतिवर्तमाने ॥ तस्यापत्यं ॥ तस्येतिष॰
ष्ठीसमर्थादपत्यमित्यस्मिन्नर्थेयथाविहितंप्रत्ययोभवति इत्यण् तद्धितत्वात्कृत्त॰
द्धितसमासाश्चेतिप्रातिपदिकसंज्ञायांसुपोधातुप्रातिपदिकयोरितिसुपोलुक्य
चोञ्णितीत्यपिप्राप्तम् ॥ तद्धितेष्वचामादेः ञितिणितिचतद्धितेपरतः अचामादे
रे: ॥ अचोवृद्धिर्भवतीति उकारस्योकारोवृद्धिः यचिभमितिएवंस्यभसंज्ञायां अग्रा॰
स्यतस्यनतद्धिते इतिवर्तमाने ॥ ओर्गुणः ॥ उवर्णस्यान्तस्याभस्यभसंज्ञकस्यगुणो
भवतितद्धितेपरतः इत्युकारस्योकारोगुणोभवति अवादेशः ततः प्रातिपदिकत्वा
त्स्वाद्युत्पत्तिः औपगवः औपगवौ औपगवा इत्यादि ॥ हलतपूर्ववत्स्त्रियामित्यनुवर्तमाने॰
टिड्ढाणञ्प्रतिटीप् यस्येतिचेत्यकारलोपः औपगवी ॥ गोत्रविवक्षायामपत्यंपौ॰
त्रप्रभृतिगोत्रंउत्रस्यापत्यंपौत्रस्यपौत्रप्रभृतिर्यदपत्यंतद्गोत्रसंज्ञंभवति औपगवस्य

उं॰
७४

© Dharmartha Trust J&K. Digitized by eGangotri

पत्यं गोत्रमिति गोत्रापत्यविवक्षायामेको गोत्र एकप्रत्ययः प्रथमपर्यायः गोत्रे एकः प्रथमः।
प्रत्ययो भवति गोत्रे एक एव प्रत्ययो भवति प्रथमवापकप्रवपरमप्रकृतिर्भवतीत्यणेव भवति
औपगवः पौत्रः औपगवस्यकवापत्यविवक्षायां जीवत्सु तवंश्ये षकवा विद्यया जन्मना वा प्र
णिनामेकलक्षणा संतानो वंश्यः तत्रभवो वंश्यः तस्मिन्वंश्ये पित्रादौ जीवति सति पौत्रप्र
भृतेरपत्यं युवसंज्ञं भवति। प्रतिचतुर्थादेव संज्ञया सौपगवस्यापत्यं युवा। प्रतिविगृह्य गो
त्राद्यून्यः स्त्रियाम् प्रथमपि नियमः यत्रिप्रत्यये विवक्षिते गोत्रप्रत्ययादेव प्रत्ययो भवति
न परमप्रकृतेस्तत्र यफवत्या इति औपगवशब्दाद्यस्वकारान्तात् एवं वंशपिकारे तस्यापत्यं
मित्यवर्तमाने ॥ अत इञ् ॥ षष्ठीसमर्थादकारान्तात्प्रातिपदिकात्तस्यापत्यमित्यस्मि
न्नर्थे इञ् प्रत्ययो भवति णोपवादः सकारो वृद्ध्यर्थः एवं वक्षसंज्ञायां यस्येति च लो
कारलोपः स्वाद्यत्यन्तिः औपगविर्युवा ॥ मलस्यापत्यमिति विग्रहे एवं वत्से तात्ताद
त्र अतइबंधलोपः एवं वत्सपो लक्क आदिवृद्धिः स्वाद्यत्यन्तिः दाक्षिः दाक्षेरपत्यं गो
त्रमिति गोत्रापत्यविवक्षायां एवं वत्से को गोत्रे इति नियमात्प्रथमप्रकृतेः तदेव शाब्दा
त्प्रथमः प्रत्ययः इञेव भवति दाक्षेः पौत्रः मातेः पौत्रः युवेति फक्वापत्यविवक्षायां एवं
वद्यून्यः स्त्रियाम् इति नियमात्तत्रादित्यः फगित्यपि कृत्य ॥ यञिञोश्च ॥ यञन्ता

© Dharmartha Trust J&K. Digitized by eGangotri

द्वैः पाः ७५
75

त् इत्यनेनास्यापत्यमित्यस्मिन्नर्थे ढक् प्रत्ययो भवति ककारस्य लोपः प्रयोजनम् किमिति चे
त्ति विशेषणार्थ एकेन वृत्तिजितेष्वचामादेरित्यधिकृत्य ॥ किति च ॥ किति च तद्धि
ते परतोऽङ्गस्याचामादेरचो वृद्धिर्भवति पजे एवं ढलक्षणं प्रकृत्ति आयनेयीनीयियः फ
ढखछघां प्रत्ययादीनां प्रकृतस्यापि तद्धीनाम् फढखछघां आयन् एयन् यन् इवायघु
द्धघुत्वेन आदेशा भवति यथासंख्येनेति फस्य ज्ञानमात्रस्यैव आयनादेशः यस्ये
ति चेत्यकारस्य लोपः खाभ्यामिति णत्वम् दाक्षायणः दाक्षायणौ दाक्षायणाः इत्यादि ग
र्गस्यापत्यमिति विग्रहे अतः इञिति इञ् प्रत्ययः शेषं पूर्ववत् गार्गेरपत्यमिति वि
ग्रहे गोत्रापत्यविवक्षायां इञं बाधितुं ॥ गर्गादेर्यञ् जादिभ्यः फगिति वर्तमाने गर्गादिभ्यो
यञ् गर्गादिभ्यः प्रातिपदिकेभ्यः गोत्रापत्ये यञ् प्रत्ययो भवति शेषं पूर्ववत् गार्ग्यः गा
र्ग्यौ गार्ग्याः अपत्यबहुत्वविवक्षायां अत्र यस्य यञश्च बहुषु तेनैवास्त्रियामि
ति वर्तमाने यञिञोश्च ॥ गोत्रप्रत्यययोर्बहुषु वर्तमानयोः यञिञोर्लुग्भवति स्त्री
लिङ्गाभावे नैमित्तिकस्यापि अभाव इति वृद्ध्यभावः गर्गा इत्यादि ॥ युवापत्यविवक्षायां
गार्ग्यस्यापत्यं युवेति विग्रहे गोत्रप्रत्ययाद्यञिञोश्चेति फक् शेषं पूर्ववत् गार्ग्यायणः
गार्ग्यायणौ गार्ग्यायणाः इत्यादि ॥ कषायेण रक्तमिति विग्रहे अपत्यवर्जिते एवंस्मिन्नं

डों ७५

© Dharmartha Trust J&K. Digitized by eGangotri

वाधिकारे ॥ तेन रागात् तेनेति तृतीयासमर्थाद्रागविशेषवाचिनः शब्दाद्रक्त-
मित्येतस्मिन्नेवार्थे यथाविहितं प्रत्ययो भवति इत्याण् प्रत्ययः शेषं पूर्ववत् का-
षायः पटः काषायी शाटी टिड्ढाणञित्यादिना ङीप् काषायी पटी काषायं वस्त्रं लाक्षया
रक्तमिति विग्रहे लाक्षारोचनाशकलकर्दमाट्ठक् अपि रागविशेषवाचित्वात् तृती-
यासमर्थेभ्यः रक्तमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति अणोऽपवादः शेषं पूर्ववत् ।
ठस्येकः ठका प्रत्ययस्येकादेशो भवति अन्यत् पूर्ववत् लाक्षिकः एवं त्रिलिंगे-
योज्यम् एवं रौचनिकः शाकलिकः कार्दमिकः इत्यादि ॥ इन्द्रो देवताऽस्येति विग्र-
हे साऽस्य देवता ॥ इति प्रथमासमर्थादस्य देवतेत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो
भवति इत्यण् शेषं पूर्ववत् पञ्चम्या लोपकः एवं त्रिलिंगे योज्यम् शुक्रो देवता-
ऽस्येति विग्रहे शुक्राद्घन् शुक्रशब्दात्साऽस्य देवतेत्येतस्मिन्नर्थे घन्प्रत्ययो भवति अ-
णोऽपवादः नकारः स्वरार्थः आयनेयीनीयियादिना घस्येयादेशः इन्द्र इत्यादिना वा शु-
क्रियं हविः काकानाम् समूह इति विग्रहे तस्य समूहः तस्येति षष्ठीसमर्थात् समूह
इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् अन्यत्समानम् काकम् शौक-
म् बाकम् इत्यादि युवतीनां समूह इति विग्रहे अचित्तहस्तिधेनोष्ठक् अचित्ता-

© Dharmartha Trust J&K. Digitized by eGangotri

द्वः पृः ७६
76

र्थेत्वः शालेत्यः शालिपेत्रु शालाभ्यां चठक्यात्प्रत्ययो भवति तस्या मरूहरु इत्येतस्मिन्नर्थे
टस्येक इत्येकादेशः शेषं पूर्ववत् यद्धपिवं शाष्कुलिकं हास्तिकमित्यत्र टेरिति
वर्तमाने ॥ नस्तद्धिते ॥ नकारांतस्यांगस्य टेर्लोपो भवति भसंज्ञानिमित्तं तद्धिते
परतः इति टिलोपः इकादेशः धेनुकमित्यत्र इसुसुक्तांतात्कः इसुउसु इत्येवमं
ताऽकारांतात्स्वरूपकः कइत्ययमादेशो भवति इति कादेशः ॥ व्याकरणं वेत्त्यधी
ते वा इति विग्रहे तदधीते तद्वेदेति द्वितीयासमर्थादधीते वेदान्निवृत्त्यर्थयोरर्थं
योर्यथाविहितं प्रत्ययो भवति इत्यणि णकारलोपः नय्वाभ्यां पदांताभ्यां पूर्वं त्वाता
भ्यामैच् पदांताभ्यां यकारवकाराभ्यां उत्तरस्यांगस्याचामादेरचो वृद्धिर्न भवति ता
भ्यां पूर्वमैचागमो भवति वैयाकरणः पदव्यास्तः नैमित्तुः उडुंबरा अस्मिन्देशे संतीति
विग्रहे तदस्मिन्नस्तीति देशे तन्नाम्नि इति प्रथमासमर्थादस्मिन्नित्यस्मिन्नर्थे यथा
विहितं प्रत्ययो भवतीत्यण् तत्र यत्तत्प्रथमासमर्थं तदस्ति चेद्यदस्मिन्निति निर्दिष्टं दे
शश्चेत्स तन्नाम्ना प्रत्ययांतं नाम भवति इति कारणं न तु संज्ञाविवक्षा शेषं समानम्
औडुंबरो देशः बाहरः सह शङ्खेन निवृत्ता परिखेति विग्रहे तेन निर्वृत्तमिति तृतीया
समर्थान्निर्वृत्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यणि टिड्ढाणञिति ङी

डुं: ७६

घ्न साहस्रीपरिखोऽर्जुनावोऽस्येति वा सह इति विग्रहे तस्य निवासः देशनामधेये ग-
म्यमाने शेषं समानं अर्जुनावाः विति प्रायो ग्रह भवनमिति विग्रहे ग्रह रभवस्य स-
मर्थे विभक्तिरन्तर्वर्तते तस्येति षष्ठीसमर्थात् इह भाव इत्येतस्मिन्नर्थे यथाविहितः
प्रत्ययो भवतीयण् शेषं समानम् वैदिशो नगरम् चक्षुष्या गृह्यते श्रवणेन गृह्यते
इति विग्रहे शेषं वक्ष्येषः अपत्यादिभ्योऽन्यभवक्ष्यत्येतस्य पर्यंत अपत्यादिभ्यस्त्वत्र स्थ
पर्यन्ते भ्योऽन्यार्थः स शेषः शेष इति लक्षणं चापि प्रकारस्य शेषार्थे यथाविहितं प्रत्ययो
भवतीत्यण् यानि तद्भवमनुक्रमण्यामः शेषार्थे वेतितव्याः शेषं समानं चाक्षुषं रूपं
श्रावणः शब्दः स्रुघ्ने जातः इति विग्रहे शेष इति वर्तमाने तत्र जातः तत्रेति सप्तमीति स-
मर्थाज्जात इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् शेषं समानम् स्रौघ्नः मा-
थुरः ग्रामे जातः इति विग्रहे शेष इति वर्तमाने ॥ ग्रामाद्यखञौ प्रत्ययौ भवतः तत्र जा-
त इति विषये शेषार्थे ग्रामोपवादः यस्येति चेत्यकारलोपः खकारी नेयाविति खस्य ई-
नादेशः शेषं समानं ग्राम्यः ग्रामीणः प्रावृषि जात इति विग्रहे प्रावृषष्ठप् प्रावृट्शब्दा-
त्सप्तमीसमर्थाज्जात इत्येतस्मिन्नर्थे ठप्प्रत्ययो भवति पकारलोपः ठस्येकादेशः
प्रावृषिको वत्सः स्रुघ्ने भवः इति विग्रहे तत्र भवः तत्रेति सप्तमीसमर्थात् भव इत्ये

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रं· पा· ७७ 77

तस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् शेषं समानम् स्रौघ्नः माथुरः तथैव ग्रा
मस्माहः स्वेर्थे यखञौ भवतः ग्राम्यः ग्रामीणः दिविभवाद् इति विग्रहे तत्रभवइत्येत
स्मिन्नर्थे इकारास्तित्वादिनमिति विशेषणार्थः दित्यएवं गार्गम् अगणम् शास्यम् मध्य
उणांगाणमित्यादि ॥ दंतेभवइति विग्रहे शरीरावयवाच्च शरीरावयववाचिनः प्राति
पदिकाद्यत्प्रत्ययो भवति तत्रभवइत्येतस्मिन्नर्थे शेषं पूर्ववत् दंत्यम् कण्ठ्यम् ओष्ठ्य
म् इति अंतर्गेहे भवमिति विग्रहे ॥ अन्तःपूर्वपदाट्ठञ् ॥ अंतःपूर्वपदादव्ययीभावा
त् ठञ् प्रत्ययो भवति तत्रभवइत्येतस्मिन्नर्थे शेषं पूर्ववत् अंतर्गेहिकं अंतश्शालिकं
अव्ययीभावे शरत्प्रभृतिभ्यो न इत्यकारः समासान्तः अध्यात्मनि भव इति विग्रहे अ
ध्यात्मादिभ्यष्ठञुपसंख्यानेन इति ठञ्प्रत्ययः अन्त्यस्वरमानं आध्यात्मिकम् आधिदैवि
कं आधिभौतिकं अनुशतिकादीनां च अनुशतिक इत्येवमादीनामंगानां पूर्वपदः
स्य चोत्तरपदस्य च स्वरामादेर चो वृद्धिर्भवति कितिञ्णिति वा परतः आनुशातिक
तथैव वैदिकः दैविकः लौकिकः स्त्रियां टिड्ढाणञिति ङीपि लौकिकी वैदिकी
श्रुति अध्यात्मादिराकृतिगणः स्रुघ्नादागत इति विग्रहे ततः आगतः ततइति पञ्च
मीसमर्थादागतादित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् स्रौघ्नः माथुरः त ग्रं· ७७

© Dharmartha Trust J&K. Digitized by eGangotri

ष्येव ग्रामादागत इत्येतस्मिन्नर्थे यखञौ प्रत्ययौ भवतः ग्राम्यः ग्रामीणः शुल्कशाला
याः आगत इति विग्रहौ ॥ ठगायस्थानेभ्यः ॥ आय इति स्वामिग्राह्यो भाग उच्यते तस्य
स्मिन्नुत्पद्यते तस्यायस्थानम् आयस्थानेभ्यः शाल्कभ्यः ठक्प्रत्ययो भवति तत
आगत इत्येतस्मिन्नर्थे शेषं पूर्ववत् शौल्कशालिकः आपणिकः आकरिकः ॥
स्त्रघ्नो निवास इति विग्रहे सोऽस्य निवासः स इति प्रथमसमर्थात् अस्येति षष्ठ्यर्थे निवा
स इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् यत्तु प्रथमासमर्थं निवासश्च
तत्र भवति निवसन्त्यस्मिन्निति निवासो देशः तच्चाते शेषं पूर्ववत् स्रौघ्नः माथुरः तत
ष्येव ग्रामशब्दान्निवास इत्येतस्मिन्नर्थे स्रौघ्नः माथुरः तस्यैव ग्रामशब्दान्निवास इत्ये
तस्मिन्नर्थे यखञौ भवतः ग्राम्यः ग्रामीणः माथुरेण प्रोक्तमिति विग्रहौ ॥ तेन प्रो
क्तं ॥ तेनेति तृतीयासमर्थात् प्रोक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्य
ण् लिङ्गचेणसिंभादिनारीपु माथुरी भक्तिः पाणिना प्रोक्तम् आपिशलिना प्रोक्तमिति
विग्रहे तेन प्रोक्तमित्यण् आमे वृद्धिः यस्याचामादिस्तद्वृद्धं यस्य प्रातिपदिकस्याचामादिर्
वृद्धिसंज्ञो भवति तत्प्रातिपदिकं वृद्धसंज्ञं भवति वृद्धाच्छः ॥ वृद्धात्प्रातिपदिकात्
छप्रत्ययो भवति पाणिनिशब्दाच्छप्रत्ययः आपिशलिशब्दादिनश्चेति इञन्तादणच्छा

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰ पा॰ ७८
78

प्रत्ययापवादः शेषं समानम् पाणिनीयं शास्त्रं आपिशलं शास्त्रं पाणिनीयम-
धीयते आपिशलमधीयते इति विग्रहे पतः तदधीते तद्वेदेत्यण् तस्य प्रोक्ताल्लु-
क् तेन प्रोक्तमित्येतस्मिन्नर्थे यो विहितः स प्रोक्तशब्देनोच्यते तस्मादुत्पन्नस्य तद्धि-
तस्य लुक् भवति पाणिनीयाः छात्राः वररुचिना कृताः श्लोकाः इति विग्रहे कृ-
ते ग्रन्थे इति वर्तते तृतीयासमर्थात् कृते इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवती-
त्यण् यत्कृतं स ग्रन्थश्चेद्भवति शेषं समानम् वाररुचाः श्लोकाः एवमैन्द्रो ग्रन्थः उ-
पगोरिदमिति विग्रहे तस्येदं तस्येति षष्ठीसमर्थादिदमित्येतस्मिन्नर्थे यथा-
विहितं प्रत्ययो भवतीत्यण् शेषं समानम् औपगवम् कापटवम् रथस्येदमिति
विग्रहे रथाद्यत् रथशब्दात् यत्प्रत्ययो भवति तस्येदमित्येतस्मिन्नर्थे रथ्य इति र-
थ्यम् रथ्याङ्गमुच्यते अश्मनो विकारः भस्मनो विकारः इति विग्रहे तस्य विकारः त-
स्येति षष्ठीसमर्थाद्विकार इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यण् भस्-
मायां नस्तद्धिते इति टिलोपापवादः अन् इति प्रकृतिभावो प्राप्ते अश्मनो वि-
कारेतपसंख्यानमिति अश्मन् शब्दस्य टिलोपः अन्यत्र प्रकृतिभाव एव आश्म-
भास्मनः अक्षैर्दीव्यति शलाकाभिर्दीव्यति विग्रहे प्राग्वहतेष्ठगिति वर्तमाने।

ऊं: ७८

तेन दीव्यति खनति जयति जितं तेनेति तृतीयासमर्थात् दीव्यति खनति जयति जि
तमित्येतेष्वर्थेषु ठक्प्रत्ययः आक्षिकः शालाकिकः स्त्रियां आक्षिकी शालाकिकी इ
एन संस्कृतमिति विग्रहे तेनेति वर्तमानात् संस्कृतं ॥ तृतीयासमर्थात् संस्कृतमि
त्येतस्मिन्नर्थे ठक्प्रत्ययः सतः सत्कर्षाधानं संस्कारः दाधिकम् शार्ङ्गवेरिकं शृं
हं करोति ढंकं करोतीति विग्रहे शब्ददर्दुरं करोति इति तृतीयासमर्था
भ्यां शब्ददर्दुरशब्दाभ्यां करोत्यस्मिन्नर्थे ठक्प्रत्ययो भवति शेषं समानम् शाब्दिकः
वैयाकरणः दार्दुरिकः कुंभकारः अस्ति मति नास्ति मति दिष्टं मतिरस्येति विग्रहे अ
स्ति नास्ति दिष्टं मतिः ॥ प्रथमासमर्थेभ्यः अस्ति नास्ति दिष्टशब्देभ्यः तस्येति ष
ष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं मतिश्चेत्सा भवति न च मतिमात्रे प्रत्य
य इष्यते किं तर्हि परलोकः अस्ति अस्ति मतिर्यस्य स आस्तिकः एवं नास्तिकः दिष्ट
मतिर्यस्यास्ति स दैष्टिकः प्रमाणिक इत्यर्थः शुल्कशालायां नियुक्तः आपणेति
युक्तः इति विग्रहे तत्र नियुक्तः तत्रेति सप्तमीसमर्थान्नियुक्त इत्यस्मिन्नर्थे ठक्प्रत्य
यो भवति नियुक्तोऽधिकृतः व्यापारितः इत्यर्थः शौल्कशालिकः आपणिकः आ
करिकः दौवारिकः इत्यर्थः द्वारादीनां च ॥ द्वारादीनां संबंधिनौ य्वोः यकारवका

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰ पा॰ ७५
79

रौ नात्यजन्नरस्य प्रथमाचामादेरचो वृद्धिर्न भवति ताभ्यात् एवं सैजागमो भवति रथं वह-
तीति विग्रहे ॥ प्राग्घिताद्यत् ॥ इति वर्त्तमाने तद्वहति रथयुगप्रासंगं ॥ तद्वहति
द्वितीयासमर्थेभ्यो रथयुगप्रासंगशब्देभ्यो वहतीत्यस्मिन्नर्थे यत्प्रत्ययो भवति रथ्यः
युग्यः प्रासंग्यः धुरं वहतीति विग्रहे ॥ धुरो यड्ढकौ ॥ धुरशब्दात् द्वितीया-
समर्थाद्वहतीत्यस्मिन्नर्थे यत् ढञ् इत्येतौ प्रत्ययौ भवतः आयनेयीनीयियः फढखछघां
त्ययघादेशः धुर्यः धौरेयः सामसु साधुः कर्मणि साधुरिति विग्रहे तत्र साधुः तत्रे-
ति सप्तमीसमर्थात्साधुरित्यस्मिन्नर्थे यत्प्रत्ययो भवति भसंज्ञायां टिलोपे प्राप्ते
ये चाभावकर्मणोरिति प्रकृतिभावः सामन्यः कर्मण्यः साधुरिति प्रवीणो योग्यो
ग्यो वा गृह्यते सभायां साधुरिति विग्रहे सभाया यः सभाशब्दाद्यः प्रत्ययो भवति त-
त्र साधुरित्यस्मिन्नर्थे सभ्यः वत्सेभ्यो हितमिति विग्रहे प्राक्क्रीताच्छः इति वर्त्तमा-
नेन तस्मै हितं ॥ तस्मै इति चतुर्थीसमर्थाद्धितमित्यस्मिन्नर्थे यथाविहितं प्रत्य-
यो भवतीति छप्रत्ययः खछोरीनेयाविति छस्य ईयादेशः वत्सीयो गोधुक् कर-
भीयः दन्तेभ्यो हितमिति विग्रहे शरीरावयवाद्यत् शरीरप्राणिवयवः शरीरावय-
ववाचिनः प्रातिपदिकाद्यत्प्रत्ययो भवति तस्मै हितमित्यस्मिन्नर्थे दन्त्यं कण्ठ्यम् ङं॰ ७५

© Dharmartha Trust J&K. Digitized by eGangotri

ङोऽह्यं ससत्या क्रीतम् अशीत्या क्रीतमिति विग्रहे आगवहन्तस्येति वर्तमानेन क्री
तेनेनेति तृतीयासमर्थात् क्रीतमिति स्मिन्नर्थे यथाविहितं प्रत्ययो भवतीति हक्प्र
त्ययः शेषं समानं साप्रतिकम् आशीतिकम् प्रागिदीये टकारो हेप्रत्ययोपरे
सदा सर्वलोपकदा प्रत्यया एवं विभक्तिसंज्ञायां किमः क इति कआदेशः कदा
यदा तदा ॥ इदमो हिंल् ॥ इदमः सप्तम्यन्तात्काले वर्तमानात् हिंल् प्रत्ययो भ
वति ॥ हस्यापवादः लकारः स्वरार्थः ॥ एतेतो रथोः ॥ रेफादेशयकारादेश च प्र
गेहे भेदे प्रत्यये परतः ॥ इदमो यथा मेत्र्यपत इत इत्येतावादेशौ भवतः हचो
पवादः अस्मिन्काले एतर्हि कालइति किम् अस्मिन्देशे इह अधुना अधुनेति
निपात्यते इदमः अन्नावः अधुना च प्रत्ययः अस्मिन्काले ॥ अधुना ॥ दानींद
मः सप्तम्यन्तात्काले वर्तमानात् दानी प्रत्ययो भवति अस्मिन्काले इदानीं च त
दो दा च तदः सप्तम्यन्तात्काले वर्तमानात् दा प्रत्ययो भवति चकाराद् दानीं च त
स्मिन्काले तदा तदानी प्रकारवचने थाल् प्रकारवचने सति थाल् प्रत्ययो भवति
शेषं समानम् तेन प्रकारेण तथा यथा सर्वथा बहुधा ॥ इदमस्थमः ॥ इदं शब्दे
प्रकारवचने थम् प्रत्ययो भवति ङकारो मकारस्य संज्ञापरित्राणार्थः इदमङ्

© Dharmartha Trust J&K. Digitized by eGangotri

इं: पा: ८०
80

इत्यधिकृत्य ॥ एतेतौ रथोः इदमः एत इत् इत्येतावादेशौ भवतः रेफादौ थकारादौ
प्रत्यये परतः इतरत्र हादेशः अनेन प्रकारेण इत्थं ॥ किमश्च ॥ किंशब्दात्प्र-
कारवचने थमुप्रत्ययो भवति केन प्रकारेण कथं एवं सर्वस्मादिशि वसतीति विग्र-
हे दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्यः दिग्देशकालेष्वस्तातिः दिग्वाचकाः श-
ब्दाः दिक्शब्दास्तेभ्यः दिग्देशकालेषु वर्तमानात्यः सप्तमीपञ्चमीप्रथमान्तेभ्यः स्वा-
र्थेस्तातिप्रत्ययो भवति यथासंख्यमनेनेष्यते इकारमकारसपिसकारपरित्राणा-
र्थः एवं बहुलप्रकार एवं धावरणानुवर्तन बहुषामिति वर्तमाने । अस्ताति-
च । अस्तातिच प्रत्यये परतः एवं धावरणानुवर्तन अधः अवस्त इत्येते आदेशा भ-
वन्ति यथासंख्येन स्वाद्यन्तानि अध्यायात्सप्तपद इति पुरस्तात्पुरस्तादागतः पुरस्ताद्रमणीयम्
पुरस्तादागतः पुरस्ताद्रमणीयं एवमधस्तादवस्तादित्यादि संख्याया विधार्थे धा
संख्यायाश्चित्यो विधार्थे धाप्रत्ययो भवति विधार्थः प्रकारः धाप्रत्ययान्तस्य
धान्तस्य एवं बहुधा एकधा द्विधा त्रिधा चतुर्धा पञ्चधेत्यादि ॥
सर्वे इमे आढ्याः अयमेषामतिशयेनाढ्यः सर्वे इमे पटवः अयमेषामतिशये-
न पटुः इति विग्रहे अतिशायने तमबिष्ठनौ ॥ अतिशायने प्रकर्षः निपातनात्

ॐ: ८०

© Dharmartha Trust J&K. Digitized by eGangotri

दीर्घत्वं प्रतिशायनविशिष्टेऽर्थे वर्तमानात्प्रातिपदिकात्स्वार्थे तमबिष्ठनौ प्रत्य-
यौ भवतः पकारस्तकारौ स्वरार्थौ स्वाद्युत्पत्तिः आढ्यतमः इष्ठनस्तु विशेषेय
स्सु इति वर्तमाने टेः इष्ठनिमनिच्ईयसुन् इत्येतेषु परतः भस्य टेः लोपो भ-
वति पटिष्ठः तथा दर्शनीयतमः लघिष्ठ इत्यादि द्वाविचावाच्योः अयस्तुन
योरतिशायेनाच्यः द्वाविंशोपस्कृत अयस्तुनयोरतिशायेन प्रदीतिति विनष्टे द्विव-
चनविभज्योपपदे तरबीयसुनौ द्वयोरर्थयोर्वचने द्विवचने द्विवचनविभज्ये प्रा-
तिपदिकादतिशायेन तरबीयसुनौ प्रत्ययौ भवतः यथासंख्यम जनेष्वाते यत्तुब
पलोपः एवं वत्स्वाद्युत्पत्तिः अन्यतरः अन्यत्वष्टुं वंवादिलोपः उगिदचामित्या
दिनानुम् सात्विधायादिनादीर्घः पटीयान् पटयोसौ पवदर्शनीयतरः लघीया
नित्यादि प्रशस्यशब्दस्यापि एवं वत्तिशायनविशिष्टेऽर्थे इष्ठन् ईयसुनोः प्र
त्ययोः प्रत्यया भवति ततः प्रशस्यस्य श्रः प्रशस्यशब्दस्य श्र इत्ययमादेशो भवति
इष्ठन् ईयसुनोरजाद्योः प्रत्यययोः परतः ततः प्रकृत्यैकाजित्यस्य प्रकृत्या भाव :
श्रेष्ठः श्रेयानित्यादि अत्रादौ इति प्रकृतस्य सप्तमी विभक्तिः पञ्चम्यन्तत्वेन सर्वे इ
मे प्रशस्याः अयमेषामेवायः उभौ प्रशस्यौ अयमनयोरतिशायेन श्रेयान् अय

© Dharmartha Trust J&K. Digitized by eGangotri

तृ॰ पा॰ ८ ८०।

तस्मात्स्त्रियानित्यादि प्रकारेगुणवचनादेवेति नियमाद्गुणवचनादेवइष्टेयप्रत्ययो भवति ः प्रकारवचनेदानुयन् सामान्यस्यविशेषको भेदः प्रकारः तस्यवचने वर्तमानात्स्वेता त्जातीयन्प्रत्ययो भवति प्रकारवतिजातीयन् थल्प्रत्ययः प्रकारमात्रेजातीयन्दृत्व स्यरेफः तपोत्तमरीतीति विशेषणात्स्वार्थप्रत्ययात्तिः पटुजातीयः मृदुजातीयः शोभनजातीय इत्यादि ॥ तद्धिताधिकारः समाप्तः ॥ तस्य प्रपञ्चं सुसंक्षेपं पाणिनीयेन लक्षणा दिव्यभाषोपसंहारे सज्यते षपाणिनिः इह लोके हि विधं पदं प्रथक्ख्यातं सुबन्तं तिङन्त ञ्चेति तत्र सुबन्तमुक्तम् अथ तिङ्विभक्तिर्यथासम्भवं क्रियावाचिभ्यो धातुभ्यः परस्य लकार स्य स्थाने संक्षेपेणोपदिश्यते का चेति तिङ्विभक्तिः तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इति पकार टकार ङकार रादयोऽनुबन्धाः कार्यार्थः पकारः स्वरार्थः टकारः इडादिरिति विशेषणार्थः ङकारास्तिङि ति विशेषणार्थः पूर्वेनावपरस्मैपदं लः परस्मैपदमिति वचनात् लादेशाः परस्मैपदसं ज्ञं भवति परेणवात्मनेपदम् तङानावात्मनेपदमिति वचनात् तङ्प्रत्याहारेण वा नां वचनानाम् आव इति शानस्थानचे ग्रहणे पूर्वेण परस्मैपदसंज्ञायां प्राप्तायां तदा नयोर्वचनेनात्मनेपदसंज्ञा विधीयते कश्च लकारः तत्र दशलकाराः लइत्युच्यन्ते केऽउन

उं॰ ८

लेल्लट् लिट् लुट् लृट् लेट् लोट् इति षट् टितः लङ् लिङ् लुङ् लृङ् इति चत्वारो
ङितः तत्र वर्तमाने लट् परोक्षे लिट् अद्यतनी लुट् लृट् शेषे च लिङ्यर्थे लेट् विधि
निमंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् लो[illegible] अनद्यतने लङ् आशंसावचने लिङ्
भूते लुङ् लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति विभागः एते दश लकाराः ॥ यथा लक्ष
णधातोर्विधीयंते धातवः पुनरर्थवशाद्द्विविधा भवंति सकर्मकाश्चाकर्मकाश्चेति त
त्र सकर्मकाः येषां कर्मापेक्षा क्रिया भाजः ग्रामं गच्छति कटं करोति वेदमधीते इत्येवमाद
यः अकर्मकास्तु आस्ते शेते इत्यादयः ते पुनर्दशविधा भवंति विकरणप्रत्ययभेदेन
शः विकरणा भ्वादयः ॥ १ ॥ लुग्विकरणा अदादयः ॥ २ ॥ श्लुविकरणा जुहो
त्यादयः ३ ॥ श्यन्विकरणा दिवादयः ४ ॥ श्नुविकरणाः स्वादयः ५ ॥ शः विक
रणास्तुदादयः ६ ॥ श्नाविकरणा रुधादयः ७ ॥ उविकरणास्तनादयः ८ ॥ श्ना
विकरणाः क्र्यादयः ९ ॥ स्वार्थे ण्यन्ताश्चुरादयः ॥ १० ॥ ते पुनः सर्वे तिङ्भेदात्त्रिव
धास्त्रिविधा भवंति परस्मैपदिनः आत्मनेपदिनः उभयपदिनश्चेति कदाचित्लक्षणा
न्तरेण परस्मैपदिनोप्यात्मनेपदमपि भवति आत्मनेपदिनोपि परस्मैपदमपि भवति ॥
तत्रेत्संज्ञालोपः प्रयोजनं चोच्यते उपदेशेजनुनासिकः इत उपदेशो सूत्रपाठे धातु॥

© Dharmartha Trust J&K. Digitized by eGangotri

वृ॰ पा॰ ८२ पाठे गणपाठे च योऽजनुनासिकः स इत्संज्ञो भवति ॥ हलन्त्यम् ॥ उपदेशे यदन्त्यं
हल् तु इत्संज्ञं भवति न विभक्तौ तुस्माः विभक्तौ वर्तमानानां तवर्गसकारमका
राणामित्संज्ञा न भवति ॥ आदिर्ञिटुडवः ॥ ञिटुडु इत्येते समुदाया आदितो वर्त
माना इत्संज्ञा भवंति ञिमिदा स्नेहने ञिक्ष्विदा स्नेहनमोचनयोः टुवेपृ कम्पने टुओ
श्वि गतिवृद्ध्योः डुकृञ् करणे डुक्रीञ् द्रव्यविनिमये डुधाञ् धारणपोषणयोः डुप
चष् पाके डुवप् बीजसंताने ॥ षः प्रत्ययस्य ॥ षकारः प्रत्ययस्यादितो वर्तमान इ
त्संज्ञो भवति ॥ चुटू ॥ चवर्गटवर्गौ धातोः प्रत्ययस्यादितो वर्तमानौ चवर्गटव
र्गौ इत्संज्ञा भवतिः लकारशकारककाराः तस्य लोपः यस्येत्संज्ञा तस्य लोपः भवति तत्रात्म
नेपदिनामकारोदात्तङित आत्मनेपदमिति विशेषणार्थः परस्मैपदानि ज्ञापनार
णार्थः उभयपदिनां स्वरितञितः कर्त्रभिप्राये क्रियाफले इति विशेषणार्थः ईकारः
श्वीदितो निष्ठायामिति विशेषणार्थः उकार उदितो वेति विशेषणार्थः ऋकारो नाग्लोपिशा
स्वृदितामिति विशेषणार्थः ऌकारः पुषादिद्युताद्य्ऌदितः परस्मैपदेष्विति विशेषणा
र्थः एकारो ह्म्यन्तक्षणश्वसजागृणिश्व्येदितामिति विशेषणार्थः ओकारः ओदितश्चे
ति विशेषणार्थः ओहाककाकारोश्चब्रीहिकालयोरभिविशेषणार्थः ङकारः अनु उं॰ ८२

४२

© Dharmartha Trust J&K. Digitized by eGangotri

धातोङित आत्मनेपदमिति विशेषणार्थः इकस्मणेककार अधीगर्थदयेषांकर्मणी
ति विशेषणार्थः ङकारः अनुदात्तङित आत्मनेपदमिति विशेषणार्थः शप्श्यन्प्योः पका
रोऽस्थाघ्वोरिदिति विशेषणार्थः सिङकारो मोनः ऊङिति विशेषणार्थः नकारः स्वरित
ञित इति विशेषणार्थः पेरष्वकारः पाघ्राध्माधेत्यादिशः श इति विशेषणार्थः रोणानावौ
रः समाम्सस्मात्रेष्वनत्यन्थ्य इति विशेषणार्थः इग्लहः ह्लितोपधानिति विशेषणार्थः इग्लहो
ह्लितः क्रिरिति विशेषणार्थः लटः अकारः विदोलटोवेति विशेषणार्थः लिटः इकारः
लिटः कानज्वेति विशेषणार्थः लटः उकारः लटः अथमस्यडारौरस इति विशेषणा
र्थः स इति विशेषणार्थः ल्टृटः ऋकारः ल्टृशेषे चेति विशेषणार्थः लेटः एकारः ले
टोऽडाटाविति विशेषणार्थः लोटः ओकारः लोटो लङ्वदिति विशेषणार्थः लिङ इका
रो लिङः सीयुडिति विशेषणार्थः टकार टित आत्मनेपदानां टेरेरिति विशेषणार्थः लु
ङः उकारो लुङिति इति विशेषणार्थः ल्टृङः ऋकारस्यतासी ल्टृलुटोरिति विशेषणार्थं
ङकारो नित्यं ङितः इति विशेषणं शपः पकारो नुदात्तौ सुप्पिताविति विशेषणम् शानो नकौ
र ... न्यानित्यमिति विशेषणम् सर्वेषां शकारस्तिङ्शित्सार्वधातुकमिति विशेषणम्
आगमेषु टकारककारौ आद्यन्तौ टकिताविति विशेषणम् मकारो मिदचोऽन्त्यात्पर इति

© Dharmartha Trust J&K. Digitized by eGangotri

वृ॰ पा॰ ष्
83

विशेषणं प्रत्ययेषु ङकारककारौ क्ङितिचेति विशेषणार्थौ तत्रतिङ्शित्सार्वधातुक
मार्धधातुशेषः ॥ तत्रौशैसार्वधातुकेविकरणाउच्यंते प्रथमंशप् विकरणेषु भूवादिभ्यो
धातुभ्यप्रथमश्शप्तापरस्मैपदिकादकर्मकाद्भू इत्येतस्माद्धातोः परस्य लकारस्य स्थानेति
ङ्विभक्तिर्योज्यते शप्सनाद्यामन्ताधातुः भूइत्ययंधातुः सत्तायामर्थेवर्त्तते भूइतिस्थितेनिरनु
नासिकत्वादिकारस्येत्संज्ञानभवति भूवादयोधातवः भूयत्येवमादयः शब्दाः क्रियाव
चावाधातुसंज्ञाभवंतीति समुदायस्यधातुसंज्ञाततोधात्वधिकारविहितानेकप्रत्ययं
प्रसंगेमतिवक्तुर्विवक्षा एविकाशप्प्रवृत्तिरिति विवक्षावशात् ॥ प्रत्ययः ॥ अधि
कारोयम् ॥ आपंचमाध्यायपरिसमाप्तेः यायानितऊर्ध्वंप्रवक्ष्यामः प्रत्ययसंज्ञास्ते
वेदितव्याः प्रकृत्युपाधेःपाधिविकारागमवर्जयित्वा ॥ परश्च ॥ परश्चसभवतिधमे ॥
वाप्रातिपदिकाद्वायः प्रत्ययसंज्ञाः ॥ धातोरधिकारोयम् यदितऊर्ध्वमनुक्रमिष्याम
आतृतीयाध्यायपरिसमाप्तेः धातोरित्येवंतद्वेदितव्यम् धातोरित्यनुवर्त्तमानोवर्त्तमा
नेलट्आरब्धोपरिसमाप्तश्चवर्त्तमानाकालः तस्मिन्वर्त्तमानेर्थेवर्त्तमानाद्धातोर्लट्
प्रत्ययोभवति अकारस्येत्संज्ञालोपः प्रयोजनम् टित आत्मनेपदानांटेरे इति विशेष ॐ॰
णम् लकारस्य लशब्दउच्छिते इतिहस्संज्ञासामामा ॥ लस्येति स्थानेत्वेनस्थानंमात्र ष्

© Dharmartha Trust J&K. Digitized by eGangotri

भवति एवमुत्तरत्रलिङादिषु नवसु लकारेषूदाहरणम् ॥ लस्य ॥ अधिकारोयं यदित
ऊर्ध्वमनुक्रमिष्यामः लस्येति तद्वेदितव्यं किं विदं लस्येति दशलकार प्रत्ययविशि
ष्टा विहिता अर्थविशेषे कालविशेषे च तेषां विशेषकारानुबन्धानुच्चार्यसामान्य
लितितद्धारिरुह्यते प्रकारस्मरणार्थः लस्य त्वनुवर्तमाने तिप् तस् झि सिप् थ
स् थमिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् लमितिर्धोर
य आदेशा भवन्तीति सर्वेषु तिबादिषु युगपत्प्राप्तेषु धातोः परस्मैपदित्वात् शेषा
त्कर्तरि परस्मैपदम् उपधन्याद्द्यः शेषः येभ्यो धातुभ्यो येन शेषाणामात्मनेपदमुक्तं
तेनायोन्यः स शेषः येभ्य आत्मनेपदं न विहितं तेभ्यः परस्य लकारस्य कर्तरि परस्मैप
दं भवति शेषादेव नान्यस्मात् किं च परस्मैपदं लः परस्मैपदं लादेशाः परस्मैपदसंज्ञ
या भवन्ति एवमपि सर्वेषु परस्मैपदेषु प्राप्तेषु ॥ तत्रापि तिङस्त्रीणि प्रथममध्यमोत्त
माति ङोऽष्टादशप्रत्ययाः नवपरस्मैपदसंज्ञकाः नवात्मनेपदसंज्ञकाः तत्र नवात्म
नेपदमिति वचनात् तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमसंज्ञा भवन्ति इति प्रथमत्रिक
स्य प्रथमपुरुषसंज्ञा मध्यमत्रिकस्य मध्यमपुरुषसंज्ञा उत्तमत्रिकस्य उत्तमपुरुषसं
ज्ञा एवमात्मनेपदेष्वपि ज्ञेयं ॥ शेषे प्रथमः ॥ शेषइतिमध्यमोत्तमाविषयादन्य

© Dharmartha Trust J&K. Digitized by eGangotri

तृ॰ पा॰ ८४ 84

उच्यते यत्र युष्मदस्मदी समानाधिकरणो न स्तः तत्र शेषे प्रथमपुरुषो भवति तत्रापि ता
न्येकवचनद्विवचनबहुवचनान्येकशः तानि तिङ् त्रीणि त्रीणि वचनानि एकशः ए
कवचनद्विवचनबहुवचनसंज्ञानि भवंति इति तिर्धंति प्रथमैकवचनम् तस् इति
द्वितीये द्विवचनं झीति तृतीये बहुवचनम् एवमन्यत्रापि इत्येकवचनद्विवचनब
हुवचनसंज्ञायां ॥ द्व्येकयोः ॥ द्विवचनैकवचन ॥ द्व्येकयोः ॥ द्विवचनैकव
चने भवतः एते अपि सामान्यविहितयोः द्विवचनैकवचनयोरर्थाभिधानमित्येकत्व
विवक्षायां परस्मैपदे प्रथमपुरुषैकवचनं तिप् पकारलोपः प्रयोजनं अनुदात्तौ सु
प्पितावित्यनुदात्तत्वम् तिङ् शित्सार्वधातुकं तिङः शितश्च प्रत्ययाः सार्वधातुक
संज्ञा भवंति इति सार्वधातुकसंज्ञायां सार्वधातुके यगिति वर्तमाने ॥ कर्तरि शप्
कर्तृवाचिनि सार्वधातुके प्रत्यये परतः धातोः शप् प्रत्ययो भवति शकारलोपः प्रयो
जनं एवं वत् यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेंगमित्यंगसंज्ञायां ॥ अंगस्य मिदेर्गु
मित्यधिकृत्य ॥ सार्वधातुकार्धधातुकयोः ॥ सार्वधातुके आर्धधातुके च परतः इ ॐ
गंतस्यांगस्य गुणो भवति भवति अर्थविवक्षायां परस्मैपदे प्रथमपुरुषद्विवचनम् तस्
सकारस्योपदेशे जनुनासिक इत् इत्यधिकृत्य हलंत्यमितीत्संज्ञा प्राप्ता न विभक्तौ

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मादिति प्रतिषिध्यते सुप्तिङन्तं पदमित्यपि ह्याति पदस्य ससजुषो रुः ॥ खरवसान
जे॰ योर्विसर्जनीयः भवतः बहुत्वविवक्षायां परस्मैपदे प्रथमपुरुषबहुवचनं भवतीति
झि आयनेयीनीयियः फढखछघां प्रत्ययादीनामित्यपि ह्यादेशः ॥ झोऽन्तः ॥ प्रत्ययाव-
यवस्य झकारस्य अन्त इतीत्संज्ञायां आमाद्यन्तात् इति सूत्रारम्भात् भवति अत इति
अकारस्तकारपरित्राणार्थः अतो गुणे इति पररूपत्वम् भवन्ति मध्यमपुरुषविवक्षा-
यां युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः समानाभिधेये युष्मद्युपपदे
सति व्यवहिते चाव्यवहिते च स्थानिनि प्रयुज्यमाने प्रयुज्यमानेऽपि मध्यमः पुरुषो
भवति त्वं भवसि युवां भवथः यूयं भवथ उत्तमपुरुषविवक्षायां ॥ अस्मद्युत्तमः समा-
नाभिधेये अस्मद्युपपदे सति व्यवहिते चाव्यवहिते च स्थानिन्यपि ॥ प्रयुज्यमाने
अप्रयुज्यमानेऽपि उत्तमपुरुषो भवति ॥ तस्तसस्य मः सार्वधातुकेत्यनुवर्तमाने
अतो दीर्घो यञि अकारान्तस्याङ्गस्य यञादौ सार्वधातुके परतः दीर्घो भवति अहं भ-
वामि आवां भवावः वयं भवामः अप्रयुज्यमानेऽपि अस्मदि भवामि भवावः भवा-
मः अनुदात्तङित आत्मनेपदमित्यनुवर्तमाने विपराभ्यां जेः ॥ विपरापूर्वा-
ज्जयतेर्धातोरात्मनेपदं भवति ॥ टित आत्मनेपदानां टेरे ॥ टितो लकारस्य यान्यात्म-

© Dharmartha Trust J&K. Digitized by eGangotri

२

तु॰ पा॰ ८५ 85

नेपरानि तेषां दैरेकारादेशो भवति विजयते सार्वधातुकमपित् ॥ सार्वधातुकं य
दपित् तद्ङिद्वद्भवतीति विद्वद्भावात् अतेयं ङ्इत्यनुवर्तमाने ॥ आतो ङितः ॥ आ
कारस्य ङिदवयवस्य अकारान्तादेशात् ङ्ग्रस्याइ इत्ययमादेशो भवति अकारोयं
कारलोपपरित्राणार्थः लोपो व्योर्वलीति यलोपः आद्गुण इति गुणः विजयेते वि
जयन्ते ॥ याम्स्मे ॥ याम् इत्ययमादेशो भवति विजयेम विजयेथे विजयध्वं
विजयेय विजयावहि विजयामहि एवं पराजयते पराजयन्ते इत्यादि ॥ ष्मिङ् ईषद्धसने
धात्वादेः षः सः ॥ धातोरादिषकारस्य सकारादेशो भवतीति षस्य सः आदेशप्र
प्रत्यययोरिति षत्वव्यवस्थापनार्थः पाठे धातवः केचिदुपदिष्टाः केचन तेषां
तथापठ्यन्ते अयथावालतत्रां क्रियते ॥ अजन्त्यपराः षादयः षोपदेशाः ॥ ष्मि ॥ स्मि
टिस्वदिस्वञ्जिस्वपयश्च स्मिङपि सृजिस्तृस्त्यैसेकवर्जम् विष्वक् अनुधातुङित आ
त्मनेपदं अनुदात्तेतो ये धातवः ङितश्च तेभ्यः आत्मनेपदम् भवति नान्येभ्यः विस्म
यते विस्मयेते विस्मयन्ते अजिसेवा यामश्रयति ॥ स्वरितेतः कर्त्रभिप्राये क्रिया
फले ॥ स्वरितेतो ये धातवो ञितश्च तेभ्यः आत्मनेपदं भवति कर्तारं चेः क्रियाफलम
भिप्रैति क्रियायाः फलं प्रधानभूतं ॥ यदर्थमेषा क्रिया आरभ्यते उभ्रत्वात्तस्वकारवा ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

ष्यस्य भवतीति नत्वं: अयते इङो ऽपि गति वृद्धोः ष्ययति इकारांताः ॥ डीङ् विहायसि
गतौ न तत्पूर्वं: उड्डयते णीञ् प्रापणे णो नः धात्वादेः णकारस्य नकारादेशः इति
णस्य नः ॥ उपसर्गादसमासेपि णोपदेशस्य इत्यस्य णत्वविधेयवस्थार्थं णोपदेशः धा
तवः केचिदुपदिश्यंते केचन लेतथा पाठ्यंते अथवा लतणे क्रियते सर्वाणाद्ययोणो
पदेशाः स्मृ नाति नंदि नदि नक्ष नाथ वर्जं नयति नयतः नयंति नयति प्र
वेः उपसर्गादसमासेपि णोपदेशस्य ॥ णउपदेशो यस्यासौ णोपदेशः णोपदेशस्य धातो
र्णकारस्य उपसर्गस्थान्निमित्तात्परस्य नकारादेशो भवति समासोपि समासेपि प्रण
यति इति इकारांताः ॥ गुङ् अगतौ गवति अवति उङ् गतौ अवति अवति गुङ् अवणो अ
वति घुङ् ङुङ् च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ च्यवते भ्यवते ज्यवते प्रवते प्लवते इत्या
दि उकारांताः ॥ भू सत्तायां उ धातुः भवति पूङ् पवने पवते मूङ् बंधने मवते ऋ
कारांताः ॥ स्मृ चिंतायां उणः स्मरत्वं स्मरति हृञ् हरणे हरति कर्त्रभिप्राये क्रिया
फले हरते ऋकारांताः ॥ तृ प्लवनतरणयोः तरति ऋकारांताः ॥ धेट् पाने धयति वेञ् त
तुसंताने वयति कर्त्रभिप्राये क्रियाफले वयते ह्वेञ् स्पर्धायां ह्वयति ह्वयते निसमप
विभ्यो ह्वः निसम उपविभ्य इत्येव ह्वयते धातोरात्मनेपदं भवति निह्वयते संह्वय

© Dharmartha Trust J&K. Digitized by eGangotri

धा॰ ते उपजयते विजयते स्यर्थोयं विषये आख्यात् जयते धातोरात्मनेपदं भवति मल्लो
पा॰ मल्लमाजयते एकारांताः ॥ लेह षंत्वयते लायति लैगाने विरामे मायति ध्यै चिंतायां
८९ ध्यायति कैगै शब्दे कायति गायति दैप् शोधने अवदायति एकारांताः ओकारांतादिवा
86 दिष्वेव ओकारांतानां संभवंत्येव ॥ अथ हलंता अकारोपधाः डुपचष् पाके ॥ पचति
पचते यज देवतापूजासंगतिकरणदानेषु यजति यजते भज सेवायाम् भजति भ
जते शप आक्रोशे शपति शपते डुवप बीजसंताने वपति वपते उभयतोभाषाः त्यज
हानौ त्यजति फल निष्पत्तौ फलति वम निवमे वमति हम हासे हमति दह भस्मीकर
णे दहति षल ज्वल पन्नूहेनो षलति ज्वलति पतति रभ राभस्ये आरभते डुलभष् प्राप्तौ
लभते हद उरीषोत्सर्गे हदते अकारोपधाः ॥ डुयाचृ याञ्चायाम् याचते गाहू वि
हने स्नाहूते ग्लाही शब्द ज्ञारते आकारोपधाः मिह सेचने उगन्त हृपरस्य उगन्त्वा
गस्य लहृपरस्य च गुणो भवति मा व धातु का ब धातु कयोः परतः मेहते चित संचेत
ने चेतति कित निवासे केतति इकारोपधाः ॥ जीव प्राणधारणे जीवति मील
स्तभो म्लति मीलति निमीलने मीलति संमीलति क्रीडृ विहारे क्रीडति क्रीडो नु
संपरिभ्यश्च ॥ अनु संपरि इत्येवं पूर्वात् क्रीडे आत्मनेपदं भवति अनुक्रीडते संक्रीड ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

तेपरिक्रीडते आडेडतं ईकारोपधाः अथोकारोपधाः ॥ गुह संवरणे ऽगंतल
घूपस्य चेति गुणः ऊदुपधायाः गोहः गुहेरुपधाया ऊकारादेशो भवति उपगूः
हते उपगूहति रजिग्रव्यञ्जने गाहे ॥ इदितो नं धातोः इदितो धातोः नुमागमो
भवति रंजति ष्ठिवुक्लमाचमां शिति ष्ठिवु निरसने क्लमु ग्लानौ गत्वे चमु अदने आ
ङ् पूर्वः इत्येतेषां दीर्घो भवति शिति परतः ष्ठीवति धात्वादेः षः स इति सत्वे प्राप्ते
न प्राप्ते ष्ठिवुष्वष्कोर्न प्रतिषेधो वक्तव्य इति सत्वं न भवति क्लामति भिवमित्याह
णत्वयुः आचामति चमे राङ्पूर्वस्य ग्रहणात् इह माभूत् चमति विचमति क्रमप
रस्मैपदेषु ॥ क्रमपरस्मैपदेष्वितेपदेषुत्वे ऽप्यपरस्मैपदेषु शिति परतः दीर्घो भवति क्रा
मति अनुपसर्गाद्वा ॥ अनुपसर्गान्निमित्तात्क्रमतेर्धातोरात्मनेपदं वा भवति क्र
मते क्रामति अनुपसर्गादिति किं संक्रमति आङ उद्गमने आङ उद्यात्क्रमतेरुद्ग
मने यो वर्तमानादात्मनेपदं भवति भानुराक्रमते आक्रमते चन्द्र आक्रमते दिवस
आक्रमते च ज्योतिषि ज्योतिरुद्गमनग्रहणात् इह माभूत् आक्रामति धूमो हर्म्यतलम्
प्रोपाभ्यां समर्थाभ्यां प्रपरस्मात्क्रमतेरात्मनेपदं भवति
तौ चेत्प्रोपौ समर्थौ तुल्यार्थौ भवतः नरः प्रक्रमते भोक्तुं उपक्रमते भोक्तुं समर्थौ

इं॰ पा॰ ८३ 87

ष्यामितिविकरणद्वैविध्यः प्रक्रामतिगच्छतीत्यर्थः उपपरेयार्थप्रक्रामतिगच्छतीत्यर्थः
इषुगमियमंछः ॥ इषुइच्छायांगम्लृगतौयमउपरमेइत्येतेषांशितिपरतःछत्वं
भवति इच्छतिगच्छतियच्छति पाघ्राध्मास्थाम्नादाणदृश्यर्तिसर्तिशदसदांपिबजि
घ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ पादीनांपिबादय आदेशाभवंति
शितिपरतः पिबतिजिघ्रतिधमतितिष्ठतिमनतियच्छतिपश्यतिऋच्छतिधावति
शदेशितः ॥ शद्लृशातनेइत्यस्माच्छितः आत्मनेपदंभवतिशीयतेसदेरप्रतेः
सदेःसकारस्यउपसर्गान्निमित्तादप्रतेरन्तरस्यमूर्धन्यादेशोभवतिनिषीदति
विषीदतिइहनभवतिप्रतिसीदति ॥ दंशसंजस्वंजांशपि दंशदशनेषंजसं
गे ष्वंजपरिष्वंगेइत्येतेषामनुनासिकलोपोभवतिशपिपरतःदशतिसजति
उपसर्गात्सुनोतीतिषत्वंपरिष्वजति ॥ रंजरागेइत्यस्यरंजेश्चअनुनासिक
लोपःभवतिरजति ॥ गुपूधूपविच्छिपणिपनिभ्यआयः गुपूरक्षणेधूपसंतापे
विच्छगतौपणव्यवहारेस्तुतौच पनच इत्येतेभ्यआयप्रत्ययोभवति आयादय
आर्धधातुकेवा ॥ सार्वधातुकार्धधातुकयोर्गुणः इगन्तलघूपधस्यगुणः ॐ॰
गोपायतिधूपायतिविच्छायतिपणायतिपनायतेस्तुत्यर्थेनपनिनासाहचर्या

© Dharmartha Trust J&K. Digitized by eGangotri

नरर्थः णिङः प्रत्ययस्तस्यानुबन्धत्वात्तेनाप्रत्ययान्तानामात्मनेपदं न भवति णिङि पनीदं
त्मनोपदिनो ऋतेरीयङ् ऋतिः सौत्रो धातुर्घृणायां वर्तते तेन तत ईयङ् प्रत्ययो भवति
ङकार आत्मनेपदार्थः गुणप्रतिषेधार्थश्च ऋतीयते ॥ कमेर्णिङ् कमेर्धातोर्णि
ङ्प्रत्ययो भवति णकारो वृद्ध्यर्थः ङकारः आत्मनेपदार्थः अचो ञ्णितीत्यपि वृद्धाव
त उपधाया इति वृद्धिः सनाद्यन्ता धातवः सनादयः प्रत्यया अन्ते येषां ते सनाद
यः सन्नन्ता धातुसंज्ञा भवन्तीति शप् गुणः कामयते ॥ दीप्यधूङो
अनुदात्तेतः ङित आत्मनेपदम् अनुदात्तेतो धातवः ङितश्च तेभ्य एवात्मनेपदं भवति ङि
त आत्मनेपदानामादेरे टितो लकारस्य यान्यात्मनेपदानि तेषां टेरेकारादेशो भव
ति ॥ पचते ॥ सार्वधातुकमपित् सार्वधातुकं यदपित् तत् ङिद्वद्भवति अते
रियङ् इति वर्तमाने आतो ङितः ॥ अकारान्तादङ्गादुत्तरस्य ङिदवयवस्य आकारस्य
इयादेशो भवति आद्गुणः लोपो व्योर्वलि ॥ धातोर्यकारवकारयोर्लो
पो भवति वलि परतः पचेते पचन्ते ॥ थासः से टितो लकारस्य थासः से इत्ययमादेशो
भवति पचसे पचेथे पचध्वे अतो गुणे पचे पचावहे पचामहे इपचेषु णिचादिषु
स्यादिन्निङ्वदिति संज्ञा इगन्ताङ्गः क्ङिति विशेषणार्थः एवंवत् लङादिषु

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰
पा॰
८८

चतिपचतः पचन्तिपचसि पचथःपचथ पचामिपचावः पचामः स्वरितञितः क
र्त्रभिप्राये क्रियाफले ॥ स्वरितेतो ये धातवो ञितश्च तेभ्य आत्मनेपदं भवति कर्तारं
चेत्क्रियाफलमभिप्रैति पचते पचेते पचन्ते पचसे पचेथे पचध्वे पचे पचावहे पचामहे
इति ॥ तेभ्य एव धातुभ्यो ऽन्यत्रेत्यपि द्रष्टव्य ॥ अनद्यतने लङ् अतीतायाश्च रात्रेः
पश्चिमो यामः सकालेदिवसः आगामित्याश्च रात्रेः पूर्वो यामः एषो ऽद्यतन इत्य
भिधीयते अविद्यमानाद्यतने भूतेर्थे वर्तमानाद्धातोर्लङ् प्रत्ययो भवति ॥ लङ्
लङ्लृङ्ष्वडुदात्तः ॥ लङ् लुङ् लृङ् इत्येतेषु परतः अडागमो भवति स
च धातुश्च भवति इतश्च लोपः परस्मैपदेष्विति अनुवर्तमाने नित्यं ङितः
ङिल्लकारसंबंधिनः परस्मैपदस्य इकारस्य नित्यं लोपो भवति शप् उणश्च अभव
त् ॥ तस्थ ॥ स्थमिपां तांतंतामः ङिल्लकारसंबंधिनां तसादीनां चतुर्णां यथास
ङ्ख्यं तामादय आदेशा भवंति अभवतां संयोगांतस्य लोपः संयोगांतस्य पदस्य लोपो
भवति अभवन् अभवः अभवतम् अभवत अभवम् नित्यं ङितः अनुवर्त्य सउत्त
मस्य ङिल्लकारसंबंधिन उत्तमस्य प्रत्ययस्य नित्यं सकारस्य लोपो भवति अभवाव अ
भवाम आडजादीनाम् अजादीनामंगानां लङ्लुङ्लृङ्क्षु परतः आडागमो भव

ङी॰

© Dharmartha Trust J&K. Digitized by eGangotri

तिसचोधातश्च भवति आटश्च ॥ आटः अविपरतः एवंपरयोः स्थाने वृद्धिः ऐ
कारादेशो भवति पेपत पेपेतां पेरंत पेस्थाः पेपेथाम् पेपध्वम् पेपेपावहि
पेपामहि अपचत् अपचताम् अपचन् अपचः अपचतम् अपचत अपचं
अपचाव अपचाम अपचत अपचेतां अपचन्त अपचथाः अपचेथाम् अप
चध्वं अपचे अपचावहि अपचामहि ॥ पञ्चमी ॥ विधिनिमन्त्रणामन्त्रणाधीष्ट
सम् प्रश्नप्रार्थनेषु लिङ् ङित्यधिकृत्य ॥ लोट् च विध्यादिष्वर्थेषु लोट् प्रत्य
यो भवति ॥ आशिषि लिङ्लोटौ ॥ आशीर्विशिष्टेऽर्थे वर्तमानाद्धातोर्लिङ्लोटौ
प्रत्ययौ भवतः ॥ एरुः ॥ लोडादेशानामिकारस्य उकारादेशो भवति भवतु ॥
तुह्योस्तातङ् आशिष्यन्यतरस्याम् ॥ तुह्योरित्येतयोराशिषि विषये तातङ् आदेशो भ
वति अन्यतरस्यां ङकारो गुणवृद्धिप्रतिषेधार्थः नानादेशार्थः भवतात् ॥ लोट
लङ्वत् ॥ लोटो लङ्वत्कार्यं भवति तामादयः सलोपश्च भवताम् भवत सेर्ह्यपि
च्च ॥ लडादेशस्य सेर्हिरादेशो भवति स च अपिच्च भवति अतो हेः ॥ अकारादुत्तर
स्य हेर्लुग् भवति भव भवतात् भवतम् भवत ॥ मेर्निः ॥ लोडादेशस्य मेः नि
आदेशो भवति आडुत्तमस्य पिच्च लोड्संबन्धिनस्तूत्तमपुरुषस्य आडागमो भ

© Dharmartha Trust J&K. Digitized by eGangotri

ऊं पा॰
७५
८१

वति स चोत्तमस्तु उत्तमः अपिद्भवति अकारस्य गुणो दीर्घः भवानि भवाव भवाम ॥
आमेतः ॥ लोट्संबंधिन एकारस्य आमादेशो भवति हेरात्मनेपदानादेशः पचतां
पचेताम् पचंताम् सवाभ्यां वामौ ॥ सकारवकाराभ्यामुत्तरस्य लोट्संबंधिन ए
कारस्य यथासंख्यं वा अं इत्येतावादेशौ भवतः पचस्व पचेथाम् पचध्वम् एत
ऐ ॥ लोडुत्तमसंबंधिन एकारस्य ऐकारादेशो भवति आमोऽपवादः वृद्धिः
पचै पचावहै पचामहै ॥ पचतु पचताद्वा पचताम् पचंतु पच पचताद्वा पच
तम् पचत पचानि पचाव पचाम पचताम् पचेताम् पचंताम् पचस्व पचेथाम्
पचध्वम् पचै पचावहै पचामहै विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्न
प्रार्थनेषु लिङ् सप्तमी विधिः प्रेषणम् निमंत्रणं नियोगकरणम् आमंत्रणं कार
णं अधीष्टः सत्कारपूर्वको व्यापारः संप्रश्नः संप्रधारणम् प्रार्थना याच्ञा ॥ विध्या
दिष्वर्थेषु धातोः लिङ् प्रत्ययो भवति ॥ यासुट् परस्मैपदेषूदात्तो ङिच्च परस्मैप
दविषयस्य लिङः यासुडागमो भवति स चोदात्तो ङिच्च भवति ॥ लिङः सलो
पोऽनन्त्यस्य ॥ सार्वधातुके यो लिङ् तस्यानन्त्यस्य सकारस्य लोपो भवति ॥ अतो या
यः ॥ अकारान्तादङ्गादुत्तरस्य या इत्येतस्य इय् इत्ययमादेशो भवति आद्गुणः

ऊं॰

© Dharmartha Trust J&K. Digitized by eGangotri

लोपो व्योर्वलीति यकारस्य लोपो भवति भवेत् भवेयाताम् झो ⁻न् लिङादेशस्य झो
रन्नादेशो भवति भवेयुः भवेः भवेतम् भवेत भवेयम् भवेव भवेम लिङः सीयुट्
लिङादेशस्य झस्य रनादेशो भवति पचेरन् पचेथाः पचेयाथाम् पचेध्वम् इटोऽत् ॥
लिङादेशस्य इटः अदादेशो भवति पचेय पचेवहि पचेमहि पचेत पचेताम् पचेयुः
पचेः पचेतम् पचेत पचेयम् पचेव पचेम पचेत पचेयाताम् पचेरन् पचेथाः
पचेयाथाम् पचेध्वम् पचेय पचेवहि पचेमहि इति ... टुनदि समृद्धौ आदिरित्
ञिटुड्वद् इतीत्संज्ञा टुगादिः ट्वितोऽथुजिति विशेषणार्थः इदित्तं नुमर्थः ॥ इदितो
धातोः नुमागमो भवति नन्दति नन्दतः नन्दन्तीत्यादि ध्वंसु गतौ नश्चापदान्तस्य झ
लीत्यनुस्वारः ध्वंसते ध्वंसाते ध्वंसन्ते इत्यादि व्यय संवरणे व्ययति व्ययतः व्ययन्
ति व्ययसि व्ययथः व्ययथ व्ययामि व्ययावः व्ययामः व्ययते व्ययेते व्ययन्ते इत्यादि
अनद्यतने लङ् अनन्दत् अनन्दताम् अनन्दन् इत्यादि अध्वंसत अध्वंसेताम्
अध्वंसन्त इत्यादि अव्ययत् अव्ययताम् अव्ययन् अव्ययत अव्ययेताम् अव्ययन्त
इत्यादि लोट् च ॥ नन्दतु नन्दतात् त्वा नन्दताम् नन्दन्तु नन्द नन्दतात् त्वा नन्दतम् न
न्दत इत्यादि ध्वंसतां ध्वंसन्ताम् इत्यादि व्ययतु व्ययतात् त्वा व्ययताम् व्ययन्तु इत्या

© Dharmartha Trust J&K. Digitized by eGangotri

हैं॰ पा॰
५०
९०

दि धंसेत धंसेयातां धंसेरन् इत्यादि व्ययेत व्ययेयातां व्ययेरन् इत्यादि सर्वे
संभवाज्ज्ञेयम् ॥ इति शाः विकरणाभ्वादयः समाप्ताः ॥ अथ अदादयः उच्यन्ते ॥
अद भक्षणे लुक् इति शपा लुक् तस्मात् अदादिभ्यः गणो लुक उत्तरस्य शपो लुक् भव-
ति खादि चेति चर्त्वे अत्ति अत्तः अदंति अत्सि अत्थः अत्थ अद्मि अद्वः अद्मः हन हिंसा
गत्योः हंति लोप क्ङित्यनजि सार्वधातुकमपित् अपि यत्सार्वधातुकं तत् ङिद्भवति
इति ङित्वात् अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति
अनुदात्तोपदेशानामनिटां यमं गमानां वनोति तनोत्यादीनां च अनुनासिकलोपो भ-
वति झलादौ क्ङिति प्रत्यये परतः हतः ॥ गमहनजनखनघसां इत्येतेषा-
मंगानामुपधाया लोपो भवति अजादौ प्रत्यये क्ङिति अनङि परतः ॥ हो हन्तेर्ञ्-
णिन्नेषु हन्तेः हकारस्य कवर्गादेशो भवति ञिति णिति प्रत्यये भवति ञिति णिति प्र-
त्यये परे नकारे च परतः घ्नन्ति हंसि हथः हथ हन्मि हन्वः हन्मः इत्यादि हन्तेरप्रवेश्य
ति प्रवक्तव्य ॥ वमोर्वा ॥ वकारमकारयोः परतः हन्तेरुपसर्गस्थान्निमित्तादुत्तरस्य
नकारस्य णकारादेशो वा भवति प्रहण्मि प्रहन्मि प्रहण्वः प्रहन्वः प्रहण्मः प्रहन्मः
आङो यमहनः ॥ यम उपरमे हन हिंसागत्योः आभ्यामाङ्पूर्वाभ्यामकर्मक्रियाव- उ॰

© Dharmartha Trust J&K. Digitized by eGangotri

वनाभ्यम् मात्मनेपदं भवति आहतं आ आघ्नाते ॥ आत्मनेपदेष्वननः ॥ आत्मनेप
देष्वयोजनकारस्तस्य नकारो नाहं गाङ्गम्यस्या दित्यसमादेशो भवति आघ्नते आहसे आ
घ्नाथे आहहे अघ्ने आहन्वहे आहन्महे अकर्मकादित्येव आहन्ति वृषलं पादेन स्वा
गकर्मकाश्चेति वक्तव्यं आहते शिरः स्वमंगमस्वांगम् तेनेह न भवति आहन्ति शि
रः परकीयम् ॥ द्विष अप्रीतौ ॥ ष्टुना ष्टुरिति ष्टुत्वम् गुणः द्वेष्टि सार्वधातुकमपि
दिति ङित्वान्न गुणः अतिषधातवः द्विष्टः द्विषन्ति ॥ षढोः कः से षकारढकारयोः कका
रादेशो भवति सकारे प्रत्यये परतः सलोप इति वर्तमाने आदेशप्रत्यययोरिति षत्वं
गुणः द्वेक्षि द्विष्ठः द्विष्ठ द्वेष्मि द्विष्वः द्विष्मः द्विष्टे द्विषाते द्विषते द्विक्षे द्विषाथे ड्ढे न
धश्च ढः झलां जशोऽन्त इति जश्त्वं षस्य डः द्विड्ढ्वे द्विषे द्विष्वहे द्विष्महे द्विष्महे ॥ दुह
प्रपूरणे गुणः घ्लकारो पित्त्ववचनेन लघूपधोत गुणः दादेर्धातोर्घः इति हस्य घः झषस्त
थोर्धोऽधः ॥ झषन्तस्य योस्तथोः स्थाने धकारादेशो भवति अधः इत्याति धातुवर्जे यि
त्वाजश्त्वं घस्य गः दग्धि दुग्धः दुहन्ति ॥ एकाचो बशो भष् झषन्तस्य स्ध्वोः धातोरवयव
यएकाच् झषन्तः तदवयवस्य बशः स्थाने भष् आदेशो भवति झलि सकारे ध्वशब्दे च
परतः पदान्तस्येति सम्बधः चर्त्वेन घस्य कः इको विनिमस्यषः धोक्षि दुग्धः दुग्धे

दु॰ पा॰ ९१ 91

दुह्वः दुह्मः दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे दुहे दुह्वहे दुह्महे दिह उपचये देग्धि
दिग्धः दिहन्ति धेक्षि दिग्धः दिग्ध देह्मि दिह्वः दिह्मः संदिग्धे संदिहाते इत्यादि नेर्गद
नदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोति
देग्धिषु च इत्येतस्मादुपसर्गस्थान्निमित्तात् परस्य नेर्नकारस्य णकारादेशो भ
वति गदादिषु परतः प्रणिदेग्धि लिह आस्वादने पुगन्तलघूपधस्येति गुणः हो ढः
इति ढत्वं झषस्तथोर्धोऽधः इति धत्वम् ष्टुत्वम् ढो ढे लोप इति पूर्वढलोपः लेढि ढ्लोपे
पूर्वस्य दीर्घोऽणः इति दीर्घः लीढः लिहन्ति लेक्षि षढोः कः सि लीढः लीढ लेह्मि
लिह्वः लिह्मः लीढे लिहाते लिहते लिक्षे लिहाथे लीढ्वे लिहे लिह्वहे लिह्महे च
क्षिङ् व्यक्तायां वाचि इकारः ईदित्त्वाभावार्थः ख्याञादेशार्थः स्कोः संयोगाद्योर
न्ते च धातोरन्ते परस्यान्ते च यः संयोगः झलि परतः तदाद्योः ककारसकारयोर्लो
पो भवति कलोपः ष्टुत्वम् आचष्टे आचक्षाते आचक्षते षढोः कः सि इति कत्वम्
इण्कोः इति षत्वम् आचक्षे आचक्षाथे कलोपः ष्टुत्वजश्त्वादि झलां जश् झशि आ
चड्ढ्वे आचक्षे आचक्ष्वहे आचक्ष्महे ॥ ईर गतौ कम्पने च अचो रहाभ्यां डो॰
द्वे इति द्विर्भावः समीर्त्ते समीराते समीरते समीर्षे इत्यादि ईड स्तुतौ ईडजनोर्ध्वे च

© Dharmartha Trust J&K. Digitized by eGangotri

भ्यां एवं परयोः सकारः ईड्हे ईड्ढ्वे ईड्ते ईड्महे इत्यभवर्तमाने ॥ ईडजनोर्ध्वे च ॥
ईड जन इत्येताभ्यामुत्तरस्य ध्वे इत्येतस्य चादिडागमो भवति ईडिषे ईडाथे ईडज
नोर्ध्वे चेति इडागमः ईडिध्वे ईडे ईड्वहे ईड्महे ईश ऐश्वर्ये ब्रश्चभ्रस्जेति षत्वम् ष्टु
त्वम् ईष्टे ईशाते ईशते ॥ ईशः से ॥ ईश उत्तरस्य से इत्येतस्य सार्वधातुकस्येडागमो
भवति ईशिषे ईशाथे षत्वं ष्टुत्वं जश्त्वादि ईड्ढ्वे ईशे ईश्वहे ईश्महे आस उपवेश
ने शपो लुक् आस्ते आसाते आसते आस्से आसाथे ॥ धि च ॥ धकारादौ प्रत्यये परतः सका
रस्य लोपो भवति आध्वे आसे आस्वहे आस्महे ॥ आङः शासु इच्छायां आशास्ते आशा
साते आशासते आशास्से आशासाथे आशाध्वे जगत्व नाथवासस्याः आशासे आ
शासे आशास्वहे आशास्महे ॥ वस आच्छादने वस्ते वसाते वसते वस्से वसाथे व
ध्वे वसे वस्वहे वस्महे कसि गतिशासनयोः इदितो नुम् धातोः इदितो धातोर्नुमाग
मो भवति नश्चापदान्तस्य झलि इत्यनुस्वारः कंस्ते कंसाते कंसते कंस्से कंसाथे अ
नुस्वारस्य ययि परसवर्णः कंध्वे कंसे कंस्वहे कंस्महे णिसि चुम्बने णन इति णस्य
नः नमणाम्ः कंस्महे निंस्ते निंसाते इत्यादि ॥ वा निंसि निंक्ष निंसि निंसि निंसि
निंसि इत्येतेषां नकारस्योपसर्गान्निमित्तादुत्तरस्य वा णकारादेशो भवति प्रणिंस्ते

© Dharmartha Trust J&K. Digitized by eGangotri

५

हु॰ प्रणिंस्तोणिनिमूच्छो चोक्ताविति नात्वं जस्यणः वत्वं स्व नुमागमः निंष्ठं निंजते निंक्ते
पा॰ निक्ष्वे णिजिरवयवे गोहेत्यनात्ववत्वात्तु स्वास्त्रवणोः णिङ्क्ते णिंजाते णिजते इ-
५२ त्यादि एचे संपर्चे संपृक्तः इट्कृणाप्रतिषेधः संपृक्ते संपृचाते संपृचते इत्यादि प्र
९२ इ प्राणिगर्भविमोचने गाप्तृ लवकृत्याद्यदेः षःसः प्रसूते प्रविस्तु धातृ ष्ठुवादित्युवङ् ।
प्रसुवाते प्रसुवते प्रसुषे इत्यादि शीङ् स्वप्ने गापृ लवकरितां नागमाभावः शीङः सार्व-
धातुके शीङे गस्य गुणो भवति सार्वधातुके परे शेते शयाते आत्मनेपदेष्वनतः श-
िङङ्ग आत्मनेपदेष्वयोऽकारस्तस्यानकारान्तादेशः झस्य रादेशस्य शीङः रुट्
तोऽरुडागमो भवति शेरते इकारादेशः अन्त्ययोरिति षत्वं शेषे शयाथे शेध्वे शये शेव-
हे शेमहे इत्यादि इत्यात्मनेभाषः ॥ षु प्रभिगामेषु मि श्रणिकर्णाह्लो गाक्तै नाहु त्वशहे
त्वाङ्ते जने ष्ठ प्रसवे उ प्रसवेश्वर्ययोः ऊर्णा ह्लोरभ्यस्ता यच्चि पिति सार्वधातुके इत्यः
पिकृत्य ॥ ततो वृद्धिरल्विकिहलि उकारान्तस्याङ्गस्य वृद्धिर्भवति लुक्तिमति पिति सा
र्वधातुके हलादौ यौति युतः युवन्ति यौषि युथः युथ यौमि युवः युमः एवं यौति
रौति नौति स्नौति क्ष्णौति क्ष्णौति स्नौति क्षौति मौति निपरस्मैपदिनः ऊर्णञ् त्वादनेषु ऊर्णु ऊ॰
नोः ग्रजञ्ञ्नाग्राचि ॥ ऊर्णोतेर्विभाषः ॥ ऊर्णोतेर्विभाषा वृद्धिर्भवति हलादौ पि-

© Dharmartha Trust J&K. Digitized by eGangotri

तिसार्वधातुके प्रोर्णोति प्रोर्णुतः प्रोर्णुवन्ति प्रोर्णौषि प्रोर्णोषि प्रोर्णुथः प्रोर्णुथ
प्रोर्णौमि प्रोर्णोमि प्रोर्णुवः प्रोर्णुमः प्रोर्णुते प्रोर्णुवाते प्रोर्णुवते इत्यादि स्तौति
स्तुतः स्तुवन्ति स्तुवे स्तुवाते स्तुवते अभिष्टवः उपसर्गात्सुनोति सुवति स्यति स्
तौति स्तोभति स्था सेनय सेध सिच संज स्वजाम् उपसर्गस्थान्निमित्तादुत्तरस्य सुनो
त्यादीनां सकारस्य मूर्धन्यादेशो भवति ष्टुत्वम् अभिष्टौति परिष्टौति ॥ ब्रुव ईट् ॥
ब्रुव उत्तरस्य हलादेः पित्सार्वधातुकस्यादिरीडागमो भवति गुणः ब्रवीति ॥ क्ङि
ति च ॥ ङ्ङिनिमित्ते गुणवृद्धी आभ्यां न भवतः सर्वत्र ब्रुतः उवङादेशः ब्रु
वन्ति ब्रवीषि ब्रूथः ब्रूथ ब्रवीमि ब्रूवः ब्रूमः ब्रूते ब्रुवाते ब्रुवते ब्रूषे ब्रुवाथे ब्रू
ध्वे ब्रुवे ब्रूवहे ब्रूमहे ॥ इणो गतौ परिदैन्ते ॥ इको यणचि ॥ इति धातोरसे होणो
यण् इको यणादेशो भवति अजादेशपरतः यन्ति एषि इथः इथ एमि इवः इमः इङ्
अध्ययने नित्यमधिपूर्वः ङित्वाद्गुणाभावः अकः सवर्णे दीर्घः अधीते इयङादे
शः अधीयाते अधीयते अधीषे अधीयाथे अधीध्वे अधीये अधीवहे अधीमहे ॥ इ
कः स्मरणे अधिपूर्वः गुणः यणादेशः अध्येति अधीतः ॥ इणवदिकः ॥ इणव
द्भावाद्यणादेशः अधियन्ति अध्येषि अधीथः अधीथ अध्येमि अधीवः अधीमः

© Dharmartha Trust J&K. Digitized by eGangotri

टु॰ पा॰ ५२
93

वीगतिप्रजनकांत्यसनखादनेषु वेति वीतः विवंति या प्रापणे याति यातः यांति
इत्यादि वा गतिगंधनयोः वाति वातः वांतीत्यादि भा दीप्तौ भाति भातः भांति ष्णा शौ-
चे स्नाति श्रा पाके श्राति द्रा कुत्सितायां गतौ द्राध प्सा भक्षणे नेर्गदनदेत्यादिना
मूर्धन्यः प्रणिद्राति प्रणिप्साति ख्या प्रकथने ख्याति प्रा पूरणे प्राति रा दाने राति ला आ-
दाने लाति दाप् लवने ख्या प्रथने प्रा पूरणे मा माने दाति ख्याति प्राति माति मांताः
मांति विद् ज्ञाने परस्मैपदी ॥ ण ल । त स्र स्य ल थ स म लुक्सां इत्यनुवर्त-
माने ॥ विदो लटो वा ॥ विद ज्ञाने इत्यस्मात्परस्य लट आदेशानां परस्मैपदसंज्ञ-
कानां णलादय आदेशा वा भवंति वेत्ति वित्तः विदंति वेत्सि वित्थः वित्थ वेद्मि विद्वः
विद्व वेद वेदथुः विदवेद विद्व विम वेमि विद्वः विद्मः ॥ संक्षेपणः ॥ समो गम्यृच्छि-
प्रच्छिस्वरत्यर्तिश्रुविदृशिभ्यः गमि ऋच्छि प्रच्छि स्वरति अर्ति श्रु विदि दृशि
इत्येभ्यः अकर्मकेभ्यः आत्मनेपदं भवति संवित्ते संविदाते संविद्रते इत्यादि ब्रूञ्
पि ब्रुवः पंचानामादितः आहो ब्रुवः ब्रुवः परस्य लटः परस्मैपद संज्ञकानां परस्मैपद
संज्ञकानां पंचैव णलादयः णल् अतुस् उस् थल् अथुस् इत्येते आदेशा भवंति ङो।
तस्मिंस्तु योगेन च ब्रुवः आह इत्यादेशो भवति आह आहतुः तस्य परतो दितिह-

© Dharmartha Trust J&K. Digitized by eGangotri

योः पररूपत्वम् आङ् झलो झलीत्यपि ज्ञातव्य ॥ आहस्थः ॥ आहो हकारस्य थकार
गादेशो भवति झलि परतः खरि चेति वर्त्तनम् आत्थ आहथुरित्यादि अरूभत्ल्णोऽहलः
हृतेन यत् नैकाले लङ् लस्यति धोस्य आदेशाः अड्गार्ग्यगालवयोरित्यपि ज्ञाता
अदः सर्वेषां अदेर्गाङ्न्तरस्य हलस्य सार्वधातुकस्य अडागमो भवति सर्वेषामा
चार्याणां मतेन आदत् आत्ताम् आदन् आदः आत्ताम् आत्त आदम् आद्व आ
द्म शीङ् स्वप्ने अशेत अशयातां अशेरत अशेथाः अशयाथां अशेध्वम् अशयि
अशेवहि अशेमहि ब्रूञ् व्यक्तायां वाचि अब्रवीत् अब्रूताम् अब्रुवन् अब्रवीः
अब्रूतम् अब्रूत अब्रवम् अब्रूव अब्रूम इति अथ पंचमी लोड्विभक्तिः ॥ अत्तु
अत्ताद् अत्ताम् अदन्तु ॥ हुझल्भ्यो हेर्धिः ॥ हुतेतस्मात् झलन्तेभ्यश्चोत्तरस्य
हेर्धि आदेशो भवति अद्धि अत्तात् अत्तम् अत्त अदानि अदाव अदाम शेताम्
शयातां शेरताम् शेष्व शयाथाम् शेध्वम् शयै शयावहै शयामहै इत पेऽस्यैका
रस्य पित्वम् ब्रवीतु ब्रूताद् ब्रूताम् ब्रुवन्तु ब्रूहि ब्रूतात् ब्रूतम् ब्रूत ॥ रषाभ्यां
नो णः समानपदे अट्कुप्वाङ्नुम्व्यवायेऽपि ब्रवाणि ब्रवाव ब्रवाम ब्रूताम् ब्रुवाताम् ब्रुवता
म् ब्रूष्व ब्रुवाथाम् ब्रूध्वम् ब्रवै ब्रवावहै ब्रवामहै इति अथ सप्तमी लिङ्

© Dharmartha Trust J&K. Digitized by eGangotri

तृ॰
पा॰
५४
74

द्विर्भक्तिः इतिलिङन्तस्यातिवादयः अयात अयाताम् ॥ तस्यपादाज्जात अवर्णोप
दान्तात तस्यपरतः पूर्वपरयोः परह्रूपमेकादेशोभवति अयुः अयाः तम् अयातअ
यं अयाव अयाम शयीत शयीयाताम् शयीरन् शयीथाः शयीयाथाम् शयीध्वम् श
यीय शयीवहि शयीमहि ब्रूयात ब्रूयातां ब्रूयुः ब्रूयाः ब्रूयातं ब्रूयात ब्रूयां ब्रूयाव ब्रू
याम ब्रुवीत ब्रुवीयाताम् ब्रुवीरन् ब्रुवीथाः ब्रुवीयाथाम् ब्रुवीध्वम् ब्रुवीय ब्रुवी
ब्रुवीमहि ॥ इति ॥ अस्तेर्वि ॥ अस्ति श्नासोरल्लोपः ॥ श्नप्रत्ययस्यास्तेश्च ङिति
सार्वधातुके परे अकारलोपोभवति स्तः सन्ति ॥ तासस्त्योर्ल्लोपः ॥ तासेरस्तेश्च स
कारस्य सकारादौपरे लोपोभवति असि स्थः स्थ अस्मि स्वः स्मः व्यतिपूर्वः कर्तरि क
र्मव्यतिहारे कर्मशब्दः क्रियावाची व्यतिहारो विनिमयः तस्मिन्कर्मव्यतिहारे कर्म
शब्दः क्रियावाची व्यतिहारो विनिमयः तस्मिन्कर्मव्यतिहारेऽर्थे वर्तमानाद्धातोः आ
त्मनेपदं भवति स्ते व्यतिसाते व्यतिसते ॥ सात्वसायोः ॥ सादित्येतस्य परादेश्च सर्व
रस्य सवर्णादेशो भवति पति ह्यः पतितामे प्रत्ये ह्यकारादेशो भवति परतः व्यतिहे
व्यतिस्वहे व्यतिः स्महे मृजष्मृजष्टौ मृजेर्वृद्धिः मृजेरगस्य वृद्धिर्भवति सार्वधातुके ॐ
तिपि परतः इति वृद्धिः रपरत्वम् अश्च भ्रस्जेति षत्वम् ष्टुत्वम् मार्ष्टि मृष्टः ॥ मृजेर्वि

© Dharmartha Trust J&K. Digitized by eGangotri

भाषा मृजेरजादौ विभाषा वृद्धिप्रतिषेधविषयः संक्रमः संक्रमे वृद्धिरिष्यत
इति वृद्धिः ॥ मृजन्ति मार्जन्ति मार्ष्टि मृष्टः मृष्टमार्ष्टि मृज्वः मृज्मः ॥ वच
भाषणे ॥ वेःञितिनात्वम वक्ति वक्तः वचंति इत्यादि ॥ रुदिर् अश्रुविमोचने
ञिष्वप् शये श्वस प्राणने अन च जक्ष भक्षहसनयोः ॥ आर्धधातुकस्येड्व
लादेरित्यधिकारात् ॥ रुदादिभ्यः सार्वधातुके रुदादिभ्यः पंचभ्य उत्तरस्य वलादेः
सार्वधातुकस्यादिरिडागमो भवति लघूपधगुणः रोदिति रुदितः रुदंति रोदिषी
त्यादि स्वपिति स्वपितः स्वपन्ति श्वसिति श्वसितः श्वसन्ति प्राणिति प्राणितः प्राण
न्ति अनितेः अनितेर्नकारस्योपसर्गान्निमित्तादुत्तरस्य मूर्धन्यादेशो भवति जक्षि
ति जक्षितः जक्षादयः षट् जक्ष इत्यादयः षट् धातवोऽभ्यस्तसंज्ञा भवंतीति अ
भ्यस्तत्वात् अभ्यस्तादिति नस्य अदादेशः जक्षति जक्षिषि जक्षिथः जक्षिथ जक्षि
मि जक्षिवः जक्षिमः ॥ जागृ निद्राक्षये पंचभ्य इति वचनात् इडनामिनो
णः जागर्ति जागृतः एवं वदभ्यस्तादित्यदादेशः जाग्रति जागर्षि जागृथः जागृथ
जागर्मि जागृवः जागृमः ॥ दरिद्रा दुर्गतौ ॥ दरिद्राति ॥ इद्दरिद्रस्य दरिद्राइः
त्यश्च इकारादेशो भवति हलादौ सार्वधातुके क्ङिति दरिद्रितः श्नाभ्यस्तयोरातः

© Dharmartha Trust J&K. Digitized by eGangotri

१२

जु॰ पा॰ ५५ 95

आद्यन्तस्याभ्यस्तसंज्ञकानां च आकारलोपो भवति क्ङिति अजादौ परे दरिद्रति दरि
द्राति दरिद्रथः दरिद्रथ दरिद्रामि दरिद्रिवः दरिद्रिमः चकास्तो चकास्ति चका
सति चकास्ति चकास्मि शासु अनुशिष्टौ शास्मि शास इदङ्हलोः ॥ शासतेरुपधाया
इकारादेशो भवति अङि हलादौ क्ङिति परे शासिवसिघसीनां च शासु स्यादीना
मिवोरुत्तरस्य सकारस्य मूर्धन्यादेशो भवति शिष्टः शासति शास्मि शिष्टः शिष्ट
थः शिष्यः शिष्वः शिष्मः वश कान्तौ वश कान्तौ वष्टि ग्रहिज्या
वयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां क्ङिति च ॥ ग्रहादीनां धातूनां
ङिति प्रत्यये परतः किति च संप्रसारणं भवति संप्रसारणाच्च संप्रसारणात्परं वि
रतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति उष्टः उशन्ति वशिति उष्टः उष्ठः
षिमनप्वः उष्मः ह्नुङ् अपनयने निह्नुवे निह्नुते निह्नुवाते निह्नुवते ॥ निह्नु
षे इत्यादि ॥ इति लुग्विकरणा अदादयः समाप्ताः ॥ अथ जुहोत्यादय उच्य
ते ॥ जुहोत्यादयः ... तथैव लङादयः ॥ जुहोत्यादिभ्यः श्लुः ॥ जुहो
त्यादिभ्य उत्तरस्य शपः श्लुर्भवति एकाचो द्वे प्रथमस्य अजादेर्द्वितीयस्येति द्विर्वचनाभ्यासमेत्यपि डो॰
तो अनभ्यासमेत्यपि वक्तव्य ॥ श्लौ ॥ श्लौ परे तानभ्यासस्य धातोरवयवस्य प्रथम

© Dharmartha Trust J&K. Digitized by eGangotri

स्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः अभ्याससंज्ञो भवति ॥ जुहोः स्तुः ॥ अ
भ्यासस्य कवर्गहकारयोः चवर्गादेशो भवति इति हस्य जः ॥ अभ्यासे चर्च ॥ अ
भ्यासे वर्तमानानां झलां चरो भवति चकाराज्जशश्चेति जस्य जः पित्त्व गुणः जुहो
ति सार्वधातुकमपिदिति ङित्वात् क्ङिति चेति गुणः प्रतिषेधः जुहुतः अभ्यस्त ।
अस्मिन्प्रकरणे ये द्वे विहिते उभे अपि समुदिते ते अभ्यस्तसंज्ञे भवत इति अभ्यस्तत्वा
त् अदभ्यस्तात् ॥ अभ्यस्तसंज्ञकात् परस्य झकारस्य अदित्ययमादेशो भवति
इत्यदादेशः उवङादेशे प्राप्ते ॥ हुश्नुवोः सार्वधातुके ॥ जुहोतेः श्नुप्र
त्ययान्तस्य चानेकाचोऽसंयोगपूर्वस्य यणादेशः सार्वधातुके परे यणादेशो भवतीति य
णादेशः जुह्वति जुहोषि जुहुथः जुहुथ जुहोमि जुहुवः जुहुमः ञिभी
भये धातुः श्लुः श्लाविति द्विवचनम् ॥ भस्य बो भवत्यभ्यासस्य अभ्यासे चर्चेति
जश्त्वम् बिभेति इद्दरिद्रस्येत्यपि प्राप्ते भियोऽन्यतरस्याम् भी इत्येतस्यान्यतरस्या
मिकारादेशो भवति हलादौ क्ङिति सार्वधातुके परतः बिभितः बिभीतः एरनेका
चोऽसंयोगपूर्वस्येति यणादेशः बिभ्यति बिभेषि बिभिथः बिभीथः बिभिथ बि
भीथ बिभेमि बिभिवः बिभीवः बिभिमः बिभीमः ह्रीलज्जायाम् द्विवचनम् ।

© Dharmartha Trust J&K. Digitized by eGangotri

प्र

तुं॰ पा॰ ५६ 96

ध्रस्वभ्यस्तुत्वजस्यादि ॥ हलादिशेषः ॥ अभ्यासस्य हलादिः शिष्यते गणाः जिघ्र
ति जिघ्रतः अभ्यासे गोयणादेशाः संयोगपूर्वस्येति निषेधान्नास्ति यपूर्व इव भवति जिघ्रि
यति जिघ्रीषि जिघ्रीथः जिघ्रीथ जिघ्रीमि जिघ्रीवः जिघ्रीमः डुदाञ् दाने ददाति
श्नाभ्यस्तयोरातः इत्यालोपः चर्त्वं ददतः ददति ददासि दत्थः दत्थ आङो नास्य
विहरणे कर्त्रभिप्रायार्थे आत्मनेपदम् आङ्पूर्वो ददातेः अनाप्यधिकरणे वर्तमानात्
धातोरात्मनेपदं भवति विद्यामाददते आददाते आददते आददत्से इत्यादि आस्यवि
हरणे इति किम् अंसं व्याददाति आस्यसमानक्रियादपि प्रतिषेधो वक्तव्यः व्या
दिकां व्याददाति स्वांगकर्मकाच्चेति वक्तव्यम् इह मा भूत् व्याददते पिपीलिका पतंगमु
खम् इति डुधाञ् धारणपोषणयोः दधाति ॥ दधस्तथोश्च ॥ दध इति कृतद्विर्वचनो
दधातिर्निर्दिश्यते तस्य झषन्तस्य बशस्थाने भषादेशो भवति भकारदकारयोः स्ध्वो
श्च परयोः चर्त्वम् धत्तः दधति दधासि धत्थः धत्थ दधामि दधाति दधते धत्ते ध
त्से दधाथे धद्ध्वे दधे दध्वहे दध्महे णिजिर् शौचपोषणयोः विविजिर् पृथग्भावे विष्ल
व्याप्तौ अयं श्लुः द्विर्वचनम् निजां त्रयाणां गुणः श्लौ ॥ त्रयाणां निजां गुणो भ
वति अभ्यासस्य श्लौ परे इत्यभ्यासस्य श्लौ परे इत्यभ्यासस्य गुणः ततः पित्त्व गुणाः ने

ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

त्वं वत्वं नेनेक्ति नेनिक्तः नेनिजति नेनेक्षि नेनिक्थः नेनिक्थ नेनेज्मि नेनि
ज्वः नेनिज्मः वेवेक्ति वेविक्तः वेविजति वेवेष्टि वेविष्टः वेविषति इत्यत्र धार
णार्थे पणायोः माङ्माने ओहाङ्गतौ ॥ उक्तम् ॥ अकारान्तस्याभ्यासस्य अकारा
देशो भवति श्रुतिप्रत्वम् यपरत्वम् हलादिशेषत्वम् अभ्यासे चर्चेति चर्त्वम्
भृञामित् ॥ भृञादीनां त्रयाणामभ्यासस्य इकारादेशो भवति इति प्रत्वम्
बिभर्ति बिभृतः बिभ्रति बिभर्षि बिभृथः बिभृथ बिभर्मि बिभृवः बिभृमः श्ना
भ्यस्तयोरात इत्यपि हृस्व ॥ ई हल्यघोः ॥ श्नाइत्येतस्य अभ्यस्तानां च घुसंज्ञा
वर्जितानामाकारस्य ईकारादेशो भवति हलादौ क्ङिति सार्वधातुके परे मिमी
ते मिमाते मिमते जिहीते जिहाते जिहते ओहाक् त्यागे एवं वदीत्वम् जहाति ॥
जहातेश्च जहातेरिकारादेशो भवति अन्यतरस्याम् हलादौ क्ङिति सार्वधातु
के परे जहितः जहीतः जहति जहासि जहिथः जहीथः जहिथ जहीथ जहा
मि जहिव जहीवः जहिमः जहीमः ऋगतौ पृपूर्तौ श्लौ द्विर्वचनम् ॥ अर्
तिपिपर्त्योश्च अर्तिपिपर्ति इत्येतयोरभ्यासस्य इकारादेशो भवति श्लौ रपरत्व
हलादिशेषः अभ्यासस्यासवर्णे ॥ अभ्यासस्येवर्णोवर्णान्तस्य असवर्णेऽचि परतः

© Dharmartha Trust J&K. Digitized by eGangotri

दुः
पा॰
४०
९७

इयङ् उवङ् इत्येतावादेशौ भवतः इतीयङ् धातोरुणः स्परत्वम् इयंति क्ङिति चे
ति गुणप्रतिषेधः इयतुः इयति गे फेमित्यधिकाति गेरुवादेशः इकोयणचीति ग
णः इयर्षि इयथुः इयृय इयर्मि इयृवः इयृमः नृपालनपूरणयोः पिपर्ति नहो
स्यपृवेत्यु गेस्यः पृवीघस्माडुकारान्तगेस्यपृवेः नहं तस्य सतो रंगस्यउकारा
देशो भवति रपरत्वम् हलादिसार्वधातुके क्ङिति परतः वोरुपधाया इति दीर्घः ।
पिपूर्तः पिपूर्तति पिपर्षि पिपूर्थः पिपूर्थ ॥ पिपर्मि नस्यास्त्रि मित्राडन्नस्यणोपदे
शात्स्य धातोः नकारस्य णकारादेशो भवति मामामे प्रमामामे पिपर्ति णाह्नत्परिण
ह्निता ह्वा परिणह्यतां परिणाह्यंत आत्मनेपदे परिणह्यते परिणह्येतां परिणा
ह्यतामित्यादि उभयपदी लिह् दीह्यते दीह्येताम् देह्युः नह्यति नह्येताम् नह्युः
आत्मनेपदं प्रस्तूयते प्रस्तूयातां प्रस्तूयरन् इत्यादि उभयपदी रंजे रागे ङित्वात् ।
अनिदितां हल उपधायाः क्ङिति अनुनासिकलोपः रज्यति रज्यते शपश्याक्रोशे शप्यति
शप्यते पद्यगतौ पद्यते प्रपद्यते विपद्यते संपद्यते विदसत्तायां विद्यते बुधअवगमः
नेबुध्यते बुध्यमहाबोधयोधेन रुधकामप्रवनुरुध्यते मनज्ञाने मन्यते युजसमा	उ॰
धौ युज्यते सृजविसर्गे सृज्यते लि अल्पीभावे लिश्यते अनुधातः अनुधातेन ः ।

© Dharmartha Trust J&K. Digitized by eGangotri

राधोऽकर्मकाद्वृद्धावेव अकर्मकात् राधेः श्यन्प्रत्ययो भवति राधो हिंसायां
राध्यति अन्यत्र राध्नोति व्यध ताडने ॥ ग्रहिज्यावयिव्यधिवष्टि विचतिवृश्च
तिपृच्छतिभृज्जतीनां ङिति च ॥ ग्रहादीनां धातूनां ङिति प्रत्यये परतः साका
रवित्वे च संप्रसारणं भवति संप्रसारणाच्चेति परपूर्वत्वम् विध्यति पुष पु
ष्टौ पुष्यति शुष शोषे शुष्यति तुष प्रीतौ तुष्यति दुष वैकृते दुष्यति श्लिष आ
लिंगने श्लिष्यति शक विभाषितो मर्षणे शक्यते अन्यत्र शक्नोति ष्विद गा
त्रप्रस्रवणे स्विद्यति क्रुध कोपे क्रुध्यति क्षुध बुभुक्षायां क्षुध्यति शुध शौचे शु
ध्यति तृप प्रीतौ तृप्यति दृप हर्षमोहनयोः दृप्यति षिधु संराद्धौ सिध्यति राध
हिंसाराद्धयोः राध्यति णश अदर्शने नश्यति मुह वैचित्त्ये मुह्यति द्रुह जिघांसा
यां द्रुह्यति ष्णुह उद्गिरणे स्नुह्यति ष्णिह प्रीतौ स्निह्यति शमु तमु शा
मेत् सर्वकाले उपशमे शमामष्टानां दीर्घः श्यनि शमादीनामष्टानां दीर्घो
भवति श्यनि परे शाम्यति ताम्यति श्राम्यति भ्राम्यति क्षाम्यति माद्यति
असु क्षेपणे अस्यति उपसर्गादस्यत्यूह्योर्वा वचनमित्यात्मनेपदे विकल्पेन
पर्यस्यति पर्यस्यते यसु प्रयत्ने यसोऽनुपसर्गात् यसेरनुपसर्गाद्वा श्यन्प्रत्ययो भव

© Dharmartha Trust J&K. Digitized by eGangotri

२५५
२५

दुं॰ पा॰
५८
98

निपतेणश्च यसति यस्यति दसु चलने दसु उपक्षये च दस्यति वसु स्तंभने व-
स्यति पुस विभागे पुस्यति स्निह स्नेहे स्निह्यति विस प्रेरणे विस्यति जसु ह्रषणे
जस्यति बुस उत्सर्गे बुस्यति मसी परिणामे मस्यति लुट विलोडने लुट्यति स
संवेडने मस्यति न च मसन्नायते तम्यति भृसु भ्रंसु अधःपतने भृश्यति भ्रशि
दन्नामित्यनुनासिकलोपः भ्रश्यति वृश वरणे वृश्यति कृश तनूकरणे कृश्यति
ञितृषा पिपासायां तृष्यति हृष तुष्टौ हृष्यति रुष रोषे रुष्यति ष्टिप क्षेपणे ष्टि-
प्यति कुप क्रोधे गुप व्याकुलत्वे युप रुप लुप विमोहने लुभ गार्ध्ये क्षुभ संचल-
ने णभ तुभ हिंसायां क्लिदू आर्द्रीभावे कुप्यति गुप्यति युप्यति रुप्यति लुप्यति लु-
भ्यति क्षुभ्यति रुभ्यति नभ्यति तुभ्यति क्लिद्यति ञिमिदा स्नेहने ॥ मिदेर्गुणः
मिदेर्नेगस्य गुणो भवति श्यनि परे मेद्यति ञिक्ष्विदा स्नेहनमोचनयोः क्ष्विद्यति
ऋधु वृद्धौ गृधु अभिकांक्षायां ऋध्यति गृध्यति दिवादयश्चान्विकाणाः समाप्ताः ॥
अथ गणाश्चाथ स्वादयः ष्वीङ्पर्यन्ताः ओदितः स्वादयो वृत्यर्थन्ताः इति ताश्च
ज्ञाप्यर्शमो ग्रसु चलने ग्रसु अनवस्थाने द्वयो ग्रहणम् ज्ञपस्नानो ग्रस उपट ॐ॰
विलेपे ग्रसति हेजने ग्रक्ष्वेदने लघकं तो वा ग्राग ज्ञाशाति वाचन ग्राग

© Dharmartha Trust J&K. Digitized by eGangotri

तेञशाशते क्लाम्यते त्रास्यति क्राम्यति क्रामति क्रमः परस्मैपदे ष्ठिविति दीर्घत्वम् क्ला
म्यति क्लामति ष्ठिवुक्लम्वाचमां शितीति दीर्घत्वम् त्रस्यति त्रसति त्रुट्यति त्रुट
ष्ठिवनभावे तु लादिभ्यश्चः लष्यति लषति प्रथमस्वरस्य उच्यन्ते षुञ् अभिषवे
एवं वल्हडादयः शपिसमाप्ते ॥ स्वादिभ्यः श्नुः ॥ षुञ् अभिषवे इत्येवमादिभ्यो
धातुभ्यो श्नुप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परतः सार्वधातुकमपि
दिति ङिद्वद्भावाद्गुणाभावः पित्तु विकरणस्य सार्वधातुकार्धधातुकयो
र्गुणः सुनोति सुनुतः उश्नुवोः सार्वधातुके यणादेशः सुन्वन्ति सुनोषि सुनुथः
सुनुथ सुनोमि सुनुमः प्रत्ययः असंयोगपूर्वोत्वेति प्रत्ययस्य लोपः स्यान्मवयो
र्वोः ॥ योयमुकारः असंयोगपूर्वः तत्तस्य प्रत्ययस्यान्तस्य लोपो भवति
मकारवकारादौ प्रत्यये परे सुन्वः सुनुवः सुमः सुनुमः सुनुते सुन्वाते सुन्व
ते सिञ् बन्धे इत्यादि सिञ् बन्धने सिनोति सिनुतः सिन्वन्ति सिनुते सिन्वाते सि
न्वते चिञ् चयने चिनोति चिनुतः चिन्वन्ति चिनुते चिन्वाते चिन्वते इत्यादि उ
भयपदे लङ् असुनोत् असुनुताम् असुन्वन् असुनोः असुनुतम् असुनुत
असुनवम् असुनव असुन्व असुनुम असुनुम ॥ परस्मै ॥ आप्नुत आप्नुवाता

१९

तु॰ पा॰ ५५ ११

आप्नुवत आप्नुथाः आप्नुवाथाम् आप्नुध्वम् आप्नुवि आप्नुवहि आप्नुमहि
अचिनोत् अचिनुताम् अचिन्वन् अचिनोः अचिनुतम् अचिनुत अचिनवं
अचिन्व अचिनुव अचिन्म अचिनुम अचिनुत अचिन्वातां अचिनुथाः अचिन्वाथा
अचिनुध्वं अचिन्वि अचिन्वहि अचिनुवहि अचिन्महि अचिनुमहि अभिषवे ।
उपसर्गात् सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्जां
उपसर्गस्थान्निमित्तादुत्तरस्य सुनोत्यादीनां सकारस्य मूर्धन्यादेशो भवतीति ष
कारः अभिषुणोतु अभिषुणुतात् अभिषुणुताम् अभिषुण्वन्तु उतश्च प्रत्य
यादसंयोगपूर्वात् धोयमकारः असंयोगपूर्वः तेन तस्मात्प्रत्ययादुत्तरस्य हेर्लुग्भ
वति अभिषुणु अभिषुणुतात् अभिषुणुताम् अभिषुणुत अभिषुणवानि
अभिषुणवाव अभिषुणवाम परस्मै अश्नुताम् अश्नुवाताम् अश्नुष्व अश्नुवा
थाम् अश्नुध्वं अश्नवै अश्नवावहै अश्नवामहै आत्मनेपदम् एवं स्तोः श्चुना
श्चुरिति शत्वम् निः शब्दे निःश्चिनोतु निश्चिनुताम् निश्चिन्वन्तु निश्चिनु नि
श्चिनुतात् निश्चिनुतम् निश्चिनुत निश्चिनवानि निश्चिनवाव नि
श्चिनवाम परस्मै अथात्मनेपदं निश्चिनुताम् निश्चिन्वाताम् निश्चिन्वताम् निः

© Dharmartha Trust J&K: Digitized by eGangotri

निष्विनुयुः निष्विन्वाथाम् निष्विनुध्वम् निष्विनवै निष्विनवावहै निष्विनवा
महै उभयपदे लिङि स्तुनुयात् स्तुनुयाताम् स्तुनुयुः स्तुनुयादित्यादि परस्मै।
अस्तुवीत अस्तुवीयाताम् अस्तुवीरन् एवमस्तुवीया इत्यादि अस्तुवि आत्मने
निष्विनुयात् निष्विनुयाताम् निष्विनुयुः एवं निष्विन्वीत निष्विन्वीयाताम्।
निष्विन्वीरन्नित्यादि उभयपदी लिंग स्तृञ् आच्छादने स्तृणोति स्तृणुते स्तृणो
ति स्तृणुते धूञ् कम्पने धुनोति धुनुते धुनाति विभाषितः इत्युक्तपलापेइनोः
ति हिगतौ हिनुमीनेइति णत्वम् प्रहिणोति प्री प्रीतौ प्रीणोति स्पृ प्रीतिपाल
नयोः स्पृणोति आप्लृ व्याप्तौ आप्नोति अष्ठ्वं आप्नोति शक्लृ शक्तौ शक्नोति
असंयोग एवं स्योति निषेधादगुणाभावः नवक्तारेष्णः आप्नुवंति शक्नुवंति श
क्नुवंति श्रु श्रवणे श्रुवा श्रु चेति श्रुः शृभाव स्वर्त्स्तृणोति शृणोति शृणुतः शृण्वं
ति समो गं मृच्छि एष्टु ते स्यात्मनेपदं संशृणुते संशृण्वाते संशृण्वते राध साध
संसिद्धौ राध्नोति साध्नोति अशू व्याप्तौ अश्नुते अश्नुवाते अश्नुवते
ष्टिघ अवस्कन्दने ष्टिघ्नुते तिक तिग घिघ निक्नोति तिग्नोति सिघ ष आगलाप
ष्टम्नोति रक्ष स्तम्भे अनिहितानामित्यनुनासिकलोपः स्तभ्नोति स्पृधू ह्यो ऋध्नोति

© Dharmartha Trust J&K. Digitized by eGangotri

१९

वृ॰ पा॰ १०० 100

अविकरणाः स्वाद्यः समाप्तः ॥ अतश्चात्मने भ्वादिः अतोन्यतरस्याम् अ
तः अन्यतरस्यां अभ्भवति अतोमीति अवतितत्वइत्यत्वकरणं इति भ्वादि
तत्वकरणे ततो विकल्पेन अः ततोतितत्वतीति ॥ अथ तनादय उच्यन्ते ॥ १
तनादिभ्यः अः एवं तनुडादयः तनुविस्तारे इत्येवमादिभ्यो धातुभ्यः अप्रत्ययो
भवति शपोपवादः ङित्वाद्गुणाभावः तनोति तनुतः तन्वन्तीति एवं तनुसोन्यादि ।
तनुश्रीणां तनोति तनुते दिश अतिसर्जने उपदिशति उपदिशते अन्नपावेश्य
हिंस्यति संप्रसारणं गलाजयफशीतिसस्यधः स्नुत्वंदस्यजः त्वजति त्वज्जते लि
पश्रेणो लिपति लिपते स्वरितेतः विभाषिताः जषीप्रीति सेवनयोः जषति उ
विजी व्यपस्लनयोः विजते गेलस्त्री ब्रीडेलज्जते अनुनासिकः उब्रस्तुब्रेदने
व्यपसंभवे अहिंस्यति संप्रसारणम् वृश्चति विचति नव्विति स्वेदविते तनुधाः
नोरिति नुमागमः नश्यति मिथ्यतइजो शोमिश्यति त्ववस्त्वरणोत्वचति अव
स्वनेन स्तनत्सर्गे त्वभवि मोहने वृहव जनहिंसानादेषु रिचति स्कति त्व
भवति ऋहति त्वपनत्वपत्मैनात्वपति अनिचितामित्यउनासिकलोपः गात्व
न्यादीनां वज्रध्यमिति नुम नृत्यति हच्छ हन्हत जाशो उछ उन्पायज्ञाम उपे

ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

न्थे पूरणे उभ उम्भ शोभार्थे ऋफति ऋम्फति गुफति गुम्फति उभति उम्भति शु
भति शुम्भति दृभी ग्रन्थे दृभति विध विधाने विधति मृड सुखने मृडति पृ
ण प्रीणने पृणति मृण हिंसायाम् मृणति तुण कौटिल्ये तुणति पुण कर्मणि
शुभे च पुणति मुण प्रतिज्ञाने मुणति कुण शब्दोपकरणयोः कुणति शुण ग
तौ शुणति द्रुण हिंसागतिकौटिल्येषु द्रुणति घुण घूर्ण भ्रमणे घुणति घूर्णति
षुर ऐश्वर्यदीप्त्योः सुरति कुर शब्दे कुरति खुर छेदने खुरति क्षुर विलेखने क्षुरति घु
र भीमार्थशब्दयोः घुरति पुर अग्रगमने पुरति इषु इच्छा
यां इच्छति मिष स्पर्धायाम् मिषति चिल वि
लसने चिलति बिल संवरणे बिलति किल श्वैत्यक्रीडनयोः किलति मिल
ल श्लेषणे मिलति तिल स्नेहने तिलति लिख अक्षरविन्यासे लिखति
कुट कौटिल्ये कुटति पुट संश्लेषणे पुटति कुच संकोचने कुचति छुर छेद
ने छुरति स्फुट विकसने स्फुटति त्रुट छेदने त्रुटति तुट कलहकर्मणि तुट
ति जुड संवरणे जुडति जुड बन्धने जुडति लुट संश्लेषणे लुटति कृड घ
नत्वे कृडति कुड बाल्ये कुडति घुट प्रतिघाते घुटति तुड तोडने तुडति थु

© Dharmartha Trust J&K. Digitized by eGangotri

तु॰ पा॰ १०२ 101

इष्टुड संवरणे ष्टुडति ष्टुडति स्फुर स्फुरणे स्फुरति स्फल स्फुल चलने स्फुलति
स्फुलति परस्मैपदिनः गुरी उद्यमे अवगुरते अनुदात्तेत् न वङ्‌ न हनो भवति
पूर्वविधननेभवति उपङ्गोमोत्सर्गे उपति क्षुमाति स्थैर्ययोः भवति उङ् शब्दे कु
वेते रुङ् प्राणत्यागे रुङ् व्यायामे ॥ म्रियतेर्लुङ्लिङोश्च ॥ म्रियतेर्धातोर्लः
इलिङ्विषयात् शितश्चावि नस्यात्मनेपदं भवति अन्यत्र न भवति ऋयङ्रीङ् ऋ
तन्त्यस्य विद्यात् रिङ्शयग्लिङ्क्षु ऋकारान्तस्यागमस्य रिङ् इत्ययमादेशो भव
ति म्रियमित्यनयोः लिङि यकारादौ सर्वधातुके परे म्रियते ध्रियते ऋष गतौ
ऋषति पृङ् व्यापारे म्रियते क्षि निवासगत्योः क्षियति क्षप्रेरणे भवति उपसर्गा
त्सुनोति सुवति स्यति स्याति स्तौति स्तोभति स्थासेनय सेध सेध च सञ्ज स्वञ्जाम्।
उपसर्गस्थान्निमित्तादुत्तरस्य सुनोत्यादीनां सकारस्य मूर्धन्यादेशो भवति अ
भिषुवति परिषुवति तु वि क्षेपे तृणीगणे ॥ जातङ्ज्ञानोः ॥ ऋकारान्तस्या
गमस्य धातोः इकारादेशो भवति स्पर्द्धनं किरति गिरति ॥ ग्रवाऽग्नः ॥ ग्रवप
वां ङ्गिरते रात्मनेपदं भवति ग्रवगिरते कृपेरोलः ॥ ग्रोयङ्‌ इति च वर्त्तमाने ॐ
ग्रचिविभाषा ॥ गजदोप्रत्ययेपरः गिरतेर्विभाषा लकारादेशो भवति गिर

© Dharmartha Trust J&K. Digitized by eGangotri

ति गिलति ॥ समः प्रतिज्ञाने ॥ संपूर्वाद्गिरतेः प्रतिज्ञानेऽर्थे वर्तमानादात्मनेपदं
भवति प्रतिज्ञानमभ्युपगमः प्रतिश्रवः अङ्गीकरणमिति यावत् शतं संगिरते नि
त्यं शब्दं संगिरते परस्मैपदिनः दृङ् आदरे आद्रियते धृङ् अवस्थाने आध्रियते।
प्रच्छ ज्ञीप्सायां पृच्छति आङि नुप्रच्छ्योरिति वचनादात्मनेपदं आपृच्छते सृ
जा विसर्गे सृजति टुमस्जो शुद्धौ झलां जश् झशीति जश्त्वं सस्य दः श्चुत्वेन दस्य जः
मज्जति रुजो भंगे रुजति भुजो कौटिल्ये भुजति छुप स्पर्शे छुपति स्पृश संस्पर्शे स्पृ
शति विश प्रवेशने विशति नेर्विशः इत्यात्मनेपदं भवति निविशते णुद प्रेर
णे ॥ मुचादीनां ॥ मुचाद्यन्त्ये परे मुचादीनामगानां नुमागमो भवति नस्या
पदान्तस्य झलीत्यनुस्वारः अनुस्वारस्य ययि परसवर्णः मुंचति मुंचतः मुंचंति प
चं मुंचावहे मुंचते इत्यादि उभयपदी लङ् अमुंचत् अमुंचताम् अमुंचन् इत्या
दि परस्मै मृङ् प्राणत्यागे म्रियते अम्रियत अम्रियेतां अम्रियंतामित्यादि अमुंचत अ
मुंचताम् अमुंचन् एवं मुंचावहि उभयपदे लोट् मुंचतु मुंचताद्वा मुंचताम् मुं
चंत्वित्यादि म्रियताम् म्रियेताम् म्रियंताम् इत्यादि मुंचत मुंचताद्वा मुंचता
मुंचावहै इत्यादि उभयपदे लिङ् मुंचेत् मुंचेतां मुंचेयाम् मुंचेयुः इत्यादि परस्मै म्रियेत।

© Dharmartha Trust J&K. Digitized by eGangotri

१५

रु॰ पा॰ २०२ 102

म्रियेताम् म्रियेरन् इत्यादि आत्मने मुंचेत मुंचेताम् मुंचेयुः एवं मुंचेत मुं-
चेमहि लुप्लृ छेदने लुंपति लुंपते विद्लृ लाभे विंदति विंदते लिप उपदेहे लिं-
पति लिंपते षिच क्षरणे सिंचति सिंचते कृती छेदने कृन्तति खिद परिघाते
खिंदति पिश अवयवे पिंशति अंतर्गणः तुदादयो यावत् तुद इ गाहे इति तु-
दादयो हृत्पर्यंताः ॥ इति शविकरणास्तुदादयः समाप्ताः ॥ अथ रुधादयः
उच्यंते ॥ रुधिर् आवरणे पूर्ववत् लडादयः पूर्ववत् कर्तरि श्नम् ॥ रु-
धिर् आवरणे इत्येवमादिभ्यो धातुभ्यः श्नम्प्रत्ययो भवति कर्त्तर्यर्थे ॥ झ-
षउत्तरयोस्तकारथयोर्धकारादेशो भवति दधातिं वर्जयित्वा ॥ इति धत्वम् ॥
झलां जश् झशि इति जश्त्वम् अट्कुप्वाङिति णत्वम् रुणद्धि ॥ श्नसोरल्लोपः ॥
श्नस्य अस्तेश्च अकारस्य लोपो भवति सार्वधातुके क्ङिति च परतः इत्यकारलोपः
अनुस्वारस्य ययि परसवर्णः ॥ झरो झरि सवर्णे ॥ हल उत्तरस्य झरः सवर्णे झरि परतः
लोपो भवति अन्यतरस्याम् एवं त्रासिद्धमिति णत्वाभावः रुंधः रुंधंति रुणत्सि वा
धत्ति झलां जश् झशि इति जश्त्वम् तस्य चर्त्वम् रुणत्सि रुंधः रुंध रु-
णध्मि रुंध्वः रुंध्मः रुंधे रुंधाते रुंधते रुंत्से रुंधाथे रुंद्ध्वे रुंधे रुंध्वहे रुंध्महे

रुं॰

© Dharmartha Trust J&K. Digitized by eGangotri

भिदिर् विदारणे भिनत्ति भिन्तः भिंदंति भिनत्सि भित्थः भित्थ भिनद्मि भि
न्द्वः भिन्द्मः भिंते भिंदाते भिंदते भिंत्से भिंदाथे भिंध्वे भिंदे भिंद्व
हे भिंद्महे छिदिर् द्वैधीकरणे छिनत्ति छिंतः छिंदंति छिंते छिंदाते छिंदते रिचि
विरेचने चोः कुरिति कुत्वं रिणक्ति रिंक्तः रिंचंति रिंक्ते रिंचाते रिंचते विरिंक्ते विरिं
चते विरिंचते विजिर् पृथग्भावे विनक्ति विंक्तः विंजंति विंक्ते विंजाते विंजते
क्षुदिर् संपेषणे क्षुणत्ति क्षुंतः क्षुंदंति क्षुंते क्षुंदाते क्षुंदते युजिर् योगे युन
क्ति युंक्तः युंजंति युंक्ते युंजाते युंजते स्वराद्युपसर्गादिति वक्तव्यमात्मनेपदं प्रयुंक्ते उप
युंक्ते उछृदिर् दीप्तिदेवनयोः छृणत्ति छृंतः छृंदंति छृणत्सि छृंते छृंदाते छृंद
ते उतृदिर् हिंसानादरयोः तृणत्ति तृंतः तृंदंति तृंते तृंदाते तृंदते उभयतो
भाषाः कृती वेष्टने कृणत्ति कृंतः कृंतंति ञिइंधी दीप्तौ इंधे इंधाते इंधते विद
विचारणे विंते विंदाते विंदते विंत्से विंते विंदाते विंदते शिष्लृ विशेषणे
विशिष्टः विशिनष्टि विशिष्टः विशिंषंति षढोः कः सि इति कः विशिनक्षि विशि
ष्ठः विशिष्ठ विशिनष्मि विशिंष्वः विशिंष्मः पिष्लृ संचूर्णने पिनष्टि पिंष्टः पिं
षंति पिनष्टि भंजो आमर्दने चोः कुरिति कुत्वम् वर्गे श्नान्नलोपः भनक्ति

© Dharmartha Trust J&K. Digitized by eGangotri

रु॰ पा॰ १२ 103

श्नमकारो दृश्यते ततश्नरस्य नकारस्य लोपो भवति भनक्ति भंक्तः भंजति भनक्षि
भंक्थः भंक्थ भुज पालनाभ्यवहारयोः ॥ भुजोऽनवने अनवनेऽर्थे वर्त्तमानादात्मने
पदं भवति इत्यात्मनेपदं भवति इत्यात्मनेपदं चोक्तौरिति ज्ञातव्यम् एवमिति वर्त्तव्यम्
भुंक्ते भुंजाते भुंजते भुंक्षे भुंजाथे भुंग्ध्वे भुंजे भुंज्वहे भुंज्महे निष्टवेः उभयपदी लङ्
न्यकृणत् न्यकृन्ताम् न्यकृंथाम् न्यकृन्तन् जम्बेदाते ॥ हस्वाद्धातोः धकारस्येति
विपरतः वाकन्भवति न्यकृणाः न्यकृणात् न्यकृंथाम् न्यकृंध न्यकृणाम्मि न्यकृन्वं न्यकृन्मः
कंभ्मपरस्मै अभुंक्त अभुंजताम् अभुंजत अभुंक्थाः अभुंजाथाम् अभुंग्ध्वम् अभुंजि
अभुंज्वहि अभुंज्महि अभुनक् अभुंक्ताम् अभुंजन् अभुनक् अभुंक्तम् अभुंक्त
अभुनजम् अभुंज्व अभुंज्म न्यभुंक्त न्यभुंजताम् न्यभुंजत न्यभुंक्थाः न्यभुंजाथा
म् भुंग्ध्वम् न्यभुंजि न्यभुंज्वहि न्यभुंज्महि ॥ उभयपदे लोऽइच कृणाद्धकंधाद्धाकंधा
कंधत इकल्पोहेविः ॥ कंधिकंधाद्धाकंधकंधकंधानिकणाधावकणाधापरस्मै भुंक्तां
भुंजाताम् भुंजताम् भुंक्ष्व भुंजाथां भुंग्ध्वम् भुनजै भुनजावहै भुनजामहै भुनक्तु भु
नक्तात् भुंक्ताम् भुंजन्तु भुंग्धि भुंक्तात् भुंक्तम् भुंक्त भुनजानि भुनजाव भुन डी.
जाम विभुंक्ताम् विभुंजताम् विभुंजताम् विभुंक्ष्व विभुंजाथाम् विभुंग्ध्वम् विभुन

© Dharmartha Trust J&K. Digitized by eGangotri

जे विधुनजावहै विधुनजामहै उभयपदे लिंगं रुंध्यात् रुंध्यातां रुंध्युः इत्यादि परस्मै
आत्मने भुंजीत भुंजीयाताम् भुंजीरन् इत्यादि ॥ भुंज्यात् भुंज्यातां भुंज्युः इत्यादि
अभियुंजीत अभियुंजीयाताम् अभियुंजीरन् इत्यादि एवमभियुंजीमहीति ल्वङ्
तृहि हिंसि हिंसायां तृणहइम् तृणह इत्यस्यागमः इत्ययमादेशो भवति ह-
लादौ पिति सार्वधातुके परतः हो ढः इति ढत्वम् ष्टुत्वम् ढो ढे लोपः आद्गुणः तृणे-
ढि तृंढः तृंहंति तृणेक्षि तृंढः तृंढ तृणेह्मि तृंह्वः तृंह्मः हिसि हिंसायाम्
इदितो नुं धातोरिति नुम् श्नान्नलोप इति नलोपः हिनस्ति हिंस्तः हिंसंति हिनस्सि
हिंस्थः हिंस्थ हिनस्मि हिंस्वः हिंस्मः अंजू व्यक्तिम्रक्षणगतिषु अनक्ति अंक्तः अं-
जंति अनक्षि तञ्चू संकोचने तनक्ति तंक्तः तंचंति वृजी वर्जने वृणक्ति वृंक्तः वृंजं-
ति वृणक्षि पृची संपर्के पृणक्ति पृंक्तः पृंचंति पृणक्षि ॥ श्नंविकरणाः रुधादयः
समाप्ताः ॥ अथ तनादय उविकरणा उच्यंते ॥ तनु विस्तारे एवं वल्लडादयः श-
पि प्राप्ते ॥ तनादिकृञ्भ्य उः ॥ तनु विस्तारे इत्येवमादिभ्यो धातुभ्य उः प्रत्ययो
भवति कर्तृवाचिनि सार्वधातुके परतः पित्सु गुणः तनोति तनुतः तन्वंति शपोऽप-
वादः आर्धधातुके शेषः तिङ्शित्सर्वप्रत्ययः वर्जयित्वा अन्यः प्रत्ययः शिष्टः स-

© Dharmartha Trust J&K. Digitized by eGangotri

२१

तं: पा: २.५ 105

आर्धधातुकसंज्ञा भवति सार्वधातुकार्धधातुकयोर्गुणः तनोषि तनुथः तनुथ

तनोमि तनुवः तनुमः लोपश्चास्यान्यतरस्यां म्वोरिति पक्षे उकारलोपः तन्वः तन्मः

तनुते तन्वाते तनुषे तन्वाथे तनुध्वे तन्वे तन्वहे तन्महे षणु दाने सनोति सनु

तः सन्वन्ति क्षणु हिंसायां क्षणोति क्षणुतः क्षण्वन्ति ऋणु गतौ अर्णोति ऋणुतः

ऋण्वन्ति तृणु अदने तृणोति तृणुतः तृण्वन्ति घृणु दीप्तौ घृणोति घृणुतः घृ

ण्वन्ति वनु याचने वनुते वन्वाते वन्वते मनु अवबोधने मनुते मन्वाते मन्व

ते मनुषे मन्वाथे मनुध्वे मन्वे मन्वहे मनुवहे मन्महे मनुमहे अथ तनादेः डुकृञ्

करणे धातोर्गुणः तपरत्वं इति परत्वम् ततो विकरणस्यापि तस्य गुणः ॥

अत उत्सार्वधातुके ॥ उकारप्रत्ययान्तस्य करोतेरकारस्य उकारादेशो भवति

सार्वधातुके क्ङिति परे करोति कुरुतः यणादेशः अचो रहाभ्यां द्वे न भकुर्छुरा

म् रेफवकारान्तस्य भस्य कुर् छुर् इत्येतयोश्च दीर्घो न भवति कुर्वन्ति करोषि कुरु

थः कुरुथ करोमि ॥ नित्यं करोतेः ॥ करोतेर्नित्यमुकारस्य वकारमकारयोः

प्रत्यये ॥ परतः लोपो भवति कुर्वः कुर्मः कुरुते कुर्वाते कुर्वते कुरुषे कुर्वा

थे कुरुध्वे कुर्वे कुर्वहे कुर्महे ॥ अनुपराभ्यां कृञः कर्त्रभिप्रायगन्धनादिषु

© Dharmartha Trust J&K. Digitized by eGangotri

चकारोतेरात्मनेपदं विहितं तदपवादः अनुपराभ्यां कृञ इत्येवं कर्त्रभिप्राये करोतेः परस्मैपदं भ
वति अनुकरोति पराकरोति विधिविधेरणनार्थः क्षणु हिंसाकरणयोश्च इदितो नुं
धातोरित्यागमे कृते धिन्विकृण्व्योरच धिन्विकृण्व्योः धात्वोः उप्रत्ययो भवति अ
कारश्चान्तादेशः अतो लोपः इत्यकारलोपः तस्य स्थानिवत्त्वाल्लघूपधगुणाभावः
पित्त्वाद्विकरणस्य गुणः धिनोति कृणोति उभयपदे लङ् समतनोत् समतनुतां
समतन्वन् समतनोः समतनुतम् समतनुत समतनवम् समतन्व समतनु
व समतनम समतनुत परस्मै अमनुत अमन्वाताम् अमन्वत अमनुथाः अमन्वा
थाम् अमनुध्वं अमन्वि अमन्वहि अमनुवहि अमन्महि अमनुमहि आत्मने
संपूर्वः सुट् इमः एवं इत्यनुमाने संपर्युपेभ्यः करोतौ भूषणे संपरितप इत्येभ्यो भू
षणेऽर्थे करोतौ परतः सुट् कात्पूर्वो भवति अडभ्यासव्यवायेऽपि सुट् का
त्पूर्वो भवति समस्करोत् समस्कुरुतां समस्कुर्वन् समस्करोः समस्कुरुत
समस्कुरुत समस्करवम् समस्कुर्व समस्कुर्म समस्कुरुत समस्कुर्वाताम् समस्कु
र्वत समस्कुरुथाः समस्कुर्वाथाम् समस्कुरुध्वम् समस्कुर्वि समस्कुर्वहि समस्कु
र्महि उभयपदी लङ् च वितनोत् वितनुताम् वितनुताम् वितन्वत वितनुवि

© Dharmartha Trust J&K. Digitized by eGangotri

रु॰ पा॰ १०५ 105

तनुताद्वा वितनुतात् वितनुत वितनवानि वितनवाव वितनवाम परस्मै मनु॰
ताम् मन्वाताम् मन्वतम् मनुष्व मन्वाथाम् मनुध्वम् मनवै मनवावहै मनवाम
है आत्मने करोतेः कुरुताद्वा कुरुतात् कुर्वन्तु कुरुत उतश्च प्रत्ययादसंयोगपूर्वा
दिति हिलोपः कुरुताद्वा कुरुतात् कुरुत करवाणि करवाव करवाम कुरुताम्
कुर्वाताम् कुर्वताम् कुरुष्व कुर्वाथाम् कुरुध्वम् करवै करवावहै करवामहै उभयपदे लि॰
ङ्श्च तनुयात् तनुयाताम् तनुयुरित्यादि परस्मै मन्वीत मन्वीयाताम् मन्वी
रन् ॥ इत्यादि आत्मने ॥ ये च ॥ करोतेः ॥ यकारादौ प्रत्यये परतः नित्यमु
कारलोपो भवति कुर्यात् कुर्याताम् कुर्युः तथा कुर्वीत कुर्वीयाताम् कुर्वीरन्
एवं कुर्वीमहि ॥ तनादयः समाप्ताः ॥ अथ क्र्यादयः श्रा विकरणाश्चान्ते ॥
डुक्रीञ् द्रव्यविनिमये प्रयवल्डादयः गणपाठे ॥ क्र्यादिभ्यः श्ना ॥ डुक्रीञ्
इत्येवमादिभ्यः श्नाप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परतः शपोपवा॰
दः ङित्वाद्गुणाभावः क्रीणाति ई हल्यघोः ॥ श्ना इत्येतस्य अभ्यस्तानां च आका
रस्य ईकारादेशो भवति घुवर्जितानां हलि क्ङिति सार्वधातुके परतः श्नाभ्यस्तयोरातः इत्या ङ॰
कारलोपः क्रीणन्ति क्रीणासि क्रीणीथः क्रीणीथ क्रीणामि क्रीणीवः क्रीणीमः

© Dharmartha Trust J&K. Digitized by eGangotri

परिव्यवेभ्यः क्रियः ॥ परिविअव इत्येतेभ्यः परस्मात् क्रीणातेरात्मनेपदं भवति ।
परिक्रीणीते विक्रीणीते अवक्रीणीते परस्मैपदं भवति वृणीते वृणाते वृणते
वृणीषे वृणाथे वृणीध्वे वृणे वृणीवहे वृणीमहे आत्मने ग्रह उपादाने इग्यणः सं
प्रसारणं ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ग्रह उ
पादाने ज्या वयोहानौ वेञ् वयिः व्यध ताडने वश कान्तौ विच संभवे ओव्रश्चू छेदने
प्रच्छ ज्ञीप्सायाम् भ्रस्ज पाके इत्येतेषां धातूनां ङिति प्रत्यये परतः चकारात्किति
च संप्रसारणम् भवति संप्रसारणाच्च संप्रसारणात् परतः पूर्वपरयोः स्थाने
पूर्वरूपमेकादेशो भवति गृह्णाति गृह्णीतः गृह्णन्ति गृह्णासि गृह्णीथः गृह्णी
थ गृह्णामि गृह्णीवः गृह्णीमः गृह्णीते गृह्णाते गृह्णते गृह्णीषे गृह्णाथे गृह्णीध्वे गृ
ह्णे गृह्णीवहे गृह्णीमहे उभयपदं लङ् अक्रीणात् अक्रीणीताम् अक्री
णन् अक्रीणाः अक्रीणीतम् अक्रीणीत अक्रीणाम् अक्रीणीव अक्रीणीम
अवृणीत अवृणाताम् अवृणत अवृणीथाः अवृणाथाम् अवृणीध्वम् अवृणि
अवृणीवहि अवृणीमहि आत्मने अगृह्णात् अगृह्णीताम् अगृह्णन् अगृह्णाः अ
गृह्णीतम् अगृह्णीत अगृह्णाम् अगृह्णीव अगृह्णीम अगृह्णीत अगृह्णाताम् अगृ

© Dharmartha Trust J&K. Digitized by eGangotri

कृ॰
पा॰
१५
106

स्तृणत प्रस्तृणीयाः प्रस्तृणावाम् प्रस्तृणीध्वम् प्रस्तृणित प्रस्तृणीवहि प्रस्तृणीम-
हि उभयपदे लोट् क्रीणातु क्रीणीताद् क्रीणीताम् क्रीणंतु क्रीणीहि क्रीणी-
ताद् क्रीणीतम् क्रीणीत क्रीणानि क्रीणाव क्रीणाम परस्मै वृणीतां
वृणाताम् वृणाताम् वृणीष्व वृणाथाम् वृणीध्वम् वृणै वृणावहै वृणामहै स्तृ-
णस्तृणीताद्धाम् स्तृणीताम् स्तृणंतु ॥ हलः श्नः शानज्झौ ॥ हलउत्तरस्य श्नाप्र-
त्ययस्य शानजादेशो भवति हौ परतः अतो अतो लेर्लुक स्तृहाण स्तृणीताद्
स्तृणीत स्तृणीत स्तृणानि स्तृणाव स्तृणाम परस्मै उभयपदे लिङ् वृणीयात् वृणी-
वः इत्यादि आत्मने वृणीत वृणीयाताम् वृणीरन्नित्यादि आत्मने स्तृणीयात्
स्तृणीयाताम् स्तृणीय एवं स्तृणीमहि अन्यादि लिङ् प्रीञ् तर्पणे प्रीणाति प्रीणीतः
प्रीणंति मीञ् हिंसायां मीणाति हिनुमीनाः हिनुमीना इत्यनयोरुपसर्गस्थान्नि-
मित्तादुत्तरस्य नकारस्य णकारादेशो भवति प्रमीणाति पूञ् पवने प्वादीनां ह्रस्व :
इत्यनेन प्वादीनां ह्रस्वो भवति शिति परतः पुनाति पुनीते लूञ् छेदने लुनाति
लुनीतम् स्तृञ् आच्छादने स्तृणाति स्तृणीते कॄञ् हिंसायां कृणाति कृणीते वृञ् ॐ॰
वरणे वृणाति वृणीते धूञ् कंपने धुनाति धुनीतम् शॄ हिंसायां शृणाति शृणीते

© Dharmartha Trust J&K. Digitized by eGangotri

पॄ पालनपूरणयोः पृणाति मॄ हिंसायां मृणाति वृणीते वृङ् वरणे वृणाति ।
दृणाति दॄ भये दृणाति नॄ नये नृणाति ॠ गतौ ऋणाति गॄ शब्दे गृणाति ज्या व-
योहानौ ज्या ज्येति संप्रसारणं चेत्वम् हलि दीर्घः ग्रहो ज्यश्च जिनाति री गतिरे-
षणयोः रिणाति ली श्लेषणे लीनाति व्री वरणे व्रीणाति व्रीङ् वरणे व्रीणाति क्षिषु
हिंसायां क्षिणाति ज्ञा अवबोधने ज्ञा जनो जादेशः जानाति संप्रतिभ्यामनाध्या-
ने इत्यात्मनेपदं संजानीते प्रतिजानीते बन्ध बन्धने अनिदितां हल उपधाया नानु-
सिकलोपः बध्नाति मन्थ विलोडने अनुनासिकलोपः मथ्नाति ग्रन्थ ग्रन्थ संद-
र्भे ग्रथ्नाति कुन्थ संक्लेशे कुथ्नाति मृद क्षोदे मृद्नाति गुध रोषे गुध्नाति कुष निष्क-
र्षे कुष्णाति क्षुभ संचलने क्षुभ्नाति मुष स्तेये मुष्णाति मुष संघे मुष्णाति क्षुभ संचल-
ने क्षुभ्नाति णभ तुभ हिंसायां नभ्नाति क्लिश विबाधने क्लिश्नाति अश भोजने ।
अश्नाति विष विप्रयोगे विष्णाति ष्णुस स्नेहनसेचनयोः स्नुस्नाति स्नुस्नाति ग्रह उपादाने ग्र-
ह्णाति संप्रसारणात् गृह्णाति गृह्णीते पुष पुष्टौ पुष्णाति मुष स्तेये मुष्णाति वृत विभाषि-
ता ॥ श्नाविकरणाः क्र्यादयः समाप्ताः ॥ तनु विस्तारे तनोति तन्वादयस्तनादयः स्व-
स्व ॥ अथ चुरादयः सौत्राः स्वार्थे णिच् प्रत्ययो भवति तेभ्यो धातुभ्यः स्वार्थे प्रत्ययो भ

© Dharmartha Trust J&K. Digitized by eGangotri

चु॰ पा॰ २०७

107

वति आवस्तभ्नाति स्तभ्नोति स्तुभ्नाति स्तुभ्नोति स्कभ्नाति स्कभ्नोति स्कुनाति स्कुनोति ॥१
अथ चुरादय उच्यंते ॥ चुर स्तेयम् सत्यापपाशरूपवीणातूलश्लोक सेना लोम
त्वच वर्म वर्ण चूर्ण चुरादिभ्यो णिच् सत्यापादिभ्यः चूर्णपर्यंतेभ्यः चुरादिभ्
यश्च णिच् प्रत्ययो भवति चुरंतस्य लघूपधस्य च चुरंतस्यागस्य लघूपधस्य च सार्व
धातुकयोः इको गुणो भवति सनाद्यंता धातवः सनादिप्रत्ययांताः शब्दा धातुसंज्ञा
भवंतीति धातुसंज्ञायां ततो लडादयः कर्तरि लिङिति लट् तिप् शप् गुणः अया
देशः चोरयति चोरयतः चोरयंति इत्यादि परस्मै अन्यत्र णिच्श्च णिजंतादात्मने
पदं भवति कर्त्रभिप्राये क्रियाफले चोरयते चोरयेते चोरयंते इत्यादि आत्मने
--- पल रक्षणे पालयति पालयतः पालयंति इत्यादि अर्च पूजायाम् अर्चय
तीत्यादि उभयपदी लङ् तथा अचोरयत् अपालयत् अर्चयदित्यादि तथा चोर
यतु अर्चयतु अर्चयतु लेट् तथा चोरयेत् अर्चयेत् अर्चयेतामित्यादि लङादि
सर्वमन्नेयम् चिति स्मृत्याम् इदितो नुं धातोः चिंतयति यत्रि संकोचने यंत्र
यति लक्ष दर्शनांकनयोः लक्षयति लक्षेः स्वरितेः करणम् ज्ञापकम् अन्यत्र ॐ
चुरादिणिचः कर्त्रभिप्राये क्रियाफले णिच्श्चेत्यात्मनेपदं भवति लक्षयते ल

© Dharmartha Trust J&K. Digitized by eGangotri

ड्डपसेयाघे क्रियाफले णिचश्चेत्यात्मनेपदं भवति लक्षयते लड उपसेवा:
यां जिह्वोन्मथनयोर्लडिरिति पित्वम् अत उपधाया इति वृद्धिः सितां ह्रस्वः
लडइत्यस्य स्नेहने मेदयति जल अपवारणे जालयति नट अवस्पंदने नाट
यति श्रथ प्रतिहर्षे श्राथयति नान्ये मित इति नास्ति उणादिणि चि मित्त्वं बध
संयमने बाधयति पृ पूरणे अचो ञ्णितीति वृद्धिः पारयति ऊर्ज बलप्राणनयोः
ऊर्जयति पूर्ण प्रेरणे पूर्णयति पंथ अलेपणे पंथयति मुषं बंधने पषयति शाम्ब
संबंधने शाम्बयति सम्ब संबंधने सयति भल्लयति कुट्ट छेदने कुट्टयति कुट्ट
दनेन कुत्सनयोः कुट्टयति लुंठ स्तेये लुंठयति शठ श्वठ असंस्कारगत्योः शाठ
यति श्वाठयति संहस्तामप्रयोगे साठयति स्निह स्नेहने स्नेहयति स्फट संवरणे
स्फाटयति आछादने आणयति तड आघाते ताडयति खडि भेदे खाडयति खुड
खंडयति कडि रक्षायाम् कंडयति कडि खंडने कंडयति छर्द वमने छर्दयति
पुस्त बुस्त आदरानादरयोः पुस्तयति बुस्तयति चुद संचोदने चोदयति नल
शौचकर्मणि क्षालयति तल प्रतिष्ठाकरणे तालयति पल रक्षणे पालयति मार्
णातो बणनिधाने भ्रुत्ता ॥ कंपे चलिः प्रतिक्षी श्रीरीक्रयीन्मार्ग्यन्तामरुभ्रेणां

© Dharmartha Trust J&K. Digitized by eGangotri

२५

धु॰ पा॰
१०८
108

प्रतिक्रोशी री ल्हा यी त्मा यी इत्येतेषामंगानामाकारांतानां पुगागमो भवति
योपरतः स्थितं ज्ञस्वः मारणे ज्ञापयति मृगान्व्याधः विज्ञापयति गुरुं शिष्यः प्रज्ञा॰
पयति शास्त्रं तज्ञः नान्ये मितो हेतौ च ग्रहसंचलने ग्रहयति एजृ एजायां एज
यति भुवि शोषणे शुष्ठयति परि विस्तरवचने प्रपंचयति तिज निशाने तेज॰
यति पत स्फुटने प्रतयति हात संगोहेन ऋतइ द्दानोः उपधायस्य ऋकारस्य
देशो भवति रपरत्वम् फालि च उपधायां च धातोः रुपधा हेतो यो रेफ लकारो मेह्र॰
ल्यये न यो रुपधामाइको ही दीर्घो भवति कीर्तयति वर्ध छेदन पूरणयोः वर्धयति॰
ष्ठल प्रेरणे ष्ठलयति पिडि संघाते पिंडयति चित संचेतने चेतयति इल प्रेरणे एल॰
यति पिडि संघाते पिंडयति चित संचेतने चेतयति तेट श्रावण नेवनयोः ष्ठापयति
ते तंत्र कुटुंबधारणे तंत्रयति ते सति गुप्तभाषणे मंत्रयति ते भर्त्सन तर्जने भ॰
र्त्सयति ते वस्त गंध अर्दने वस्तयते गंधयते ललइ स्पायां शम लक्ष आलोचने शा॰
मयते नान्ये मितः लालयते शामयते कुत्स छेदने त्रोटयते ल्कुल आलोचने ल्कुल॰
मोचने आत्मपदार्थः पुनः पथः ल्क्षयते ज्ञप्त अवघ्नपणे ज्ञपयति तेवड्डु
प्रलंबने वंचयति दधिवन्धोः प्रलंबने ॥ दृधिवञ्छि इत्येतयोरेतयोः प्र ३॰

© Dharmartha Trust J&K. Digitized by eGangotri

लंबने वर्तमानयोः आत्मनेपदं भवति माणवकं वंचयते ---- मृगयालिः
प्रतिबंधे धर्मयतितेते द्विवुपरिकूजने आदेवयति कहविज्ञाने निकारयति
मह्रन्द्रमिश्रोधने पारयते विरहचेतनाख्याने विवारे शुभ्रसुं वेदयते वेत्तीत्य
र्थः आख्याने निवामं वेदयति आचष्टे इत्यर्थः विचारे वेदयते वादिनो मन
सं भेचिमानयते युज ऊनसायोयोजयते ऊसनो वा ऊसयते आऊस्मास्म
नेपदिनः दर्शोग्रथ्यने दर्चयति भुत्वभाषणे बुक्कयति शहूत्तमस्तगो हावि
ष्कारणे शहूयति काणनिमीलने काणयति सूदआस्रवा सूदयति जसतान
ने जासयति पवबंधने पाशयति अमरोगे आमयति चट स्फुट भेदे चाटयति १
आस्फोटयति घट्टचलने घट्टयति घटादयो मितः द्विवतर्जनं दवयति शुल्क
घुषिर् विशब्दने घ्रवघोषयति आहः क्रन्दसाततन्य आक्रन्दयति लश शिल्पि
संयोगे लाशयति लालयति भूष अलंकारणे भूषयति मोक्ष मोचने मोक्षयति
अर्ह पूजायां अर्हयति ज्ञा नियोजने पागमः आज्ञापयति दधुश्रप्रसहने गर्धयति
षह अभिभवे अध्ययनं प्रसाहयति अभिभवतीत्यर्थः यत निकारोपस्कारयो
यातयति वसस्नेहापहरणे वासयति भवो वल्कलने भावयति बोधविकल्क

© Dharmartha Trust J&K. Digitized by eGangotri

दुः
पा॰
१९
109

नेबोधयति ह्लापेस्लादस्यौ ह्लापेरोलद इति रेफस्थलः अववल्पयति उवक्ष्मोच
नेमोच इति उपअवधारणे पोषयति दल विधारणे दालयति अवपरगतोपा
दयति लडविलासने लोडयति लजि लंजायति भजि भंजायति दशि दंशायति
जसि जंसयति लगि लंगयति त्रसि त्रासयति उपगोपयति धूपधूपयति विछ
विच्छयति वर्हबर्हयति लोकृ आलोकयति लोचृ लोचयति नदनादयति ।
कुपकोपयति तर्क ऊहे तर्कयति वृतुवर्तयति वृधुवर्धयति षरीआप्यायने
आदयति रुजा हिंसायां रोजयति स्वद आस्वादने आस्वादयति स्वदेरकर्मका
त् आकृष्यत्वा ॥ वाणिवृभवतीत्यधिक्रियते वृष अभिसहने वर्षयति वर्षति ।
युज पृची संपर्के संपर्चयति योजयति पृह्म मर्षणे उन्मायति ईर क्षेपे ईरयति ली द्र-
वीकरणे लेलीनुत्रकावन्धनस्यात्र इति नुगागमः विलीनयति अन्यत्र नि
र्लीयते विस्यात उकलोपयति वृजी वर्जने वर्जयति वृञ् आवरणे आवार-
यति ज्युवयोहानौ जरयति रिच संपर्के रीचनयोः विरेचयति शिष असर्वोप-
योगे अवशेषयति विशेषयति शये विषये विशेषयति तप दाहे तापयति । ॐ
तृप तृप्तौ तर्पयति अथ कथ हिंसायां आथयति क्राथयति सोऽमागतो मीम

© Dharmartha Trust J&K. Digitized by eGangotri

यति शीक आमर्षणे शीकयति अर्द हिंसायाम् अर्दयति हिंसयति आङःस
दस्त्व पद्यत्यर्थे आसादयति वत्स मैश्माने वात्सयति मान पूजायाम् मानयति
वच भाषणे वाचयति गर्ह विनिन्दने गर्हयति मार्ग अन्वेषणे मार्गयति कठि शो
के कण्ठयति मृज शौचालंकारणयोः मार्जयति वृष प्रसहने वर्षयति आष्ट
षाढा अन्त्य व्यवस्थायार्थं विकरणो भवति एवी सपर्कं तथादित्वात् अस्य डणति
ली श्लेषणे क्र्यादित्वात् आलीनाति हुञ स्वादिः हुणोति जप्तु दिवादित्वात्
गृध्न जीर्यति रिचि वियोजने विश्लेषणे विचिनक्ति विपृ विपिनक्ति नशि धूञ कंपने धवादी
नां ह्रस्वः धुनोति प्रीञ तर्पणे प्रीणाति अथ ग्रंथे अश्नाति आप्लृ आप्नोति वच १
मार्गे: ग्रः लुक वार्धिं भूवादिः मार्गति कठि शोषणे कंठयति मृज मार्ष्टि भवतीत्यादि
इति चुरादिगणः गणाः शबादिकार्यं पूर्ववत् अजमत् स्यस्य सिपां तां तामः
ङित्लकार संबंधिनां तामादीनां चतुर्णां तामाम् स्य आदेशो भवति यथा संख्ये
न अजयताम् संयोगान्तलोपः अजयन् अजयः अजयताम् अजयतः अजयम्
स उत्तमपुरुषस्येत्यपि वक्तव्य ॥ नित्यं ङितः ॥ ङित्लकार संबंधिनः उत्तमपु
रुषसकारस्य नित्यं लोपो भवति अजयाव अजयाम अजयत विजयेताम् व्य

© Dharmartha Trust J&K. Digitized by eGangotri

२२

दु॰ पा॰ ११०

110

जयतम् व्यजयेथां व्यजयेथाम् व्यजयध्वम् व्यजये व्यजयाव व्यजयामहि एवं सर्व
त्रहृवादिगणो योज्यम् अटः सर्वेषाम् ॥ अटोऽङ्गाद्नरस्यापत्तस्यापत्तस्य प्रत्यय
स्य अडागमो भवति सर्वेषामाचार्याणां मतेन अपवादः आडजादीनाम् लङ्
लुङ् लृङ्क्षु परतः अजादेरङ्गस्य आडागमो भवति ॥ आटश्च ॥ आटश्च अचि पर
तः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति आटत् आटताम् आटः आटतम् आटत
आटम् आटव आटम हन हिंसागत्योः हन्ति तिसिपोः हल्ङ्याब्भ्यस्य लोपः अनु
नासिकलोपः अहन् अहताम् उपधालोपः घत्वं च अघ्नन् अहन् अहतम् अ
हत अहनम् अहन्व अहन्म आत्मनेपदम् आहत आघ्नाताम् आघ्नत आहथाम् अ
घ्नाथाम् आहध्वम् इत्यादि द्विष अप्रीतौ अद्वेट् अद्विष्टाम् द्विषश्चेति पाक्षिको जु
सादेशः अद्विषुः अद्विषन् अद्वेट् अद्विष्टम् अद्विष्ट अद्वेषम् अद्विष्व अद्विष्म
अद्विष्ट अद्विषाताम् अद्विषत दुह प्रपूरणे अधोक् अदुग्धाम् अदुहन् अधोक् अ
दुग्धम् अदुग्ध अदोहम् अदुह्व अदुह्म दिह उपचये अदेक् अदिग्धाम् अदिहन् ।
लिह आस्वादने अलेट् अलीढाम् अलिहन् चक्षिङ् व्यक्तायां वाचि ख्याञादेशः च ॐ
षत्वं चर्त्वं व्याचष्ट व्याचक्षाताम् व्याचक्षत व्याचष्ठाः ईड स्तुतौ ऐट्ट ऐडाताम् ऐड

© Dharmartha Trust J&K. Digitized by eGangotri

ऐडत ऐड्ढाः ऐडाथाम् ईडजनोर्ध्वे चेति इट् ऐडिध्वम् ईश ऐश्वर्ये ऐष्ट स्वपक्षे
तिषत्वम् ऐशाताम् ऐशत ऐष्ठाः ऐशाथाम् ऐड्ढ्वम् आस उपवेशने आस्त आ
म् आसत आङः शासु इच्छायाम् आशास्त आशासाताम् आशासत आशास्थाः
आशासाथाम् आशाध्वम् वस निवासे आवस्त अवसाताम् अवसत इट् आणि॰
शासवे अघूत अविस्पुधात ब्रुवा मिथ्यावदः अस्तुवाताम् अस्तुवत शीङ् स्वप्ने अ॰
शेत अशयाताम् अशेरत शीङो रुट् धुग्मि अशेरत ततो वृद्धिन्वि किहलि अयोत अयु
वाताम् अयुवत ऊर्णुञ् आच्छादने और्णोत और्णुत और्णुवाताम् और्णुवत ब्रूञ् व्य
क्तायां वाचि अब्रवीत अब्रूताम् अब्रुवत इण् गतौ ऐत ऐताम् इणो यण् इति
यणादेशः असिद्धवदत्राभात् ॥ असिद्धवदित्यधिकारः यदित ऊर्ध्वमनुक्र॰
मिष्यामः आपादपरिसमाप्तेः तदसिद्धवद्भवतीत्येवं वेदितव्यम् आभादि
ति विषयनिर्देशः आभसंशब्दानाद्यदुच्यते न च कर्तव्ये समानाश्रये
ह्यसिद्धं यथा तत्रस्थे च यत्र तदाभाच्छास्त्रीयं विधीयते तदाश्रयमेव भवति व्याश्र॰
यत्वात् असिद्धं भवतीत्यर्थः इति यणो सिद्धत्वात् आटः इङ् अध्ययने अधीत॰
इयङादेशः वृद्धिः यणादेशः अध्ययाताम् अध्यैयत इक अध्यैत अध्यैताम् इ॰

© Dharmartha Trust J&K. Digitized by eGangotri

सू॰ पा॰ १११

कापीश्यतीतिचण्डा। अध्यायन् अध्यापने अध्यात् अध्यातां लङः शाकटायन

स्येतिवाऊस्तस्यपसंतां अकारांताद्धातोः मिपरतः एवंपरयोःस्थाने एवं

रूपमेकादेशोभवति अभूः अग्धाविदज्ञाने अवेत् अवेतां मिजन्यलवि

दामस्तु ॥ सिचः अभ्यस्तसंज्ञकेभ्यः वेत्तेश्चाङिल्लकारसंबंधिझेः उसादेशो

भवति अविदुः सिपधातोरुर्वा ॥ इस्वधातोः ॥ इकारस्य मिपिपरतोवारुर्भ

वति अवेः अवेद्वा अवित्तम् अवित्त अविद्म अविद्व अविद्म ॥ समविशुस्

मविशुसमविशातां समविदन् वेत्तेर्विभाषेति पक्षे समविदुः समविद्वत अस

नावि अस्तिसिचोपृक्ते ॥ अस्तेः सिजन्तस्य सिचः परस्यापृक्तस्य सार्वधातुका

स्य ईडागमो भवति आसीत् आस्तां आसन् असीः मृज्रुषु शुद्धौ अमार्ष्ट अमृ

क्षां अमृजन् अमार्जन् वचभाषणे अवक् अवक्तां अवचन् रुदिर् अश्रुवि

मोचने रुदः पंचभ्यः रुदादिभ्यःपंचभ्यः उत्तरस्यापृक्तस्य सार्वधातुकस्य ईडाग

मोभवति अरोदीत् अरुदितां अरुदन् अरोदीः अरुदितम् अरुदित अद्गा

गिगानवयोः अरोदीत् अरुदत् अस्वपीत् अस्वपत् अस्वापिते अस्वपन् स्व

श्वसीत् श्वसत् अप्राणीत् अप्राणत् अजक्षीत् अजक्षत् सिजन्तस्येति रु

ज॰

© Dharmartha Trust J&K. Digitized by eGangotri

जुहु अजनुः जायनिङ्घालये जाग्रोऽविचिण्णल्ङित्सु ॥ जागर्तेः विचिण्णल्ङित्व
र्जिते प्रत्यये परतः गुणो भवति हल्ङ्यादिलोपः अजागः अजागृताम् जागरि
वेति गुणः अजागरुः दरिद्रातेर्ङ्गतौ अदरिद्रात्‌ इह दरिद्रस्येत्यइत्वं अदरिद्रुः
नाम् अदरिद्रुः चकारह्रदीसौ ॥ दसि ॥ सकारान्तस्याङ्गस्य ते सार्वधातुके
परतः दकारादेशो भवति चर्त्वम् अचकात् अचकाताम् अचकासुः शा
स्तु अनशिष्टो अशात् शासइदङ्हलोरिति इकारः षत्विषाम् अशासुः वश
कान्तो ग्रहिज्येति संप्रसारणमिति अस्य अङ्गेति षत्वम् जश्त्वं चर्त्वं अवट् उशाम
उशन् अवट् उष्टं उष्ट अवशम् उष्व उष्म ह्नुङ् अपनयने अह्नुत अह्नु
वाताम् अह्नुवत इत्यादयः अथ जुहोत्यादयः हु अजुहोत् ञिभी भयेऽ
बिभेत् अबिभीताम् अबिभिताम् अबिभयुः ह्री लज्जायाम् अजिह्रेत् अजिह्री
ताम् अजिह्रियुः अददात् अदत्ताम् अददुः अदधात् अधत्ताम् अदधुः ।
णिजिर् शौचपोषणयोः णिजां त्रयाणां गुणः अनेनेक् अनेनिक्ताम् अनेनि
जुः अनेनेक् अनेनिक्तम् अनेनिक्त नाभ्यस्तस्याचि पिति सार्वधातुके अ
भ्यस्तस्याङ्गस्य लघूपधस्याजादौ पिति सार्वधातुके गुणो न भवति अनेनिज

© Dharmartha Trust J&K. Digitized by eGangotri

२५

तृं॰ पा॰ १२८ 112

त् अनेनिक्त अनेनिक्ताम् विजिर् पृथग्भावे अवेवेक्त अवेविक्ताम् अवेविजुः
विष्लृ व्याप्तौ अवेवेट् अवेविष्टाम् अवेविषुः भृञ् अबिभः अबिभृताम् अ-
बिभरुः जनित्वरणाः माङ् माने अमिमीत ओहाङ् गतौ अजिहीत ओहाक् त्यागे अ-
जहात् अजहीताम् अजहिताम् अजहुः ऋ गतौ पिपः पिपृताम् पिपरुः पॄ
पा अपिपरत गोष्पूर्वस्येतित्वरत् दीर्घः अपिपूर्ताम् अपिपरुः इति ह्वादयो हात्या-
दयः अतनीयत् अतनीयताम् अतनीयन् स्वादित्वः स्नुः अतनोत् तस्य अत्र
त् नोपिर् आदायादिभ्यः श्नः अवृणोत् अवृणुताम् अवृणुवन् हृस्वस्य कारस्य कः अक-
णोः अवृणोद्वा भिदिर् विदारणे अभिनत् अभिन्ताम् अभिन्दन् डि हि हि अवाणोङ् ल
हयमन् इति इन्द्रहोत्रः अतनोत् अक्रीणात् अक्रीणीताम् अक्रीणन् माङ्ले
ये अरोचयत नमद्योगे इत्याडागमप्रतिषेधः माभवान् पेत् अघलोट् ॥ लो-
ट्च ॥ लोटन्त्ययो भवति विध्यादिष्वर्थेषु ॥ ऋतः ॥ लोडादेशानामिकारस्यो-
कारादेशो भवति शमादिकार्यं पूर्ववत् जयतु ॥ तुह्योस्तातङ्ङाशिष्यन्यतरस्या-
ङ्कारो गुणवृद्धिप्रतिषेधार्थः नातादेशार्थः जयतात् ॥ लोटो लोङ्वत् ॥ लो-
टो लङ्वत्कार्यं भवति तामादयः सलोपश्च जयताम् जयन्तु ॥ सेर्ह्यपिच्च ॥

ड॰

© Dharmartha Trust J&K. Digitized by eGangotri

लोडादेशस्य सेर्हिरादेशो भवति अपिच्च भवति विनोल्लगित्यपिवात्य ॥ १
निवासे रोगापनयने च निंदाक्षमाव्याधिप्रतीकारेषु सन् दिष्यते ॥ गुप्तिज्किद्भ्यः सन् नकारः
सन्वकारोरित्यविशेषणार्थः जुगुप्सते तितिक्षते चिकित्सति मान पूजायां बध बंधने दान अ
वखंडने शान तेजने मानबधदान्शान्भ्यो दीर्घश्चाभ्यासस्येति दीर्घः मानेविचारणे सन्निष्यते मी
मांसति मीमांसते दीदांसति दीदांसते तेजामिदिप्यादिह्वत्य ॥ सन्यतः सनि परतः अकारः

© Dharmartha Trust J&K. Digitized by eGangotri

५२

टं॰
पा॰
२३६
136

स्याद्यासस्याद्दकारादेशो भवति भष्भावदीर्घो भवत्साने धीशांसते धातोः कर्मणस्समानकर्तृका
दिति सन्प्रत्यये पातुमिच्छति पिपासति स्थातुमिच्छति तिष्ठासति स्नातुमिच्छति जिघ्रा
सति चिकासति जिगमिषति धातुमिच्छति दित्सति धित्सति ॥ सनि मीमाघुरभलभशक॰
पतपदामच इस् इति मीमांसादीनामचः इस् अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः स्कोः प्रतिमि॰
त्सते च तिङ् आदिव्याममतिनाम्नः सहायासन इत्यात्मनेपदं जिज्ञासते ॥ ज्ञानेर्ज्ञः ॥ प्र
त्युजिज्ञासति हेञ्स्हेञः संप्रसारणमित्यधिकृत्य ग्रभ्यस्तस्य चेत्य संप्रसारणं जुहूषति वि॰
ज्ञ हलो गल्‌ ॥ इगन्ताञ्झातो झलादिः सन्किद्भवति किन्त्वाद्गुणाभावः ग्रेक्तानि गमासनी॰
ति दीर्घत्वं विभाषा चेरिति कत्वम् चिकीषति चिचीषति जिजेयसलिंटोर्न्नेरिभ्याभ्यासङ्॰
त्तरस्य जेर्गत्वम् जिगीषति विजिगीषते प्रतिजिगीषति प्रतिजिगीषते ॥ हि ॥ हेरचङीति
कत्वम् प्रजिगीषति ॥ स्मिपूङ्रञ्ज्वशां सनीति इट् विसिस्मयिषते ॥ ओः पुयण्ज्यापरे इति
इत्वम् पिपविषते परिरिषति अंजिजिषति अशिशिषति श्विश्रिडीङ्श्रीङः सेटः शिश्रियि
षति शिश्रयिषति सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनामिति वा यदङ् अज्झनगमां
सनीति दीर्घः शिश्रीषति डीङ् डिडयिषते शीङ् शिशयिषते सिनी भये बिभीषति जिज्ञीषति॰
इणागत्तो गमिरबोधने सनि चेति गमिरादेशः गमिरिट्परस्मैपदेष्विती धु जिगमिषति समो ॐ.

© Dharmartha Trust J&K. Digitized by eGangotri

गमश्चेत्यात्मनेपदत्वम् संजिगंसते बोधने गमिरादेशो न भवति अजादेर्द्वितीयस्य सन एका

चो द्वितीयस्य द्विवचनं सन्यतः इति इत्वम् इण् गतौ प्रतीषिषति इङ् इङश्चेति गमिरादेश

अज्झनगमां सनीति दीर्घः अधिजिगांसते इक् इण्वदिक इति अतिदेशात् सनि चेति गमि

रादेशः अधिजिगमिषति जुहूषति सुसूषति सुनोति सस्य सुनोतेः स्यसनोरिति सकारस्य षत्वप्रतिषे

धः सनि ग्रहगुहोश्चेति इट्प्रतिषेधः रुरूषति युस्वृयूर्णुभरज्ञपिसनामिति वा इट् युयू

षति यदा इट् तदा गुणः स्थानिवद्भावाद्द्विवचनम् ओः पुयण्ज्यपरे इति इत्वम् यियविषति हृञ्

हरणे इको झलिति कित्वम् अज्झनगमां सनीति दीर्घः ऋत इद्धातोरिति इत्वम् रपरत्वम् हलि

चेति दीर्घत्वम् चिकीर्षति जिहीर्षति वृ सनि वा इति निषेधे वा वुवूर्षति विवरिषति वृतो वे

ति दीर्घत्वम् विवरीषति आतिस्तीर्षति पालने पिपरीषति पिपूर्षति तथा विजिज्ञपयिषति गरणे दृ

ङ् आदरे धृङ् अवस्थाने प्रच्छ ज्ञीप्सायाम् किरश्च पञ्चभ्य इति इट् चिकरिषति जिगरिषति ग्र

सि विभाषा चेति लत्वम् जिगलिषति आदिदरिषते आदिधरिषते रुदविदमुषग्रहिस्वपिप्र

च्छः संश्चेति कित्वम् पिपृच्छिषति ज्ञा अवबोधने जिज्ञासति संप्रापि दिदृक्षिषति शु श्रवणे ज्ञाश्रुस्मृदृशां

सन इति आत्मनेपदं शुश्रूषते नानोर्ज्ञः इत्यधिकारात् प्रत्ययतः आ... इति प्रतिषेधः प्रतिशुश्रू

षति ॥ अथ हलन्ताः ॥ पच पिपक्षति यज यियक्षति वस निवासे सः स्यार्धधातुके इति सका

© Dharmartha Trust J&K. Digitized by eGangotri

५३

टू॰
पा॰
१२०
137

रस्यतः। विवित्सति विवित्सति बुधमभावः चत्वम्। बुभुत्सते। सनि मीमाघुरभलभशक
पतपदामच इस्। सनि मीमाघु रभलभ शक पत पद इत्येतेषामच इस्थाने इस् आदेशो भवति अत्र
लोपोऽभ्यासस्य। यदेतदुपक्रान्तं सनि मीमा इत्यादि सूत्रं तदारभ्य मुचोऽकर्मकस्य गुणो वेति याव-
त् अत्राभ्यासलोपो भवति स्कोः संयोगाद्योरिति सलोपः चर्त्वम्। आरिप्सते आलिप्सते शिक्षि-
ति पित्सति तनिपतिदरिद्राणामुपसंख्यानमिति वा इट् तितनिषति पिपतिषति अतितनिष्यते
तनोतेर्विभाषा॥ तनोतेरंगस्य सनि झलादौ परतो विभाषा दीर्घो भवति तितंसति तितांसति
यम यियंसति रम रिरंसति गम्लृ गमेरिट् परस्मैपदेष्विति इट् जिगमिषति वनु विवनिषति
जनी जिजनिषति मनी वर्तेत्यादिना वा इट् षणु दाने सिसनिषति जनसनखनां सञ्झलोः
त्यात्वम् सिषासति हन गत्या निगमांसनी ति दीर्घत्वम्। अभ्यासेचेति कुत्वम् जिघांसति
अद भक्षणे हसनो ... घस्लृ इति घस्लृ सस्यार्धधातुके इति सस्य तः जिघत्सति इह भावादेधा-
तोर्घ इति घत्वम्। दिदत्सति नह बन्धने नहो धः निनत्सति मह यह ग्रहो सनीनौ ग्रो ...
षधः रुदविदेति कित्वम् ग्रहिज्येति संप्रसारणम् ढ इति ढः जिघृक्षति जिघप ... कि ... म ... त्य ... क्ष ... ष
ति विद विचारणे विद सत्तायां अनिटौ विवित्सति विद्लृ लाभे विवित्सते विद ज्ञाने इट् विविदि-
षति रुदविद मुष ग्रहि विविदिषति कित्वम् रुरुदिषति मुमुषिषति घस्लादी ... फलो ... डला। उं.

© Dharmartha Trust J&K. Digitized by eGangotri

दे: संञ्चेति किन्त्वं यातिस्याप्योरभ्यासस्येति संप्रविविदिषतिषनविविदिषोतिषते लल्लभिषते तु
त्वलाद्य: गां जगदिभ्योऽसिऽसिति जटकौटिल्ये नजुगुटिषति तत्तु जुटिषति लिहलिलि
क्षति मयल्लक्षमुक्तत्तिसवे .... वर्णकस्य गुणोवामनिमकारान्तो सनिपरे गुणोवा मेदावस्य
गुणोवाभवति प्रत्ययलोपो व्यासस्यमोनति वृत्तवर्तमाने वृधुवृद्धौ वृधुस्यन्दस्त्रवर्णा दृषत्व्वस्य
सनो गिति परस्मैपदमात्मनेपदं वानवृत्स्य स्यस्यतभं संस्येनेति प्रतिषेध: मालिक: विवृत्सतिविव
र्तिषति विवृत्सते विवर्धिषति विवृत्सति तिवृत्सर्धिषते सिस्यन्त्सति सिस्यन्दिषते क्षमसा
विक्लृप्सते चिक.... ल्पिषते कृतीवेष्टने हृतनश्छृदन्तृत्तृदृज्ञातिवाइट् चिकर्त्सति चि
कर्तिषति विच्छृत्सति विच्छर्दिषति सृज विहलनाम्ब्रेता किन्त्वमुमि सृत्सति दिदृक्षति सृजि
दृशोरेनानिति नास्या: सृशासनाद्यात्मनेपदम् सनीवंततिड्गत्ता ज्ञाता: सनिवाइट् दिदेवि
षते प्रनित्यत्वेञ्चो: सूडुक्तनामिकेचेत्सदृ ऋकार: पतेधत्त्वामित्विति विशेषणार्थ: इकोय
णवीतिधाण इष्टू षातिषिड्भुतस्तोते रेवषणभंसस्य षात्वम् अन्यत्रनाशिमिमे विष्यते सष्ष
षतेतिषिष्वुनितिषे विष्यति तत्पूषातिभधुवृद्धौ इट्गुणः द्वितीयस्य द्विवचनम् नेङ्गासंयोगा
द्यज्ञातिरेफानहिरुच्यते प्रविविधयाति प्रनित्यत्वे प्रापुत्तापिधासीदितिहृत्वम् इत्मातिभ्रज्ज
भ्रस्जेरोपधयोरं प्रन्यतरस्यामिति रमागमः उपधारेफयोर्निवृत्तिः बिभत्त्यति पदेइट् बिभर्जिषति

© Dharmartha Trust J&K. Digitized by eGangotri

हं॰ पा॰ १३८

बिभ्रक्षिषति इत्यादि दिदीर्षति दधेर्दिधिस्वेति इत्वं अभ्यासलोपश्च हलंतास्येति कित्वं अनिटि
तां हलंतस्यानुनासिकलोपः भष्भावः दिप्सति धीप्सति आप्ज्ञप्यृधामीदिति ईत्वं ।
अभ्यासलोपश्च ईप्सति अनासिद्ध [illegible] ज्ञीप्सति ईर्त्सति इति वकारेणाहि
रुच्यते आजिजिषति अञ्चूअभियोगे अञ्चिचिषति [illegible] दिदिषति डुयाच्यां याचायां यिया-
चषते [illegible] पिस्पर्धिषते जिहासति विधाविकीर्षति [illegible] डिडीषते
किषते [illegible] किषते [illegible] सिसिषते [illegible] धिप्सति [illegible]
लिल्सति [illegible] षिषिषते [illegible] इत्येवमादि ॥ भावकर्मणोः [illegible] लोपः
चिकीर्षते जिहीर्षते ॥ [illegible] ॥ इति सनंताः ॥ अथ यङंता वक्ष्यन्ते ॥ [illegible]
[illegible] पुनः [illegible] विवक्षायां धातो रेकाचो हलादेः क्रिया-
समभिहारे यङ् [illegible] क्रियासमभिहारे वर्तमाने तस्मात् यङ् प्रत्ययो भ-
वति [illegible] क्रियासमभिहारः [illegible] विशेषणार्थं [illegible]
ति द्विवचनम् [illegible] ॥ दीर्घोऽकितः ॥ अकितोऽभ्यासस्य दीर्घो भवति [illegible]
वपरतः सनाद्यंताः धातव इति धातुसंज्ञायां [illegible] आत्मनेपदमित्यात्मनेपदम् या-
यायते [illegible] इत्वम् गुणो यङ्लुकि [illegible] अभ्यासस्य गुणो भवति देदीयते देधीयते

ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

मेमीयते जगीयते पेपीयते ओहाक् जेहीयते घ्राध्मा मेमीयते ई घ्राध्मोरिति ईत्वम् जेघ्री
यते देध्मीयते ज्या वयोहानौ संप्रसारणं जेजीयते व्येञ् संवरणे स्यमिव्येञामिति संप्र वेवीयते।
वेव्यतः संप्रसारणं जोज्यते टुओश्वि लिड्यङोश्चेत्यधिकृत्य विभाषा श्वेरिति संप्रसा
रणं शोशूयते शेश्वीयते चिञ् अकृत्सार्वधातुकयोरिति दीर्घः चेचीयते डेडीयते हि
गतौ हेरचङीति हकारस्य कुत्वं जेघीयते णीञ् नेनीयते ध्रीङ् ध्याधाप्योः किति शाध्य
ते जोहूयते सु ऊतोस्यूयते भ्रामि बोभूयते रोरूयते लोलूयते नोनूयते ऊ
र्णुञ् वाच्य ऊर्णोर्नुवद्भावो यङ्प्रसिद्धिः प्रयोजनम् आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्र
हात् प्रोर्णोनूयते नाङ् न कवतेर्यङीत्यभ्यासस्य चुत्व इति षेधः कोकूयते कानोऽभव
त्येव णत्वम् चोकूयते पोप्लूयते तद्धा ऋरीङृत इति रीङ् चेक्रीयते जेक्रीयते ऋ गतौ गु
णोर्तिसंयोगाद्योरिति वर्तमाने यङि चेति गुणः रपरत्वं न न्द्राः संयोगादय इति न प्रतिषेधः
अरार्यते स्मृ सास्मर्यते ध्वन शब्दे दाध्वन्यते ऋत उद्धातोरिति षत्वम् हल चेति दीर्घः चेकी
यते स्यायङ् इति लत्वम् निजेगिल्यते प्रपोप्लूयते नेनीयते पापच्यते पापठ्यते वाव
श्यते स्वापि स्यामि व्येञा यङ् संप्रसारणम् सोषुप्यते सेसिम्यते वेवीयते वश कान्तौ न
वशाङ् इति संप्रसारण प्रतिषेधः वावश्यते चाय इत्यनिशास्तनयोः चायः की चेकीयते

५५

हं स्फायी ओप्यायी वृद्धौ स्फायतेः स्फायः स्फी इति स्फीभावः पेस्फीयते प्या...... यः पी लिङ्य
पा ङ्ये चेति पीभावः पेपीयते ॥ जनसनखनां सञ्झलोरिति वर्तमाने ये विभाषेति आत्वं जाजायते
ट१५ सासायते चाखायते नुगतोनासिकान्तस्येति नुगागमो भ्यासस्य जंजन्यते संसन्यते चंखन्य
139 ते रम यम नश्चापरान्तस्य हलोन्त्य नुस्वारेण प्राप्नोति ग्र नुस्वारागमवचनात् सिद्धम् ग्रन्
स्वारपवायं न इत्युच्यम् रंरम्यते यंयम्यते हन अभ्यासस्य ज्ञात्वं अभ्यासाच्चेति घत्वं जंघ
न्यते हंते र्हिं साघांघ्रीभावः जेघ्रीयते गत्यर्थानां नित्यं कौटिल्ये नित्यं कौटिल्ये गताविति
यङ् ज्ञातिले क्रामति चंक्रम्यते इत्युगतौ दंद्रम्यते जपजभदहदशभंजपाशीनां नुमागमो
भवति अभ्यासस्यालपमनटचर जपजभदहदशां ‥ भोभाव गान्हायां गान्हितं लपति लोल
प्यते चंचूर्यते सासद्यते चगचरफलोश्चेति उत्व तन्त्यस्यान इति तत्वमुयो रूपधाया इति
दीर्घः चंचूर्यते पम्फुल्यते जपजभेति नुम जंजप्यते जंजभ्यते दंदह्यते भंजे र नुनासिका
लोपः बंभज्यते दंदश्यते पंपश्यते नेष्यन्ते सृत्र धन्त्र भ्रंस्त्र कसपत पद स्कन्दाम् वन्चुस
स्त्र धन्त्र भ्रन्स्त्र कसपत पद स्कन्दां टङ् त्येते षामंगानामभ्यासस्य नीगागमो भवति यङि यङ्लु
कि च परतः अभ्यासस्यानुनासिकलोपः वनीवच्यते सनीस्रस्यते दनीध्वस्यते बनीभ्रश्य डो.
ते चनीकस्यते पनीपत्यते पनीपद्यते चनीस्कद्यते भिद भोभिद्यते बुध बोबुध्यते दनह

© Dharmartha Trust J&K. Digitized by eGangotri

धुम्भूष्णुरपुपथस्येति रीक् वरीवृत्यते वरीवृध्यते शरीशृध्यते नरीनृत्यते जरीजृत्यते डोर
छावयते तोत्रौवयते यह्विन्येति संप्रजरीगृह्यते रीघ्रतइति वक्तव्यम् वरीवृष्यते परीपृच्छ्यती
वरीव्रज्यते भावे यक यतोलोपः पोपूयते चेचीयते हलंतेभ्यः यस्य हल इति यकालोपः
पापश्यते बोभियते इत्येवमादि लिङ् यां कृञ् प्रयोगः आमः कृञनुप्रयुज्यते लिटि इति ।
कृञो नुप्रयोगः लोलूयांचक्रे लुट् लोलूयिता लृट् लोलूयिष्यते लृङ् अलोलूयिष्यत
लोट् लोलूयताम् लङ् अलोलूयत लिङ् लोलूयेत आशिषि लोलूयिषीष्ट लुङ् अलोलू
यिष्ट एवं ङिन्ताः ॥ यङ्लुगन्तो वक्तव्यः बहुलं छन्दसीत्यधिकारात् ॥ यङो चिच ॥ चका
रेण बहुलग्रहणमनुकृष्यते यङो लुग्भवति अचि प्रत्यये परे बहुलग्रहणानुवृत्ते क्वचि
त्प्रयोगानुसारेण लुगभिप्रायिको वेदितव्यः चक्रीतं परस्मैपदं अदादिवच्च इष्टव्यमनु
वर्डित्यधिकारात् ॥ यङो वा ॥ यङ्गतात् हन्त्रस्य हलादेः पितः वा ईडागमो भवति लोलवी
ति लोलोति लोलूतः लोलुवति लोलवीषि लोलोषि इत्यादि वावदीति वावत्ति वावत्तः
वावदति क्रोशो चाक्रशीति चोक्रोषि चोक्रोष्टः चाक्रशति नाभ्यस्तस्याचि पिति सार्व
धातुके इति गुणप्रतिषेधः मुदीहर्षे मोमुदीति मोमोत्ति मोमुत्तः मोमुदति लिट् मोमोदांच
कार लुट् मोमुदिता लृट् मोमुदिष्यति लोट् मोमुदीतु मोमोत्तु मोमोत्ताम् मोमुदताम्

© Dharmartha Trust J&K. Digitized by eGangotri

५६

हृ॰ पा॰ १४०

140

मोमहि त्तमोमहि मोत्तुहीहि लङ् अमोत्तुवीत् अमोमोत् लिङ् अमोत्तुयात् आशिषि मो
त्तुयात् लुङ् अमोमोत् लृङ् अमोत्तविष्यत् लोमुहा वा वावदीति वावाति लङ् अवावदी
त् अवावात् सिप् अवावादीः अवावाः ऋधु अभिकांक्षायाम् रीऽहृदुपधस्य च रित्यकोच
ल्कवि इति रीक् रिक् रुक् आगमः जर्गृधीति जरिगृधीति जरीगृधीति जर्गर्द्धि जरिगर्द्धि जरी
गर्द्धि लङ् अजर्गर्धीत् अजर्गृद्धाम् अजर्गृधुः ईडभावे लघूपधगुणः सिपो हल्ङ्यादि लोपः
गुणः रपरत्वम् भषभावः घकारः इत्यस्य धकारस्य जश्त्वं दः जग्धोस्ति पिधातोरुपवादि त्यधिकृ
त्य दस्येति दस्य रुत्वं वा नतः पूर्वस्य गेरो लोपः ढ्लोपे पूर्वस्य दीर्घो गुणः अजर्गाः अजर्घा
ट् हाक्रुः अथ अवोऽक्रः रय अराराः एवमाधयोपि ...... इष्टव्याः एवं ...... येऽत्र गत्ताः सर्वेव
गंतव्याः ॥ इतो णिजन्ताः ॥ यातिकाश्चित् तं यातुमितरः प्रयुंक्ते स तस्य हेतुः ।
हेतुमति च ॥ हेतुः स्व ...... तंत्रस्य कर्तुः प्रयोजकस्तेनेदी यो व्यापारः प्रेषणाध्येषणादि
लक्षणो हेतुमान् अस्मिन्नभिधेये धातोः णिच् प्रत्ययो भवति णकारो वृद्ध्यर्थः चकारो ब्री
ह्रीरीक्नूयीक्ष्माय्यातां पुः णौ ॥ अर्तिः ह्रीः ब्ली री क्नूयी क्ष्मायी ॥ इत्येतेषामाकारान्तानां
च पुगागमो भवति णौ परतः यापयति गापयति स्नापयति धापयति स्थापयति आदेच उपदेशे डो॰
ऽशितीत्यात्वम् लेऽआत्वम् ज्ञापयति वसुवमा वेभवापित्वम् मितः ह्रस्वः घटादयो मित

© Dharmartha Trust J&K. Digitized by eGangotri

इति सूत्रेण मितो धातवः प्रतिपादिताः तेषामुपधायाः ह्रस्वो भवति णिपरतः ज्ञापयति वद
याचने वनयति टुवमुद्गिरणे वमयति ॥ शाच्छासाह्वाव्यावेपां युक् ॥ शाच्छासाह्वाव्ये
पां इत्येतेषामंगानां णौ परतः युगागमो भवति शो तनूकरणे शाययति छो छेदने अवच्छा
ययति षो अन्तकर्मणि अवसाययति ह्वेञ् ह्वाययति व्येञ् संव्याययति कर्त्रभिप्राये क्रियाफ
ले विवक्षिते णिचश्चेत्यात्मनेपदं भवति संव्याययते वेञ् वाययति पा पाने पाययति पा रक्षणे
पातेर्लुगागमो वक्तव्यः पालयति धूञ् विधूनने प्रङो णिति वृद्धिः धावयति वा गतिगंधनयोः
वापयति अध्यापयति जापयति मीञ् हिंसायां मीनातिमिनोतिदीङां ल्यपि चेत्यात्वं मापय
ति डुमिञ् प्रक्षेपणे प्रमापयति दीङ् क्षये उपदापयति ली श्लेषणे विभाषा लीयतेरि
त्यात्वं पालयति इति लीकारस्य श्लेषणलातेर्ग्रहणं न भवति लीलोर्नुग्लुकावन्यतरस्यां स्ने
हविपातने इति विभाषा नुग्लुको भवतः घृतं विलीनयति चिस्फुरोर्णौ विति पधः स्या
नेवा आत्वम् वी गतिप्रजनकान्त्यसनखादनेषु प्रवापयति प्रवाययति ञिभी भये बिभेते हेतु
भये इति विभाषया आत्वम् मुण्डो भापयते अन्यत्र भियो हेतुभये षुक् भीस्म्योर्हेतुभये इत्यात्म
नेपदम् मुण्डो भीषयते जटिलो भीषयते हेतुभयादन्यत्र हृष्ट्यायादेष्णोपरस्मैपदम् चंजावि
कयैनं भाययति युगात्वं स्वपदं चैव बिभेतेर्हेतुजे भये आत्वं च स्वपदं चैव स्मयतेर्हेतुजे स्म

© Dharmartha Trust J&K. Digitized by eGangotri

हु॰
पा॰
१४२
147

येन त्वं स्मयते इत्यात्त्वं विस्मापयते ऋ गतौ ह्री लज्जायां व्ली वरणे री गतिरेषणयोः क्नूयी शब्दे उन्द-
ने च क्ष्मायी विधूनने अर्त्तीत्यादिना पुक् पुगन्तलघूपधस्य चेति गुणः अर्पयति ह्रेपयति व्लेपय-
ति रेपयति यलोपः क्नोपयति क्ष्मापयति श्रिञ् सेवायां ह्वयादेशौ आययति णीञ् नाययति
धूञ् विधूयति धूञ्प्रीणोर्नुग्वक्तव्यः प्रीञ् प्रीणयति श्र आवयति ड्डावयति लू लावयति पू-
पावयति ष्टु स्नावयति ज्ञावयति भावयति श्रु स्रावयति ह्वृ ह्वारयति कृ कारयति स्त्व-
ृ स्तारयति वृञ् वारयति निवारयति धृ धारयति गृ निगारयति अचि विभाषेति लत्वं निगाल-
यति ॥ हलन्ताः ॥ पाचयति पाठयति हस्य नाश्व लन्नोरिति उकारादेशः हो हन्तेर्ञ्णिन्नेषु तत्वं घ-
तउपधाया इति वृद्धिः घातयति जिघ्य प्रस्थापयति अन्यत्र ध्यापयति भिद्रू भेदयति छिद्रू छेदय-
ति बुध बोधयति द्रुव्रव व्रयति हनुर्माथ्यों हृपेरोलयति लत्वम् संकल्पयति क्रीडयति कुद् ।
कूजयति ढौकयति षिधु सिध्यते स्पारलौकिकेइत्यात्वम् साधयति अन्यत्र सेधयति तप
अर्जयति सिंचयति व्ययति ध्वंसयति दुष दैकृतौ ऊदुपधायागोहइत्यधिकृत्य दोषो णा-
विति उपधाया ऊत्वम् दूषयति स्फायी स्फायो वः इति वकारादेशः स्फावयति शद्लृ शातने श-
देरगतौ त इति तकारादेशः शातयति अन्यत्र शादयति गमयतीत्यर्थः रुह बीजजन्मनि रुहः
पोऽन्यतरस्यामिति पकारादेशः रोपयति आरोहयति ॥ मित उच्यन्ते ॥ घट चेष्टायाम् अत

डो॰

उपधाया वृद्धिः मितां ह्रस्वः घटादयो मितः घटयति व्यथ भयसंचलनयोः व्यथयति प्रथयति
प्रसयति म्रदयति स्खद स्खदने स्खदेरवपरिभ्यां चेति निषेधः उपस्खादयति परिस्खा-
दयति क्षजयति क्रपयति कदयति क्रदयति क्लदयति ञित्वरा संभ्रमे त्वरयति अन्यत्र त्वार-
यति ज्वरयति गडयति खंडयति हेड वेष्टने मितां ह्रस्वः एच इग्घ्रस्वादेशः हिडयति वटय-
ति भटयति नटयति नाटयति चखयति रखयति लखयति लगयति ह्रगे ह्लगे ष्ठगे संवरणे
ह्रगयति ह्लगयति सगयति स्थगयति कगयति अगयति अकयति रणयति चणयति श्रण-
यति श्रथ क्रथ हिंसार्थः श्रथयति क्नथयति क्रथयति ज्वल ह्वल ह्मल चलने ज्वलयति
ह्वलयति इत्यादि स्मृ आध्याने ह्रस्वः स्मरयति अन्यत्र स्मारयति दृ भये दरयति भया-
दन्यत्र दारयति [illegible] नॄ नये नरयति श्रा पाके श्रपयति ज्ञा मारणतोषणनिशानेषु मित्सं-
ज्ञाः मारणे मज्ञापयति पशून् मारयतीत्यर्थः तोषणे ज्ञापयति राजानं तोषयतीत्यर्थः नि-
माने ज्ञापयति शरान् [illegible] नेजयतीत्यर्थः चल कंपने चलयति अन्यत्र चालयति छदि-
र् ऊर्जने छदयति अन्यत्र छादयति दोषानु जिह्वोन्मथनयोः लडिः लडयति अन्यत्र लाड-
यति मदी हर्षग्लेपनयोः मदयति अन्यत्र प्रमादयति जनी जृष् क्नसु रञ्जो ऽमन्ताश्च जनय-
ति जरयति रञ्जेर्णौ मृगरमणे इत्यनुनासिकलोपः रजयति मृगान् अन्यत्र रंजयति विक्न-

© Dharmartha Trust J&K. Digitized by eGangotri

तृ॰ पा॰ १५२ 152

लयति विह्वलयति परिणामयति अमन्ताः सर्व एव मितः शमयति दमयति गमयति रम-
यति चमयति नमयति ग्लास्नावनुवमां चेत्यनुपसर्गाद्वा मित्त्वम् ग्लापयति ग्लपयति स्ना-
पयति स्नपयति वानयति वनयति वमयति वामयति सोपसर्गान्नित्यमित् उत्स्नपयति प्र-
स्नपयति प्रणवयति प्रवमयति न कम्यमिचमां कामि अमि चामि इत्येतेषां मित्त्वं प्रतिषि-
ध्यते कामयते आमयति आचामयति शमो दर्शने शामयति श्रुवान् स्वन्त्वत्र शामयति क्रो-
धम् यमोऽपरिवेषणे यमयति ब्राह्मणान् परिवेषयतीत्यर्थः इणो गतौ गम्यबोधने गमय-
ति इण्वदिकः अधिगमयति सर्वत्राणिचश्चेत्कर्त्रभिप्राये क्रियाफले आत्मनेपदं भव-
ति गृधिवञ्च्योः प्रलम्भने स्थाने गर्धयते दस्युं वञ्चयते लियः सम्माननशालीनीकरणयोः ।
च प्रलम्भने आत्मनेपदं भवति आलापयते मिथ्योपपदात्कृञोऽभ्यासे आत्मनेपदं मिथ्या-
कारयते बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः निवृत्त्यात्मनेपदे प्राप्ते बुधादिभ्यो णिजन्तेभ्यः
परस्मैपदं भवति बोधयति योधयति नाशयति जनयति अध्यापयति प्रावयति द्रावयति
स्रावयति निगरणचलनार्थेभ्यश्च परस्मैपदं निगारयति निचालयति अणावकर्मकाच्चि-
त्तवत्कर्तृकात् न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः पादि दमि आङ्यम आङ्य- ॐ
स परिमुह रुचि नृति वद वस इत्येतेभ्यः परस्मैपदं न भवति णिचश्च कर्त्रभिप्राये क्रिया

© Dharmartha Trust J&K. Digitized by eGangotri

पालेरित्यादिनात्मनेपदमेवापादस्यादिभ्यो भवति पाययते दमयते आयामयते आयाम
यते परिमोहयते आरोचयते नर्तयते अभिवादयते आवासयते ॥ भावकर्मणोर्यक् १
णेरनिटि लोपः कार्यते ह्रियते कर्मकर्तरि कर्मवद्भाव इष्यते कारयते स्वयमेव काप्रत्य
यादाममन्त्रे लिटि इत्याम्प्रत्ययः अयामन्ताल्वाय्येत्न्विष्णुष्विति णेरयादेशः कारयांचकार
लुट् कारयिता लृट् कारयिष्यति लोट् कारयतु अकारयत् लिङ् कारयेत् आशिषि णि
लोपः कार्यात् अकारयीत् णिश्रिद्रुस्रुभ्यः कर्तरि चङिति सेश्चङादेशः चकारश्चङीति
विशेषणार्थः णिलोपः णौ चङ्युपधाया ह्रस्वः चङीति द्विवचनम् सन्वल्लघुनि चङ्परेऽना
ग्लोपे इति सन्भावात् सन्यतः इतीत्वम् दीर्घो लघोरिति दीर्घः लङ् अचीकरत् अजीहरत् अपी
पचत् अपीपठत् तः उत्परे इति वाचनज्ञापकं णौस्यानिवद्भावस्य ओः पुयण्ज्यपरे इ
तीत्वं दीर्घो लघोरिति दीर्घः अबीभवत् अलीलवत् अपीपवत् अजीजवत् स्रव
तिशृणोति द्रवति प्रवति प्लवति च्यवतीनां वेति इत्वम् असिस्रवत् असुस्रवत् असिद्र
वत् अपिप्रवत् अपिप्लवत् अशिश्रवत् न वा भवति असुस्रवत् अशुश्रवत् अपुप्लु
वत् अचुच्यवत् अदुद्रवत् अपुप्रवत् णौ च संश्चङोरिति विभाषा संप्रसारणमिति
धातोः संप्रसारणम् अभावस्य वेति नित्यं संप्रसारणम् अशूशवत् तस्मात् ह्यस्तन

© Dharmartha Trust J&K. Digitized by eGangotri

तृ॰
पा॰
१४३
143

अस्मृदृत्वरप्रथम्रदस्तृस्पशामित्यत्वम् अभ्यासस्य असस्मरत् अददरत् अतत्वरत् अपप्रथत् अम
म्रदत् अतस्तरत् अपस्पशत् वेष्ट वेष्टने चेष्ट चेष्टायाम् विभाषा वेष्टिचेष्ट्योरिति अत्त्वं वा
ति अववेष्टत् अविवेष्टत् अचचेष्टत् अचिचेष्टत् गण संख्याने ई च गण इति अभ्यासस्य
ईकारादेशः अजीगणत् अजगणत् अग्लोपी नास्ति सर्वेश्राव: अजगणत् अचकाणत् व
र्ड्प्सायां अववर्धत् इङ् णौ च संश्चङोरिति गाङादेशः अध्यजीगपत् अध्यापिपत् अजादेर्द्विती
यस्येति द्विवचनम् अटिटत् न न्द्राः संयोगादयो न भवति: माटिटत् मा भवानटिटत् न न्द्राः
संयोगादयः नकार दकार रेफाः संयोगादयो न द्विर्भवन्ति उन्दी क्लेदने औन्दिदत् अड्ड अभि
योगे आड्डिडत् अर्च पूजायां आर्चिचत् उरृत् ऋकारस्य ऋकारः स्यात् उपधाया णौ चङ्युपधाया इति
णौ चङ्युपधाया ह्रस्वं भवति अवीवृतत् अववर्तत् शास अनुशिष्टौ एकवचने याचृ
याच्ञायाम् चङ्युपधाया ह्रस्वः नाग्लोपिशास्वृदितामिति निषेधात् अशशासत् अय
याचत् अविवपत् अडुढौकत् भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्यामित्युपधाह्र
स्वः अबिभ्रजत् अबभ्राजत् अबीभसत् अबभासत् अबीभषत् अबभाषत् अदीदिप
पत् अदिदीपत् अजीजिवत् अजिजीवत् अमीमिलत् अमिमीलत् अपीपिडत् अपिपीडत् ....। ॐ
पः पिबतीरीर्वाभ्यासस्य अपीप्यत् अपीप्यताम् अपीप्यन् तिष्ठतेरित् अतिष्ठिपत् जि

© Dharmartha Trust J&K. Digitized by eGangotri

घ्रानेवा अजिघ्रपत् विएमवकर्मणोः अकारि ग्रहादिवद्भिवचनात् अत्पतिमिजेव भवति अ
कृषाणाम् इत्यादि गुचिणोः प्रतिषेधे णिश्चि ग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसं
ख्यानं इति कर्मकर्तरि णपंतात्सि प्रतिषेधः णिचि प्रतिषेधः प्रतिषिद्धे चङ् भवति अ
चीकरत् नः कटः स्वयमेव ॥ एवं णपत्र्ना ॥ एपमनंतोवक्तव्यः ॥ कारयितुमिच्छतीति म
न्तुहिवचनम् चिकारयिषति जिहारयिषति पिपालयिषति ओः पयज्ञपरे इति इत्वे
पिपावयिषति लिलावयिषति विभावयिषति विभाषश्वेः संप्रसारणम् शिश्वाययिष
ति शुशावयिषति णौ च संश्चङोरिति विभाषा गाङादेशः अधिजिगापयति आध्यापिपयि
षति वा टि अध्यापि गापयिषत् यङ्न्तात्मनः लोलूयिषते बोभूयिषते बोभूयिषते अलो
लूयिषत अबोभूयिषत यस्य हल इति यकारलोपः पापाचिषते अपापचिषत इत्यादि म
नंतात्संता: बुभूषयिषति अबुभूषयिषत् इत्यादि ॥ यङ्न्तात्सिपणौ बोभूययति अबोभूय
यत् यस्य हल इति यकारलोपः पापचयति अपपाचयत् एपनात्सि चुरा [illegible] इति णिः
लोपः भावयति अबीभवत् पथयति पादि थत् पाचयति अपीपचत् इत्यादि शेषिकान्सन्तथ
थौ या [illegible] विकल्पोत्तर्थो [illegible]: सद्रूप: प्रत्ययान्तेषु: सनन्तान्न सन्निष्यते इच्छासनन्तात्त
भवति एकस्यां क्रियायामिच्छाद्वयस्यासंभवात् बुभूषितुमिच्छतीत्यादिवाक्यमप्रयो

© Dharmartha Trust J&K. Digitized by eGangotri

दं॰ पा॰ १५५ 155

गार्हमेवणिचाव्यवधानेनसंभवति क्रियाभेदात् ग्रधिवुभूषयिषति पधिषयिषति पिपतयि
षति इत्यादि यङंतएवंनात्मन् बिभावयिषयिषति यङंतएवंन सनंत एवंनात्मन्बोभूययिष
यिषति इत्यादि सर्वत्रसंभावात्मनीत्यसर्वमत्रनयम् ॥ अथ सन्नाद्यानवउच्यंते ॥ पुत्रमिच्छु
तीत्यादिवाक्येकर्मणोद्वितीयेति द्वितीयायाविभक्तेरेकवचनम् सुप आत्मनः क्यच् एषित
रेवात्मनसंबंधिनः कर्मणः सुबंताद् इच्छायामर्थेवाक्यच्प्रत्ययोभवति पुत्रमात्मन इच्छ
तीत्यर्थः स्मिन्नर्थे सुपोधातुप्रातिपदिकयोरिति सुपोलुक् क्यचि प्रत्ययेपरतः अवर्णांत
स्यांगस्य ईकारादेशोभवति ककारः क्यच्कास्यजोसामान्यग्रहणार्थः सनाद्यंताधातवः
इति धातुसंज्ञायां ततोलडादयः पुत्रीयति पुत्रमात्मन इच्छतीत्यर्थः एवं पटीयति आचा
रीयति कंबलीयति वृक्षीयति नः क्यचि इति क्यच्क्यङ्क्यजोसामान्यग्रहणम् नकारांतेन श
ब्दरूपंक्येपरतः पदसंज्ञंभवति नलोपः प्रातिपदिकान्तस्य इति नलोपः एवंत्रासिद्धानलो
पः सुप्स्वरसंज्ञातुग्विधिषु कृति इति नियमादीत्वे राजीयति सामीयति तनीयति अत्ववी
रवृषलवणानामात्मप्रीतौ क्यचि असुगागमः अश्ववृषयोर्मैथुनेच्छायाम् अश्वमिच्छति
वडवा अश्वस्यति वृषस्यति गौः अन्यत्र अश्वीयति वृषीयति क्षीरलवणयोर्लालसायां क्षीर
मिच्छति क्षीरस्यति माणवकः लवणमिच्छति लवणस्यति गौः अन्यत्र क्षीरीयति लवणीय

डो.

© Dharmartha Trust J&K. Digitized by eGangotri

तिसर्वंप्रातिपदिकानामसुग्वक्तव्यः दध्यस्यति मध्वस्यति सुक्चवक्तव्यः दधिस्यति मधुस्यति अ
कृत्सार्वधातुकयोर्दीर्घः कवीयति तथा मत्रीयति रैयति एचोयवायावः वांतो य प्रत्यये योयमे
वस्थाने वांतो यकारादौ प्रत्यये परतः भवति गव्यति नाव्यति लाव्यति स्वत्यति सरित्यति पत
त्र्यति वच्यति तन्यति पतत्यति वरुस्यति अस्त्यति त्वमावेकवचने प्रत्ययोत्तरपदयोरपद
योश्च प्रत्ययेऽन्तरपदे च एकवचने युष्मदस्मदोर्मपर्यन्तयोः त्वमइत्येतावादेशौ भवतः इच्छ
मिसद्यति हलिचेति दीर्घः गीर्यति दीव्यति इत्यादि क्यचि मान्ताव्ययानां प्रतिषेधो वक्तव्यः
किमिच्छति इदमिच्छति स्वरिच्छति नीचैरिच्छतीत्यादि अतो लोपः यस्य हलः क्यस्य वि
भाषा हल उत्तरस्य क्यस्य आर्धधातुके परतः लोपो भवति विकल्पेन अवाचीत् अवाचीयीत् ॥
काम्यच्च ॥ सुबन्तात्कर्मण आत्मेच्छायां वा काम्यच् प्रत्ययो भवति ककारस्येत्संज्ञा लोपः प्र
योजनाभावान्न भवति शेषं समानम् पुत्रकाम्यति धनकाम्यति राजकाम्यति कविकाम्य
ति यत्काम्यति तत्काम्यति इत्यादि अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु अशना
योऽभिनिपात्यते बुभुक्षा चेद्भवति अशनायति अन्यत्र अशनीयति उदकमिच्छति तदन्यादेशः
पिपासा चेत् उदन्यति अन्यत्र उदकीयति धनमिच्छति धनायति गर्धश्चेत् अन्यत्र धनीयति
उपमानादाचारे ॥ क्यजनुवर्तते उपमानात्कर्मणः सुबन्तादाचारेऽर्थे क्यच्प्रत्ययो भवति

© Dharmartha Trust J&K. Digitized by eGangotri

दे॰
पा॰
१४५
145

पुत्रमिवाचरति छात्रमाचार्यः पुत्रीयति राजीयति सचेकः मालीयति किं मालयमित्यादि
अधिकरणाच्चेति वक्तव्यं प्रासादे इवाचरति प्रासादीयति कुट्यामश्रश्री इति वृषभे वृषभेयति
रज्जौ सर्पीयति कुमारादित्यादि ॥ कर्तुः क्यङ् सलोपश्च ॥ उपमानात्कर्तुः सुबन्तादाचारेऽर्थे क्य
ङ्प्रत्ययो भवति सकारस्य च लोपः सूर्यइवाचरति अकृत्सार्वधातुकयोर्दीर्घः सूर्यायते चं
द्रः चंद्रायते भानुः राजायते मात्यः दंतीयते श्वः कवीयते वैयाकरणः गरुडायते पित्रीयते पि
त्रीयते वप्नमानिनोश्च क्यङि मानिनि च स्त्रियाः भाषितपुंस्कादनूङः पुंवद्भावो भवति कुमा
रीइवाचरति उन्मायते वृद्धा तरुणायते जीर्णा वधूयते बाला बालायते वधूः स्तनायते का
कः नयते घयते इष्यते मयते इत्यादि सुबन्तसलोपः ओजाप्सरायते पयसो नित्यं पयायते पय
स्यते इत्यादि अत्र द्विः सर्वप्रातिपदिकेभ्य इत्येके वरक्तस्येन लोपः अश्वति गर्दभः गर्दभति
अश्वः हंसति काकः इत्यादि ॥ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥ भृश इत्येवमादिभ्यः प्राति
पदिकेभ्यः अच्व्यन्तेभ्यो भवत्यर्थे क्यङ्प्रत्ययो भवति अभृशो भृशो भवति भृशायते शीघ्राय
ते पंडितायते हलो लोपः उन्मनायते महायते सुमनायते दुर्मनायते ॥ लोहितादिडाज्भ्यः
क्यष् लोहितादिभ्यो डाजन्तेभ्यश्च अच्व्यन्तेभ्यो भवत्यर्थे क्यष्प्रत्ययो भवति वा क्यषः ॥ क्यषन्ता
नो वा परस्मैपदं भवति लोहितायति लोहितायते कर्मायति कर्मायते नीलहरितमन्दाः इत्यादः का

© Dharmartha Trust J&K. Digitized by eGangotri

ङिष्यते नीलायते फेनायते सर्वायते डाजंतेभ्यः अव्यक्तानुकारणाद्व्यजवरार्द्धादनितौ
डाच् इति डाच् डाचि बहुलं द्वे भवतः इति द्विर्वचनम् तस्यैवर्त्वः प्रागेव भवति डाची
ति विषयसप्तमीत्वात् तस्य परमाम्रेडितस्य संज्ञायां नित्यमाम्रेडिते डिति टे चेति पररूपत्वम्
टिलोपः पटपटायति पटपटायते सिमिसिमायते सिमिसिमायते ख्मख्मायते ख्म
ख्मायते टमटमायति टमटमायते नमोवरिवश्चित्रङः क्यच् नमस्वरिवस् चित्रङ्
इत्येतेभ्यः क्यच् प्रत्ययो भवति करणविशेषेण नमः पूजायां नमस्यति देवान् वरिवसः
परिचर्यायाम् ------- चित्रङ आश्चर्ये चित्रीयते कष्टाय क्रमणे क्यङ् प्रत्ययो
भवति कष्टायते यथा नेव कष्टायति सत्रकक्षकृच्छ्रगहनेभ्यः पापचिकीर्षायाम् क्यङ्
सत्रायते कक्षायते कृच्छ्रायते गहनायते कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः रोमन्थं वर्त्त
यति रोमन्थायते तपश्चरति तपस्यति तपसः परस्मैपदं च बाष्पोष्मभ्यामुद्वमने क्यङ्
बाष्पमुद्वमति बाष्पायते बाष्पायति ऊष्माणमुद्वमति ऊष्मायते उद्वमनार्थे धातव
योऽर्थः धूमाच्चेति वक्तव्यम् धूममुद्वमति धूमायते फेनाच्च फेनमुद्वमति फेनायते
शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे क्यङ् शब्दं करोति शब्दायते वैरायते कलहा
यते अभ्रायते कण्वायते मेघायते सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् सुदिनम् करो

© Dharmartha Trust J&K. Digitized by eGangotri

रोति मुदिनायते सुदिनायते नीहारायते अट्टाटाशीकाकोटापोटासोटाप्रुष्वानां ग्रहणमिति
वक्तव्यं अटायते अट्टायते शीकायते कोटायते पोटायते प्रुष्वायते सुखादिभ्यः कर्तृवेदना
यां कर्तृग्रहणं वेदयते सुखायते दुःखायते तृप्रायते कृच्छ्रायते अस्रायते करुणाय
ते नमोवरिवश्चित्रङः क्यङ् उक्तान्युदाहरणानि पुच्छभाण्डचीवराण्णिङ् चीवरादर्जने
परिधाने वा संचीवरायते भिक्षुः चीवरयते मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृतू
स्तेभ्यो णिच् मुण्डं मुण्डं करोति मुण्डयति मिश्रयति श्लक्ष्णयति लवणयति व्रताद्भो
जने तन्निवृत्तौ च पयोव्रतयति शूद्रान्नं व्रतयति वस्त्रात्समाच्छादने संवस्त्रयति
हलं गृह्णाति हलयति कलयति कृतं करोति कृतयति तूस्तानि वहति तूस्तयति तूस्तानि
वहति वितूस्तयति केशान्विश्लिष्टीकरोतीत्यर्थः सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वच
वर्मवर्णचूर्णचुरादिभ्यो णिच् सत्यापार्थवेदानामापुग्वक्तव्यः सत्यमाचष्टे सत्यापयति
अर्थापयति विवेदापयति पाशयति रूपादर्शने रूपं पश्यति रूपयति वीणयोपगायति
उपवीणयति तूलैरवकुष्णाति अवतूलयति श्लोकैरुपस्तौति उपश्लोकयति सेनया
अभियाति स्यात्सेनसेधसेति षत्वं अभिषेणयति लोमान्यनुमार्ष्टि अनुलोमयति त्वचं
गृह्णाति त्वचयति अकारान्तत्वनिपातनं प्रस्य रूपटिलोपो माभूत् इति च प्रकृतौ

उ॰

काजिति प्रकृतिभावः नन्वेवमपि उपधाया वृद्धिप्रसंगः तस्मादेकाचो नवृद्धिनिपातनं समर्थयति:
वर्मणा संनह्यति संवर्मयति वर्णं गृह्णाति संवर्णयति चूर्णैन विध्वंसयति चूर्णयति स्तवेङः
खेन क्रियायां स्तवं करोति स्तवयति ङः खेयति हस्तपादान्निरसने हस्तेन निरस्यति प्रपहस्त
यति पादेन निरस्यति निष्पादयति श्वेताश्वाश्वतरगालोडिताह्वरकाणां पञ्च ॥ तरेतक लोपः
श्व श्वेताश्वमाचष्टे श्वेताश्वमस्व लोपः श्वेतयति अश्वतरस्य तर लोपः अश्वतरमाचष्टे अश्वय
ति गालोडितस्य इत लोपः गालोडितमाचष्टे गालोडयति आह्वरकस्य क लोपः आह्वरकमाच
ष्टे आह्वरयति लघुं करोति लघुं करोति तदाचष्टे तत्करोति इति णिच् णाविष्ठवत्प्रातिपदिक
स्येति टिलोपः अचः परस्मिन्पूर्वविधाविति प्रकृते आदेशः परनिमित्तकः पूर्वस्य विधौ कार्ये कर्त
व्ये स्थानिवद्भवति अस्य स्थानिवत्त्वाद्वृद्धिर्न भवति लघयति पटयति स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रा
णां यणादिपरं पूर्वस्य च गुणः स्थूलादीनां परं यणादि शब्दरूपं लुप्यते पूर्वस्य च गुणो भवति स्थू
ले स्थूलमाचष्टे स्थवयति दूरमाचष्टे दवयति क्षेपयति क्षोदयति प्रियस्थिरस्फिरोरुबहुल
गुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रपद्राघिवृन्दाः प्रियस्थिरस्फिरोरुबहु
लगुरुवृद्धतृप्रदीर्घवृन्दारका इत्येतेषां प्र। स्थ। स्फ। वर्। बंहि। गर्। वर्षि। त्रप्। द्राघि। वृन्द इत्येते
आदेशा भवन्ति यथासंख्येन प्रियं करोति प्रियस्य प्रइत्ययमादेशो भवति प्रापयति प्रकृत्यैकाजिति प्रकृ

© Dharmartha Trust J&K. Digitized by eGangotri

६६ वृ॰ पा॰ १४७ 147

तिभावः यंत्रवासिंनीतिवृद्धिः प्रतिक्षेभ्यादिना तुक आपयति स्थिरं करोति स्थापयति स्फापय-
ति वारयति गुरुं करोति गरयति बहुलमाचष्टे करोति वा बंहयति गरयतीत्यत्र वृद्धिर्न भवति
वृद्धिर्न भवति बहोर्लोपो भू च बहोः इष्ठस्य यिट् चेति न भवति अत्र वृद्धिर्न भवति अंग वृन्ने-
त्युन हृन्नाव विधिर्निषिद्धस्येति प्रप्रयोगार्हं पृथ्वशाह्वः प्रथयते पृथुं करोति वर्षयति त्रपय
ति म्रादयति मृदयति प्रतिवा बाढयोर्नेदसाधौ ॥ अन्तिकमाचष्टे नेदयति बाढमाचष्टे सा-
धयति बहोर्लोपो भू च बहोः बहुलमिष्ठवच्चेति वचनादिष्ठस्य यिट् चेति न भवति भावय
ति दृढं माचष्टे रक्ततो हलादेर्लघोरिति रत्वम् ऋकारस्य रेफो भवति प्रथयति म्रदयति द्र-
ढयति व्रढयति दृढयति परिव्रढयति कण्ड्वादिभ्यो यक कण्ड्वादिभ्यो यक प्रत्ययो
भवति द्विधाः कण्ड्वादयो धातवः प्रातिपदिकानि च धात्वधिकारात्तेभ्यः प्रत्ययो विधीयते
न प्रातिपदिकेभ्यः कण्डूं करोति कण्डूयते इति कण्डूयते कण्डूयति मन्तूवन्तुः असूञ् असूयते अ-
सूयति महीयति अतो लोपः आव्यतीत्यादयः कमेर्णिङ् कामयते इत्यादि तथा कर्जनात्ति-
न् द्विवचनमेकाचो यथेष्टं नामधातूनां वचनाच्च पुत्रीयियिषति पुत्रीयियिषति अशिश्वीयि-
षति अश्वीयियिषति इत्यादि आयादय आर्धधातुके वा आर्धधातुकविवक्षायाम् आयाद-
यः प्रत्यया वा भवन्ति कामिता कामयिता इत्यादि यं जनादित्वे पुत्रीययति राजीययति शब्दा-

ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

नीययति कणीययति इत्यादिकं ड्डययति शोस्य विभाषा उच्यते मलाययति तथा कामयती

त्यादि तथा च लुङ् अचुचुरीयत् अजगणीयत् अजह्मणीयत् इत्यादि सर्वं लकारभसवि

स्तारमावर्तनीयाः ॥ इति कण्ड्वादयः समाप्ताः ॥ लङ् भूते इत्येव भूते ध्वंवर्तमानाद्धातोर्लङ्

प्रत्ययो भवति अवारोहत् अहरत् वलाहि निर्देशः किमर्थः अद्य स्थोमहि व्यामिश्रनाद्यं

नुपरोक्षे लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः अरुणद्यवनः साकेतम् अरुणद्

यवनो माध्यमिकान् परोक्षे इति किं महत्वाद्यचिन्तः लोकाविज्ञाते इति किं चकार कटं देव

दत्तः प्रयोक्तुर्दर्शनविषये इति किं जघान कंसं किल वासुदेवः अभिज्ञावचने लृट् ॥ अ

भिज्ञा स्मृतिः तद्वचने उपपदे अनद्यतने भूते लृट् प्रत्ययो भवति लङोपवादः अभिजा

नासि देवदत्त कश्मीरेषु वत्स्यामः अभिजानासि देवदत्त मगधेषु वत्स्यामः वचनग्रहणं

पर्यायार्थं अभिजानासि स्मरसि बुध्यसे चेतयसे इत्यादि ॥ न यदि ॥ यच्छब्देन सहिते अ

भिज्ञावचने उपपदे लृट् प्रत्ययो न भवति पूर्वेण प्राप्तः प्रतिषिध्यते अभिजानासि देवद

त्त यत्कश्मीरेष्ववसाम वसना वस्तार्थेन नुपरं किंचिल्लक्ष्यते विभाषा साकांक्षे ॥ यदीति

नानुवर्तते उभयत्र विभाषेयम् अभिज्ञावचने उपपदे यच्छब्दसहिते केवले च विभाषा

लृट् प्रत्ययो भवति साकांक्षा चेत् प्रयोक्ता लक्षणलक्ष्ययोः संबन्धे च प्रयोक्ता साकांक्षाभ

© Dharmartha Trust J&K. Digitized by eGangotri

वति अभिजानासिदेवदत्तकश्मीरेषुवसाम तत्रौदनमभुंज्महियद्दिवाल्वपि अभिजानासि
सिदेवदत्तयत्कश्मीरेषुवसामातत्रौदनमभुंज्महिवाभोल्लत्तांभोजनंलत्पम्परोक्षेलि
ट् भूतानद्यतनेपरोक्षेऽर्थेवर्तमानाद्धातोः लिट्प्रत्ययोभवतिननुचधात्वर्थः परोक्षः सर्व
सत्यमेतत् अस्तितुलोकेप्रत्यक्षाभिमानः सर्वं च तु नास्तितत्परोक्षमित्युच्यते चकारग्र
हणात्तत्तमाविषयेऽपिविज्ञेयामतेपात्परोक्षतामस्त्येवतस्यथास्त्रमोऽहं कलिंगान्जगामनाहं
दक्षिणापथंप्रविवेशहं हगम्हस्यतोऽप्यट्च भूतानद्यतनेपरोक्षे इतिलिटिप्राप्तेहशश्वतो
रुपस्थयोः चङ्प्रत्ययोभवतिचकाराल्लिट्चइतिह्याकरोत् इतिहचकारशश्वदकरोत्
शश्वच्चकारप्रश्नेचासन्नकाले भूतानद्यतनेपरोक्षेइतिवर्ततेतस्यविशेषमेवदृष्टव्यः प्रश्न
आसन्नकालेपृच्छ्यमानेऽर्थेभूतानद्यतनेपरोक्षेवर्तमानाद्धातोर्लङ्लिटौप्रत्ययौभवतः क
ञ्चित्कञ्चित्पृच्छतिअगच्छद्देवदत्तः जगामदेवदत्तः आसन्नकालेइतिनकिंभवंतंपृच्छामि
जघानकंसंकिलवासुदेवः ॥ लट्स्मे ॥ भूतानद्यतनेऽर्थेवर्तमानाद्धातोर्लट्प्रत्ययोभ
वतिस्मशब्दउपपदे एवंस्मपिताब्रवीतिएवंस्मउपाध्यायः कथयतिननौपृष्टप्रतिवचने
अनद्यतनपरोक्षेइतिनिवृत्तं भूतसामान्येनिपिरवम्ननुशब्दउपपदेप्रश्नपूर्वकेप्रति
वचनेगम्यमानेभूते लट्प्रत्ययोभवतिलटोऽपवादः अकार्षीःकटंदेवदत्त ननुकरोमिभोः

© Dharmartha Trust J&K. Digitized by eGangotri

अवोचस्त्वं किंचित्त्वं देवदत्त ननु ब्रवीमि भोः पृष्टप्रतिवचने इति किं नन्वकार्षीन्माण
वकः नन्वोर्विभाषा ननुशब्दे उपपदे पृष्टप्रतिवचने गम्यमाने विभाषा लट् प्रत्ययः अका
र्षीः कटं देवदत्त न करोमि भोः नाकार्षम् अहं नु करोमि अन्वकार्षम् अन्वकार्षम् परिल
ङ् चास्मे ॥ अनद्यतनमिह मंडूकप्लुत्यानुवर्तते पुराशब्दे उपपदे स्मशब्दवर्जिते भूतान
द्यतने विभाषा लुङ् प्रत्ययो भवति लट् च ताभ्यां मुक्ते यथाविषयमन्योपि प्रत्ययो भवति वत्सा
रः इह पुरा छात्राः अस्मे इति किं नडेन स्म पुराधीयते वर्तमाने लट् प्रारब्धोपरि
समाप्तश्च वर्तमानः कालः वर्तमानेर्थे वर्तमानाद्धातोः लट् प्रत्ययो भवति पचति नय
ति यावत्पुरानिपातयोर्लट् प्रत्ययो भवति इत्येव यावत्पुराशब्दयोः निपातयोः उपप
दयोः भविष्यति काले धातोर्लट् प्रत्ययो भवति यावद्भुंक्ते पुरा भुंक्ते निपातयोरिति किम् ।
यावद्दास्यति तावद्भोक्ष्यते करणभूतया पुरा व्रजिष्यति विभाषा कदाकर्ह्योः कदाकर्हि
इत्येतयोः भविष्यति काले विभाषा लट् प्रत्ययो भवति कदा भुंक्ते कदा भोक्ष्यते कदा भोक्ता
कर्हि भुंक्ते कर्हि भोक्ष्यते कर्हि भोक्ता किंवृत्ते लिप्सायां विभाषेति वर्तते किमो वृत्तं किंवृत्तं तद्
ग्रहणेन विभक्त्यन्तरम् प्रतीयात् न च डतरडतमौ चेति परिसंख्यानं स्मर्यते किंवृत्ते उ
पपदे लिप्सायां गम्यमानायां भविष्यति काले विभाषा लट् प्रत्ययो भवति लब्धुमिच्छा लि

© Dharmartha Trust J&K. Digitized by eGangotri

२५ वृ॰ पा॰ १४९

स्यां प्रार्थनायामभिलाषः कं भवन्तो भोजयन्ति कं भवन्तो भोजयिष्यन्तीति काले विभाषा लट्प्रत्य
यो भवति लब्धुमिच्छा लिप्सा प्रार्थनायामभिलाषः कं भवन्तो भोजयिष्यन्ति कं भवन्तो भोजयि
तारः लब्धुकामः पृच्छति कान्नरः भिक्षां ददाति दास्यति दाता वा लिप्सायामिति किं वः प
रलिप्सुं गमिष्यति लिप्स्यमानः सिद्धौ च विभाषेत्येव लिप्स्यमानात्सिद्धिः लिप्स्यमानसि
द्धिः तस्यां गम्यमानायां भविष्यति काले विभाषा लट्प्रत्ययो भवति यः किं हृतार्थे आरंभः२
अर्थिने यो भक्तं ददाति नाम स्वर्गं गंता लिप्स्यमानान्नदानात्स्वर्गसिद्धमावर्तमाने दाता दास्यो२
ददाति ले इत्थं लक्षणे च ॥ लोडर्थलक्षणे प्रैषादिः सलक्ष्यते येन धात्वर्थेन स लो२
डर्थलक्षणो धात्वर्थः तस्मिन्वर्तमानाद्धातोः भविष्यति काले विभाषा लट्प्रत्ययो भव
ति उपाध्यायश्चेदागच्छति उपाध्यायश्चेदागमिष्यति उपाध्यायश्चेदागंता अथ त्वं छंदोऽधी
ष्व अथ त्वं छंदोऽधीष्व अथ त्वं व्याकरणमधीष्व उपाध्यायागमनमध्ययनप्रैषस्य लक्ष
णं लिङ् चोर्ध्वमौहूर्तिके भविष्यतीत्यनुवर्तते विभाषा लोडर्थलक्षणे इति च ॥ ऊर्ध्वमौ२
हूर्तिके भविष्यति काले लोडर्थलक्षणे वर्तमानाद्धातोः लिङ्प्रत्ययो भवति चकाराल्लिट्
च विभाषा ऊर्ध्वं मुहूर्ताद्भवति ऊर्ध्वमौहूर्तिकः निपातनात्समासः उत्तरपदवृद्धिश्च भवि
ष्यतश्चेन्न हि शेषाणाम् ऊर्ध्वमौहूर्तिका उपरिमुहूर्तस्य उपाध्यायश्चेदागच्छेत् उपाध्यायश्चे ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

ह्यागमिष्यति उपाध्यायश्चेदागतो ग्रथो त्वं छंदो धीष्व अथ त्वं व्याकरणमधीष्व वर्तमान
सामीप्येच ॥ वर्तमानाद्वा समीपोऽमीव सामीप्यन्तु एष्यं ह्यः स्वार्थिकः त्वं व्याप्यते चतुर्वर्णा
दिसिद्ध्यर्थम् वर्तमानसामीप्ये भूते भविष्यति च यथा तथैव वर्तमानाद्वा तो विभाषा वर्तमान
वत्प्रत्यया भवंति वर्तमाने लडित्यादयः प्रत्यया वड गणास्थो बहुलमिति वर्तमानप्रत्ययाऽऽगता
लेभूतभविष्यते विधीयते कदा देवदत्तागतोऽसि एषद्यागच्छामि आगच्छन्तमेवमां विद्धि र
ग्रयमागमनमुपेषोः स्यागतः कदा देवदत्तागमिष्यति एषगच्छामि गच्छन्तं त्वं मां विद्धि गमि
ष्यामि गन्तास्मि वत्करणं साहचर्यार्थं येन विशेषणेन वर्तमाने प्रत्यया विहिता एव ह्यास्तु
पपदादिनानथैवात्रत्तवर्ति पवमानः यजमानः अलंकारिष्णुः सामीप्यग्रहणमिति
किम् विप्रकर्षविवक्षायां माभूत् एकवर्गच्छत्यादलिपुत्रं वर्षेणागमिष्यति यो मन्य
ते गच्छामीति पदं वर्तमाने एव काले वर्तते कालांतरगतिस्तु वाक्यान्तरागृवतिनव
वा वाक्यगम्यः कालपदसंस्कारस्तु ज्यते ना हस्यं वाक्यार्थं तु प्रतिपत्तिपक्षा संप्रतिकारण
मिदम् नारंभणीयमेव तथा च कारिष्यति वर्षेणागमिष्यतीति सर्वं सुपपद्यत एव आशं
सायां भूतवच्च लत्येव वर्तमानसामीप्ये इव वर्तते आशंसनमाशंसा अप्राप्तस्य क्रिया
ये स्य प्राप्तुमिच्छा तस्यां च भविष्यत्कालो विषयस्तत्र भविष्यति काले आशंसायां

© Dharmartha Trust J&K. Digitized by eGangotri

६६ तृ॰ पा॰ १५०
150

गम्यमानायां विभाषा भूतवत्प्रत्यया भवन्ति चकाद्गृहद्वमानवच्च उपाध्यायश्चेदागमि-
ष्यति उपाध्यायश्चेदागमत् उपाध्यायश्चेदागतः एते व्याकरणमधीमहे अध्यैषामहे
अध्यगीष्महे ॥ एतद्व्याकरणमधीतम् सामान्यातिदेशे विशेषानतिदेशः तेन लिङ्लिटौ
न भवतः आशंसायामिति किम् आगमिष्यति क्षिप्रवचने लृट् आशंसायामित्येवाति
प्रवचने उपपदे आशंसायां गम्यमानायां लृट्प्रत्ययो भवति भूतवच्चेत्यस्यापवादः उ-
पाध्यायश्चेत्क्षिप्रमागमिष्यति एते व्याकरणमध्येष्यामहे वचनग्रहणं पर्यायार्थम् शी-
घ्रमाशु त्वरितमध्येष्यामहे इति कर्त्तव्यं लृड्ग्रहणं लङो ऽपि विषये यथा स्यात् इति क्षि-
प्रमध्येष्यामहे आशंसावचने लिङ् आशंसा उच्यते येन तदाशंसावचनम् तस्मिन्नु-
पपदे लिङ्प्रत्ययो भवति भूतवच्चेत्यस्यापवादः उपाध्यायश्चेदागच्छेत् आशंसे युक्तो-
ऽधीयीय आशंसे अधीयीय आशंसे अधीयीयानानद्यतनवत्क्रियाप्रबंधसामीप्ययोः भूता-
नद्यतने भविष्यदनद्यतने च लङ्लुटौ विहितौ तयोः प्रतिषेधः अनद्यतनवत्प्रत्ययवि-
धिर्न भवति क्रियाद्वमा(मी)प्ये च गम्यमाने क्रियाप्रबंधः सातत्येनानिष्ठानं देशकालानां सामी-
प्यमतितुल्यजातीयेनाव्यवधानं यावज्जीवं पुत्रोऽध्यापिपयिष्यति सामीप्ये वल्लपियं येपौर्णमा
स्यतिक्रान्ता तस्यामुपाध्यायो ऽग्नीनाधित सोमेनायष्ट गामदत्त येयममावास्यागामिनी ३॰

© Dharmartha Trust J&K. Digitized by eGangotri

नस्यांउपाध्यायोग्नीनाधास्यति सोमेन यक्ष्यति भवांदास्यति द्वौ प्रतिषेधौ यथा आम
स्यात्यनुज्ञायते विष्यति मर्यादावचनेवरस्मिन् ॥ अनद्यतनवदिति वर्त्तते प्रक्रियार्थे
सामीप्यार्थे वचनम् भविष्यति काले सति अवरस्मिन्विभागे अनद्यतनवत्प्रत्ययवि
धिर्न भवति योयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भो
क्ष्यामहे तत्र सक्तून्पास्यामः अवरस्मिन्निति किम् योयमध्वा गन्तव्य आपाटलिपु
त्रात्तस्य यः परं कौशाम्ब्याः तत्र द्विरोदनं भोक्ष्यामहे तत्र सक्तून्पास्यामः ॥ इह सू
त्रे देशात्मका मर्यादा उत्तरत्र कालकृता कालविभागे चानहोरात्राणाम् ॥ भविष्यति म
र्यादावचने वरस्मिन्निति सर्वमनुवर्त्तते कालमर्यादायां विभागे सति अवरस्मिन्
विभागे भविष्यति काले अनद्यतनवत्प्रत्ययविधिर्न भवति न चेदहोरात्राणां संबन्धी स
विभागः तेषां च स विभागे प्रतिषेधः तैरहोरात्रैः कालवाचिनः प्रतिषेधः पूर्वेणैव सि
द्धे वचनमहोरात्रप्रतिषेधार्थम् योगविभाग उत्तरार्थः योयं संवत्सर आगाम्युत्तरस्य
यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे तत्रौदनं भोक्ष्यामहे भविष्यतीत्येव यो
यं संवत्सरोतीतस्तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येताः स्म हे तत्रौदनं भोक्ता
स्महे अवरस्मिन्नित्येव परस्मिन्विभाषां वक्ष्यति अहोरात्राणामिति किं त्रिंशद्विवधस्तुत्या

© Dharmartha Trust J&K. Digitized by eGangotri

५२

इं॰ पा॰ १४८ 151

हरणां योऽयं मास आगामी तस्य योऽवरः पंचदशरात्रस्तत्र युक्ता अध्येतास्महे तत्र सक्तून्
पातास्मः सर्वस्याहोरात्रस्यायं प्रतिषेधः परस्मिन्विभाषा भविष्यति मर्यादावचने का
लविभागेऽनहोरात्राणामिति वर्तते कालमर्यादाविभागे सति भविष्यति काले परस्मि
न्विभागे विभाषा अनद्यतनवत्प्रत्ययविधिः न भवति न चेदहोरात्रसंबंधी प्रविभागः अ
वरस्मिन्पूर्वेण प्रतिषेध उक्तः संप्रति परस्मिन्नप्राप्ते विकल्प उच्यते योऽयं संवत्सर आ
गामी तस्य यत्परमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे तत्र युक्ता अध्येतास्महे तत्र सक्तून्पा
स्यामः तत्र सक्तून्पातास्मः भविष्यतीत्येव योऽयं संवत्सरो गतस्तस्य यत्परमाग्रहायण्या
मर्यादावचन इत्येव योऽयमित्येव योऽयं निरवधिः काल आगामी तस्य परं यदाग्रहाय
ण्याः कालविभाग इत्येव योऽयमध्वा गन्तव्य आ पाटलिपुत्रात्तस्य यत्परं कौशाम्ब्या इति
सर्वत्रानद्यतनवत्प्रत्ययानुदाहार्याः ॥ लिङ्निमित्ते लृङ् क्रियातिपत्तौ भविष्यतीत्यनु
वर्तते हेतुहेतुमतोर्लिङित्येवमादिकं लिङो निमित्तं तत्र लिङ्निमित्ते भविष्यति काले
लृङ्प्रत्ययो भवति क्रियातिपत्तौ सत्याम् कुतश्चिद्वैगुण्यादनभिनिर्वृत्तिः क्रियायाः क्रि
यातिपत्तिः दक्षिणेन चेदायास्यन्न शकटं पर्याभविष्यत् यदि कमलकमाह्वास्यन्न शकटं
स्य पर्याभवनं लप्स्यते अभोक्ष्यत भवान्घृतेन यदि मत्समीपे आसिष्यत भविष्यत्वे डं॰

© Dharmartha Trust J&K. Digitized by eGangotri

लविषयमेतद्वचनात् भविष्यत्प्रत्ययोभवनमहेतुमत् नहेतुभूतवमलकाज्ञानलिंगे
नतदभिपतनम् अपाणात्तुगाह्वगम्यषज्ञाबावंप्रयुक्ते यदिवमलकमज्ञास्यात्तन
शकटंपर्योभविष्यत् इतिहेतुमतोराज्ञनापर्यभवनयोर्भविष्यत्कालयोरितिपत्ति
नोवावगाह्वगम्यते ॥ भूतेच ॥ लिंनिमित्तेलृङ्क्रियातिपत्तौविविक्तिसवमनुवर्तते
पूर्वेणभविष्यतिविहितःसंप्रतिभूतेविधीयतेभूतेचकालेलिंनिमित्तेक्रियातिपत्तौमः
भ्यांल्लृप्रत्ययोभवतितत्राप्यैरित्याभ्यांलिंनिमित्तेविधानमेतत् अत्रतत्तोविकल्पंव
त्यतिदृष्टोमयाभवतःपुत्रोन्नार्थीचंक्रम्यमाणोपरस्यब्राह्मणस्यार्थीयदिसतनदृष्टोम
विष्यत्ततताभोक्ष्यत अथवाभोक्ष्यततनतुभुक्तवान् अन्येनाध्वसपगतः ॥ अतःहृदत्त
नयःप्रतन्यते ॥ धातोरित्यधिकारः ॥ यदितऊर्ध्वंयदनुक्रमिष्यामः ॥ आतृतीया
न्यायपरिसमाप्तेर्धातोरित्येवंतद्वेदितव्यम् ॥ इत्यनुवर्तमाने ॥ हृत्तिङ् ॥ अस्मि
न्धात्वधिकारेतिङ्वर्जितःप्रत्ययःकृत्संज्ञोभवति ॥ वासरूपोऽस्त्रियम् ॥ अस्मिन्
धात्वधिकारेऽसरूपः अपवादप्रत्ययोबाधकोभवतिस्त्र्यधिकारविहितंप्रत्ययंवर्ज
यित्वा ॥ एवुल्तृचौवाकृत्सर्गौइगुपधज्ञाप्रीकिरःक इत्यपवादः तद्विषयेएवुल्तृचौ
वापिभवतःविक्षिपःविक्षेपकःविक्षेप्ताअसरूपइतिकिम्कर्मण्यणुत्सर्गःआतोनु

© Dharmartha Trust J&K. Digitized by eGangotri

५८

रू॰ पा॰ १५२ 152

पतन्नावकइत्यपवादः स नित्यं बाधक एव गणोऽदेः कं बलदः नानुबंधकृतमनेकाल्त्वं यं अ
स्त्रियामितिकिं स्त्रियां स्त्रिकृत्स्नगेः अन्तयादइत्यपवादः स बाधक एव चिकीर्षा जिहीर्षा
शब्दादयउच्यते ॥ शशानचौ ॥ इयवस्थाबाहिर्सर्वकार्यं प्रतीयथाश्रमं स्यादयः सर्वे
व्रस्वाधीनामर्थो स्त्रि भ स विस्तरं प्रागेव स विस्तरं प्रागेव स्त्र बंते भ उदर्शिताः अपि च हृहं
नाप्रयोगावाच्यलिंगाः भवन् भवंती भवंतइत्यादि शप्श्यानोऽन्नित्यम् स्त्रियानुगितश्चे
ति ङी भवंती भवंत्यो भवंत्य इत्यादि नञ् सवे भवत् भवती भवंति इत्यादि पचन् पचं
ती पचत् पचमानः पचमाना पचमानं नेदन् नेदती नेदत् धंसमानः धंसमाना धं
समानम् अदंती अदत् शयनाः शयाना शयानम् इत्यादि ब्रुवन् ब्रुवती ब्रुवत् ब्रुव
णाः ब्रुवाणा ब्रुवाणं यान्ती यांती यात् यांति एवं भावन् भांती भाती भात् भाती भांती नाभ्य
स्ताच्छतुरिति नुमभावः स इति बानः भ स्वकस्येति सर्वनामस्थाने परतनुम् स हति ज
ह्वति तजिहानः तजिहाना तजिहानम् दधत् दधानः दधाना दधानम् इत्यादि दीव्य
न् दीव्यन्ती दीव्यत् ॰॰॰ प्रसूयमानः प्रसूयमाना प्रसूयमानम् नह्यं नह्यंती नह्यमा
ना इत्यादि सुन्वन् सुन्वती सुन्वत् सुन्वानः विन्वन् विन्वती विन्वत् इत्यादि तुदन्
तुदती तुदंती तुदन् तुदन्ती तुदंती म्रियमाणाः मुंचन् मुंचंती मुंचती मुंचत् मुंचमा ऊ॰

© Dharmartha Trust J&K. Digitized by eGangotri

नः कंपयन् कंपयंती कंपयत् भुंजनः भुंजन् युंजन् युंजती युंजत् युंजानः तन्वन् तन्वती मन्वा
नः कुर्वन् कुर्वती कुर्वत् कुर्वाणः क्रीणन् क्रीणती क्रीणत् क्रीणानः द्र्कन् चोरयन्
चोरयंती चोरयत् चोरयमाणः एवं पालयन् प्रथयमाणः पिपठिषन् पिपठिषमाणः पठि-
तो भूयमाणः पापठ्यमानः इत्यादि णिचि भावयन् भावयंती भावयत् भावयमाणः ।
भावे भूयमानं देवदत्तेन पठ्यमानमस्माभिः शय्यमानं युवाभ्यामित्यादि सर्वेन ज्ञेयं वे-
कवचनांतमेव सर्वत्र कर्मणि अभिभूयमानः इंद्र शत्रुत्वेन अभिभूयमाना सेनाः ता
अभिभूयमानं तमः पठ्यमानः इत्यादि सर्वं सर्वत्र व्यावर्तितव्यम् ॥ ताच्छील्य वयो
वचन शक्तिषु चानश् ॥ ताच्छील्यं तत्स्वभावता वयः शरीरस्य यौवनादिः शक्तिः
सामर्थ्यं ताच्छील्यादिषु गम्यमानेषु धातोः चानश् प्रत्ययो भवति ताच्छील्ये कतीह मु-
ण्डयमानाः कतीह भूषयमाणाः वयोवचने कतीह कवचं पर्यस्यमानाः कतीह शिखां व-
हमानाः शक्तौ कतीह निघ्नानाः कतीह पचमानाः ॥ इङ्धार्योः शत्रकृच्छ्रिणि ॥ इ-
ङ्धार्योः शतृ प्रत्ययो भवति अकृच्छ्रिणि वाच्ये अकृच्छ्रः सुखसाध्यः सुखार्थो वि-
धेयः यस्य सोऽकृच्छ्री अधीयन् पारायणम् धारयन्नुपनिषदम् ॥ अकृच्छ्रिणीति कि-
म् कृच्छ्रेणाधीते ॥ संबोधने च ॥ प्रथमा समानाधिकरणार्थ आरंभः संबोध-

२२

तुं॰
पा॰
१५३
153

नेविषयेलटःशतृशानचावादेशौभवतः हेपचन्हेपचमान ॥ लक्षणहेत्वोःक्रियायाः
लक्ष्यतेविज्ञायतेयेनतल्लक्षणम् जनकोहेतुः तावर्थविशेषणंचैतत् लक्षणहेत्वोर्व
र्तमानाद्धातोःपरस्यलटश्शतृशानचावादेशौभवतः तौचेल्लक्षणहेतूक्रियाविष
यौभवतः शयानाःभुञ्जतेयवनाः तिष्ठःशासतिगणकाःहेतौ अर्जयन्वसति अधी॰
यानोवसतिक्रियायामितिकिं इध्यगणायोमोभूत् यःकंपतेसोश्वत्थः यद्रूतवत्तन्नह्
वु ॥ तौसत् ॥ तौशतृशानचौसदादेशौभवतः ॥ लृटःसद्वा ॥ लृटःस्थानेसकौशतृ॰
शानचावादेशौभवतः पूर्ववद्वेवलडादिकार्यं भविष्यन्भविष्यन्तीभविष्यतीभविष्य
न्तुभावेस्यात्मिषमीयन्नत्तामिच्छु ॥ भावकर्मणोःशिवएवहिन्दु ॥ इतिवाचिवविज्ञावःभ॰
विष्यमाणंभाविष्यमाणावाअभिभाविष्यमाणेदेवदत्तोयज्ञदत्तेनअभिभविष्यमाणे
वापोषिष्यमाणःपत्स्यन्नुपत्समानाः नंदिष्यन्नधीतिष्यमाणाः अत्स्यन् अत्स्यन्तीअत्स्य
न्तीवाअत्स्यत अत्स्यमाणातेनाशायिष्यमाणाःभावेअशायिष्यमाणम्नशायिष्यमाणेवा
कर्मणिअतिशायिष्यमाणोदेवदत्तोयज्ञदत्तेनअतिशायिष्यमाणोवावत्स्यन्नवत्स्यमा
नेशास्त्रमित्यादिसर्वमालत्यम् तथाचलिटःकानज्वा ॥ तत्स्थालिटःक्वसुःकानचौ॰
भवतिस्रुवकःकितीनेट्प्रतिषेधः ॥ वस्वेकाजाद्घसाम् ॥ कृतद्विवचनानामेका ङो॰

वां यानुनामकारांतानां यणस्थ विड्डागमो भवतीति नियमात् स्त्वेषां ङ्वावादिनियम
त्वात् मपीड्भावः बभूवान् बभूवांसौ बभूवांसः तस्यवसोः संप्रसारणम् उवोवुरिति
लिरिति वुक् बभूवुषी बभूवत् स्त्रन्त्रधन्त्र नड्डहांद इति समपदः बभूवत् प्रत्यक् हल
मध्यस्त्येत्वाभ्यासलोपौ न तु एकाच्त्वादिट् पेचिवान् वलादित्वाज्ञावान्सर्वे वेडभा
वः एवं वत् सं पेचुषी सं पचिवत् ननन्त्वान् ननन्त्वुषी ननन्त्वत् संविवान् संविवु
षी संविवत् जनिवान् जज्ञुषी जनिवत् घसेर्घस्लादेशाभावे द्विवचने दीर्घैका
देशो गुहाते गुपकाशत्वादिट् ग्राहिवान् ग्राहुषी ग्राहिवत् हा न संप्रसारणस्य वदे
द्विवचने हृते सवर्णदीर्घः ततः इट् ऊचिवान् ऊचुषी ऊचिवत् जहवांच्वह
वान् जघ्नुषी जघ्नवत् घातो लोपः इत्याकारलोपः बभिद्यिवान् बभिद्युषी
बभिद्युषी बभिद्यिवत् तस्थिवान् तस्थुषी तस्थिवत् चिच्छिदिवान् चिच्छिदुषी
चिच्छिदिवत् सस्त्रंहिवान् सस्त्रंहुषी सस्त्रंहिवत् सस्तुवान् सस्तुवुषी सस्तुवत् चि
किवान् चिचिवान् चिक्युषी चिचिकिवत् चिचिवत् तत्रहान् तत्रहुषी तत्रहवत्
सम्भूवान् सम्भुवुषी सम्भूवत् सस्तुहान् सस्तुहुषी सस्तुहवत् ननृधान् ननृधुषी ननृधत्
ययज्वान् ययज्वुषी ययज्वत् तेनिवान् तेनुषी तेनिवत् चकृवान् चकृषी चकृवत्

© Dharmartha Trust J&K. Digitized by eGangotri

दुं॰ पा॰ १५४ 154

वव्रावत् वव्राणो वव्रीवत् जिह्वान् जिह्वाणो जिह्वत् चोरयां चकृवान् चोरयां
बभूवान् चोरयामासिवान् इत्यादि सर्वत्र गहनवद्विस्तर इत्येतेधातूनां वसौ विभाषा
इडागमो भवति दृशो श्चेति विकल्पात् इड्गमहनेत्युपधालोपः जग्मिवान् गमो नो धातोः
जगन्वान् विविद्वान् विविदिवान् विविश्वान् विविशिवान् ददृशिवान् ददृश्वान्
दाश्वान् साह्वान् मीढ्वांश्च नश्यानित्येते छन्दसि भाषायां च विशेषण निपात्यन्ते दाश्
वान् इत्यस्य द्वासर्व श्वित्वमनिट्त्वं च निपातनात् साह्वान् मीढ्वान् इति मिह सेचने
न म इत्यस्य द्वित्वमनिट्त्वं ढत्वमुपधादीर्घत्वं च निपातनात् मीढ्वानपि वने हकारचो
वकारस्य ह्रस्वत्वात् ॥ इति श्वादिपरिच्छेदः समाप्तः ॥ कृत्याः प्राङ्ण्वुलः ॥१
प्रागेतस्मात् ण्वुलः शब्दात् नामयानि तऊर्ध्वं प्रत्ययान् वक्ष्यामः कृत्यसंज्ञाले वेदित
व्याः ल्वः कर्मणि भावे च अकर्मकेभ्यः तयोरेव कृत्यक्तखलर्थाः भवन्ति कृत्यसंज्ञातयोः
भावकर्मणोः कृत्यक्तखलर्थाः भवन्ति कृत्यल्युटो बहुलम् कृत्यसंज्ञकाः प्रत्ययान्तु
इच् यत्रोक्ता ततोऽन्यत्रापि भवन्ति ॥ अर्हे कृत्यतृचश्च ॥ अर्हतीत्यर्हः योग्यः अ
र्हे कर्तरि गम्यमाने कृत्यतृचः प्रत्ययः भवन्ति चकारात् लिङ् च व्यत्तव्यानीयरौ ॥१
धातोरिति वर्त्तते धातोः तव्यत्तव्यानीयर् इत्येते प्रत्यया भवन्ति तकाररेफौ स्वरार्थौ

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri